
कविकुलगुरु - कालिदास - संस्कृत - विश्वविद्यालयः

॥अथ श्री ललिताम्बाप्रा.॥

ॐ श्री. वे. शा. धाटेशास्त्री । चिटणीसपुरा नागपुर.

Accession No. - 2916 M828

Title - सौन्दर्य लहरी टीका

टि. लक्ष्मीधर

Subject :- स्तोत्र

Author :- लक्ष्मीधर (टि.)

लेखक :- [illegible]

Date :- शके 1705.

Folios :- 116

9

श्रीगणेशायनमः॥श्रीललितांबायैनमः॥वंदेमहिमहीयांसंमांसलंविजटाधरंगायत्कं
कणभूणकारस्वःशब्दानुशासने॥१॥शेषाशेषोक्तिभूषाःकणचरणघणग्रंथसौगंध्यजिघ्रे
मंदोक्तिप्रौढिलीढाप्युरगुरुतरणीगुंफगुंभद्विजंभाः॥निःशंकाःशंकरोक्तौपशुपतिमतनिर्वा
हकाःसांख्यसंख्यापयस्यश्रीलोल्लक्ष्मीधरविबुधमणेर्भातिवाचांनिगुंफः॥२॥सोयंलक्ष्मी
धरःप्राहटीकांलक्ष्मीधराभिधां॥परांसमाहितस्वांताःसेवंतांसततंबुधाः॥३॥स्यादेवमेलस
तयामतिमांद्यतोवाशेषःक्वचित्क्वचिदथापिनकापिशंका॥नैसर्गिकीखलुगुणीकरणप्रवीणा
शक्तिःसदाविजयतेकिलसज्जनानां॥४॥इहखलुशंकरभगवत्पूज्यपादाःसमयमतनेयचे
रनःसमयाख्यांचंद्रकलांश्लोकशतेनप्रस्तुवंति॥५॥शिवःशक्त्या[illegible]यदिभवतिशक्तःप
भवितुंनचेदेवंदेवोनखलुकुशलःस्पंदितुमपि॥अतस्त्वामाराध्यांहरिहरविरिंच्यादिभिरपि
प्रणंतुंस्तोतुंवाकथमकृतपुण्यःप्रभवति॥१॥शिवःसर्वमंगलोपेतःसदाशिवनसंयुक्तांनादि

॥३॥

यस्माद्धातोः शिवशब्दो निष्पन्नः ॥ यथोक्तं ॥ हिंसाधातोः सिंहशब्दो वशकान्तौ शिवः स्मृतः ॥ व
र्णव्यत्ययतः सिद्धोपद्रवकः कश्यपो यथा ॥ वश कान्तावित्यस्य धातुः तुदादिरदादिश्च संगृहीतः तुद
दिश्च वशेतेरदिति रर्थः। कान्तिरदिति। अदादेर्वष्टीति कामनार्थः। इच्छावशात् स्याभवत्यादीच्छ रस्य हि
यत्वं वशेति प्रकाशयति स्वयं प्रकाशयति ॥ यद्वा स्वस्मिन्विश्वं प्रकाशयतीति शिवः ॥ अथवा
शीङ् स्वप्ने इत्यस्माद्धातोः शिवशब्दो निष्पन्नः। स्वप्नं वाति क्षिपतीति शिवः जाग्रदादि अविद्या
निर्मुक्त इत्यर्थः ॥ यद्वा स्वप्नमविद्यां वाति गच्छतीति शिवः सदा स्वकलासंवलितमदृश्यावदा। न
स्यैव शिव शब्दवाच्यं वक्ष्यते। तादृशः शिवः शक्त्या जगन्निर्माणशक्त्या युक्तः अवच्छिन्नश्चै
न् अविद्यावच्छिन्नचैतन्यस्यैव ब्रह्मणो जगन्निर्माणे शक्तत्वात्। यदि भवति चेत् तदा शक्तः समर्थः प्र
भवितुं प्रपंचं निर्मातुं न चेदेवं शक्त्या युक्तो न भवेदित्यर्थः। दिव्यतीति देवः सदाशिवः न खलु निषे
धसंभावनायां स्पंदितुमपि चलितुमपि कुशलः समर्थः निराकारस्य विभोराकाशतुल्यस्य स्पंदना
योगादिति हृदतोर्थः। धात्वर्थस्तु शिवशक्त्योर्जायापति न्यायेन जाया शक्त्या युक्तश्चेत्प्रपंचक

॥२॥

पसंतानं निर्मातुं शक्नोति॥ तथाविधयुक्तश्चेन्न शक्नोतीति॥ आमरहस्यार्थस्तु शिवशब्देन शिवयो
निचक्रमध्ये चतुर्यान्यात्मकमर्द्धचक्रमुच्यते शक्तिशब्देन वह्निष्टं पंचयोन्यात्मकं मर्द्धचक्रमुच्यते॥
एवमर्द्धद्वयं मिलितं नवयोन्यात्मकं चक्रं भवति एतस्माच्चक्राद्देवजगदुत्पत्तिस्थितिलया भवंतीति पु
रस्तान्निवेदयिष्यते॥ चतुर्भिः शिवचक्रैश्च शक्तिचक्रैश्च पंचभिः॥ शिवशक्त्यात्मकं तेयं श्रीचक्रं
शिवयोर्वपुरिति॥ शिवशक्त्योर्मेलनं षट्त्रिंशत्तत्वातीतं तत्त्वान्तरमिति पुरस्तान्निवेदयिष्ये॥ तस्मा
न्मेलनाद्देवजगदुत्पत्तिस्थितिलयाः॥ न केवलादेवेति च वक्ष्यते॥ यथोक्तं यामकेश्वरतंत्रे स्वतु शक्ता सा॥
परोपि शक्तिरहितः शक्त्या युक्तो भवेद्यदि॥ सृष्टिस्थितिलयान्कर्तुमशक्तः शक्त एव चेति॥ एतच्चतुर्भिः
श्रीकंठैरित्यादिश्लोकव्याख्यानावसरे निपुणतरमुपपादयिष्यामः॥ अतस्तस्माद्धेतोस्त्वां भगवतीमा
राध्यां आराधयितुं प्रजयितुमर्हंती हरिहरविरिंचादिभिः हरिर्विष्णुर्हरो रुद्रः विरिंचो ब्रह्मा आदिशब्दे
नेंद्रादयः संगृह्यंते॥ ते चाधिकारपुरुषाः प्रपंचांतःपातिनः तैर्नमस्कार्यत्वे प्रणवजनयित्र्या भगव
त्याः कुलक्रमवेस्कंके अनंतस्त्वामाराध्यामिति॥ ततारोपस्तुतिरिति ध्येयं॥ यद्वा निगमावा संगृह्यंते॥ निगम
सेव्यत्वाद्भगवत्याः॥ तदुक्तं रत्नश्रुतीनां मूर्द्धानं इत्यादौ स्फार्यते॥ विरिंचशब्द अकारांतः अपिशब्दः

॥२॥

कथं वा स्वार्थमुपस्करोति ॥ प्रणंतुं नमस्कर्तुं अत्राव्हः कायिकं वाचिकं मानसिकं त्रिविधं नमस्कारमाह ॥ स्तो
तुं वा केवलं स्तुतिमात्रमपि कर्तुं अकृतपुण्यः पूर्वजन्मार्जितपुण्यनिचयः कृतपुण्यः ॥ तदन्य अकृतपुण्यः
प्रभवति इत्यन्वयः अत्रेत्थं पदयोजना ॥ हे भगवति शिवो देवः शं स्त्वया युक्तो भवति तदा प्रभवितुं शक्तः
न चेदेवं एवं न चेत् स्पंदितुमपि कुशलो न खलु अतः हरिहरविरिंच्यादिभिरपि आराध्यां त्वां अकृत
पुण्यः प्रणंतुं स्तोतुं वा कथं प्रभवति ॥१॥ तनीयांसं पांसुं तव चरणपंकेरुहभवं विरिंचिः संचिन्वन्वि
रचयति लोकानविकलं ॥ वहत्येनं शौरिः कथमपि सहस्रेण शिरसां हरः संक्षुद्यैनं भजति भसितो
द्धूलनविधिं ॥२॥ तनीयांसमिति सूक्ष्मं पांसुं रजः कणं तव भवत्याः देव्याः चरणपंकेरुहभवं चरणौ पंके
रुहे इव ताभ्यां भवं विरिंचिर्ब्रह्मा विरिंचिविरिंचावित्यकारांत इकारांतः विरिंचश्च विरंचिश्च विरिंचिरिति समरकोशा
भिधानात् ॥ संचिन्वन् संपादयन् संभृतिं कुर्वन्नित्यर्थः विरचयति विविधान्करोति लोकान् लो
क्यंते इति लोकाः स्थावरजंगमात्मकाः प्रपंच इत्यर्थः यद्वा ऊर्ध्वलोकाः सप्त भूरादयः अधो लो
काः सप्त अतलादयः एवं चतुर्दश लोकाः तान् अविकलं परस्परासंकीर्णं यथा भवति तथा ॥

3

यद्वा यावत्कल्पमविकल्प्यमेषां यथा भवति तथा वहति प्रापयति रक्षति एनं पांसुरजःकणं च
तुर्दशलोकास्तत्तया स्थितं शौरिः भूरस्य यद्पसं शौरिः बलभद्रः तेन शेषो लक्ष्यते शेषावतारत्वा
द्बलभद्रस्य ॥ यद्वा शृणोति किंनस्ति कषतीति शौरिः सर्पराजः शेष इत्यर्थः यद्वा शौरिर्विष्णु
र्यथोक्तं चतुःर्मासांश्चिंशुमारास्मिनाविष्णुः समलोकान्धस्थितान् ॥ द्भ्रेशोषत यालोकान्भरा
दीन्प्रध्वंतः स्थितान् ॥ इति ॥ शेषपक्षेपि शेषस्यैव विष्णुः रक्षणे विष्णोरेवाधिकारात् ॥ कथमपि कथं
चित्सहस्रेण शिरसां ॥ हरः अंतकाले प्रपंचं हरतीति हरः संक्षुधस्तम्य ध्वंदयिताएनं च तुर्दश
भुवनास्तत्तयावस्थितं पादरजःकणं भजति सेवते उपदहतीत्यर्थः ॥ भसितोद्धूलनविधिं भसितेन
पदुद्धूलनं उपदहनमंगरागकरणं तस्य विधिरनुष्ठानं ॥ तथा चोक्तं ॥ अत्रैवं पदयोजना ॥ हे भ
गवति विरिंचिस्तव चरणपंकेरुहाणां तनीयांसं पांसुं विचिन्वन् लोकान् अविकलं विरंचयति
हे भगवति शौरिरेनं शिरसां सहस्रेण कथमपि वहति । हे भगवति हरः एनं संक्षुद्य भसितोद्धूलन
विधिं भजति ॥ अयं भावः ब्रह्मविष्णुमहेश्वराणां प्रपंचविषयस्य स्थितिलयकर्तृत्वं भगवत्याः

॥३॥

पादरेणुमहिमायत्तमिति॥ ३॥ तमेव पांसुं प्रस्तौति॥ अविद्यानामन्तस्तिमिरमिहिरद्वीपनगरी जडानां चै
तन्यस्तबकमकरंदस्रुतिझरी॥ दरिद्राणां चिंतामणिगुणनिका जन्मजलधौ निमग्नानां दंष्ट्रा मुररिपुवरा
हस्य भवती॥ ३॥ एष पांसुः अविद्यानां अविद्याविष्टचित्तानां अज्ञानामित्यर्थः॥ न तु विद्यमानविद्यानां अ
विद्यायाः भावरूपत्वात् अर्शआदित्वादच् प्रत्ययः॥ अविद्यावंतः अविद्याः इति॥ यद्वा अविद्याविष्टचित्ता
अप्युपचारेण अविद्या इति तेषामंतस्तिमिरमिहिरद्वीपनगरी अंतस्तिमिरं मनस्याज्ञानं अज्ञानस्य ति
ला मिररूपत्वं आवरकत्वसाम्यात्॥ यथा बाह्यपदार्थानावृणोति तमः तथा अंतरपदार्थमात्मानमावृणो
त्यविद्या॥ तस्य तिमिरस्य मिहिरद्वीपनगरी मिहिरस्य सूर्यस्य द्वीपः समुद्रमध्ये उदयप्रदेशः तत्र नगरी प सू
त्तनं वासगृहमिति यावत्॥ जडानां मंदानां दुर्मेधसां चैतन्यस्तबकमकरंदस्रुतिझरी च तेन चैव चैतन्यं स्वा
र्थेष्यञ्॥ चेतना नाम आत्मगतपदार्थप्रबोधकारिणी चित्तविस्ताररूपा का च न शक्तिः तदेव स्तबकः
स्तु कल्पवृक्षगुच्छः तस्य मकरंदः पुष्परसः तस्य स्रुतिः स्रवणं निष्यंदः तस्य झरी प्रवाहः दरिद्राणां दीनानां ४
चिंतामणिगुणनिका चिंतामणेः रत्नविशेषस्य गुणनिका आम्रेडनं समूह इति यावत्॥ जन्मजलधौ

जन्मैव संसार एव जलधिः समुद्रः संसारे समुद्रत्वारोपणं अपारत्वसाम्यात् ॥ तत्र निमग्नानां नितरा
मुन्मज्जनराहित्येन मग्नानां दुःखस्य पदं ॥ मुररिपुवराहस्य मुरो नाम दैत्यस्तस्य रिपुः विष्णुः । अयं मु
ररिपुशब्दो विशेषणवाचित्वेपि विशेष्यं विष्णुमेव कथयति शब्दस्वाभाव्यात् । न चात्र पंकजादि
वच्छक्तिसंकोचः कृष्णवाचकत्वादस्येति तस्य वराहः अवतारविशेषः तस्य यथोक्तस्य भवतिव
र्नते ॥ अत्रेत्थं पदयोजना ॥ हे भगवति भवत्पादाब्जरेणुरेणवः अविद्यानामंतस्तिमिरमिहिरद्वी
पनगरी जडानां चैतन्यस्तबकमकरंदस्रुतिझरी ॥ दरिद्राणां चिंतामणिगुणनिका जन्मजलधौ निम
ग्नानां मुररिपुवराहस्य दंष्ट्रा भवति ॥ अत्र परिणामालंकारः ॥ आरोप्यमाणस्य आरोपणविषयात्म
तया स्थितेः तथा च मंखुकसूत्रं ॥ आरोप्यमाणस्य प्रकृतोपयोगित्वे परिणाम इति ॥ अस्यार्थः आ
रोप्यमाणस्य प्रकृतोपयोगित्वं आरोपविषयात्मतया स्थितिनिबंधनमेवेति फलाभिप्रायेणोक्तमि
मिति ॥ यद्वा उल्लेखालंकारः नगर्यादिरूपेणोपासोरल्लेखनात् ॥ रूपकं वा भवतु प्रकृतोपयोगो विव
क्ष्यत इति ॥ ३ ॥ त्वदन्यः पाणिभ्यामभयवरदो दैवतगणस्त्वमेका नैवासि प्रकटितवराभीत्यभिनया ॥

भयात्त्रातुंदातुंफलमपिचवांछासमधिकंशरण्येलोकानांतवहिचरणावेवनिपुणौ॥४॥त्वदन्यः
सकाशाद्न्यइतरःपाणिभ्यांहस्ताभ्यांअभयवरदःअभयंभयराहित्यंभयात्त्राणमितियावत्वर
दइत्यर्थः॥तौददातीस अभयवरदःएकेनहस्तेनअभयदःअन्येनवरदइत्यर्थःदैवतगणःदेवतैवदैव
तंविनयादित्वात्स्वार्थेअण्स्वार्थिकाःप्रत्ययाःप्रकृतितोलिंगवचनान्यतिवर्तंतेयथाचेतनैवचै
तन्यमिति॥तेषांगणःवृंदंत्वद्न्यःआदित्यादयश्चगणदेवताःसंभवनीएकामुख्याएकसंख्यासंख्ये
यावानेयासिनभवस्यवप्रकटितवराभीत्यभिनयाप्रकटितःप्रकाशितःहस्ताभ्यामितिशेषःच
रदइत्यर्थःअभीतिरभयंभयात्राणंतयोरभिनयःअभिव्यंजनंयस्याःसातथोक्ता॥हस्ताभ्याम
भयवरदानंसर्वदैवतसाधारणमितिसर्वेषांअसाधारणमभयवरप्रदानप्रकारमाह॥भयात्
त्रातुंदातुंफलमपिचवांछासमधिकंवांछायाःकामनायाःसम्यगधिकंकामितार्थाधिकमित्य
र्थःशरण्येशरणार्हेलोकानांचतुर्दशभुवनानांतवभवत्याहिशब्दइत्यर्थेइतिसंविसेत्यर्थः॥
चरणौपादौएवकारअवधारणेनिपुणौसमर्थौ॥अत्रेत्थंपदयोजना॥हेभगवतिलोकानांशरण्ये

५

त्वदन्यः दैवतगणः पाणिभ्यामभयवरदः एका त्वमेव पाणिभ्यां प्रकटितवराभीत्यभिनया नैवासि
हि इति संचिंसन त्वच्चरणावेव भयात्त्रातुं वांछासमधिकं फलमपि दातुं निपुणौ॥ अयं भावः हस्ता
भ्यामभयवरदानं सर्वसाधारणमिति फलितत्वच्चरणावेव तादृशौ अभयवरदाने स्वयमेव व्या
पृतौ अतस्त्वत्कर्तृकं हस्ताभ्यामभयवरदानं॥ प्रयोजनाभावात्॥ सर्वसाधारण्यप्रसंगात्॥
लोकैकशरण्यव्याघातात् वेसुपदेश इति॥ अत्र व्यतिरेकालंकारः स्पष्टः। काव्यलिंगकः। काव्यलिं
गालंकारोऽपि स्पष्टः। तयोरंगांगिभावेन संकरः॥४॥ हरिस्त्वामाराध्य प्रणतजनसौभाग्यजनन
नीं पुरा नारी भूत्वा पुररिपुमपि क्षोभमनयत्॥ स्मरोऽपि त्वां नत्वा रतिनयनलेह्येन वपुषा मुनी
नामप्यंतः प्रभवति हि मोहाय महतां॥५॥ हरिर्विष्णुः त्वां भगवतीं चक्ररूपिणीं विद्यारूपिणीं च आ
राध्य पूजयित्वा जपित्वा ध्यात्वा च अतएव त्रिपुरसुंदरीप्रस्तारभेदेषु एकस्य प्रस्तारस्य ऋषि
र्विष्णुः ऋषिर्वामदेवस्य सिद्धो मंत्रो येन दृष्टः स दृष्ट इति॥ अतएवा कुर्दर्शनादृषिरिति॥ इयं पंच
दशाक्षरी विद्या ऋग्वेदे आम्नाता चत्वार ईं बिभ्रति क्षेमयंत इत्यादौ नचाद्यं ईकारत्रयं हल्ले
खात्रयस्य श्रुतत्वादिति वा अंबोऽकलास्मकेस्य श्री ह्रीं बीजस्य गुरुसंप्रदायवशात्त्विज्ञेयस्य सि

॥५॥

तत्वात्तु चतुर्णां मोकाराणां स्थितिरिति मूलविद्यायां वेदस्थितत्वं सिद्धं ॥ अत्र केचित्कौलसमयाभिज्ञाः न
चत्वार ईं बिभ्रति क्षेमयन्त इत्यादिश्रुतिबोधिताः चत्वार ईकारा ईकारेणसाहु हल्लेखात्रयमेमित्याहुः
तत्र ईकारस्य ईकारत्वोल्लेखपुरःसरत्वान्मूलविद्यायाः षोडशवर्णात्मकत्वात् ॥ षोडशवर्णात्मकत्वे च
षोडशविद्याप्रकृतिभूतत्वान्मूलविद्यायाः एतच्चतुःषष्ट्यां तन्त्रैरिति त्रिंशः शक्तिः कामइति श्लोक
व्याख्यानावसरे निपुणतरमुपपादयिष्यामः ॥ किंच मंत्रस्य वेदमूलत्व संज्ञानुवाकेन इयं वाव
सरघे सनुवाकेन च प्रतिपाद्यत इति वक्ष्यते ॥ प्रकृतमनुसरामः ॥ प्रणतजनसौभाग्यजननी प्रक
र्षेण नताः प्रणताः कायिकवाचिकमानसिकनमस्कारवंतः । जनाः भक्तलोकाः तेषां सौभाग्यस्य ज
ननी सवित्री तां पुरा पूर्वं नारी कांता भूत्वा नारीरूपं धृत्वा पुररिपुं त्रिपुरांतकं अपिशब्दो जितेंद्रियत्वं
संभावयति क्षोभं मनोविकारं अनयत् नयति स्म स्मरोपि मन्मथोपि अपिशब्दः इर्वाकेविहुसुधे
र्मसमुन्मिनोति ॥ यथा विष्णुः भवमंत्रस्य ऋषिः एवं स्मरोपि त्वां भवती नत्वा शरणमुपगम्य श्री
चक्रं सम्यगभ्यस्य त्वन्मूलविद्यां सम्यगभ्यस्य तत्प्रभावात् प्रसन्नः रतिनयनलेह्येन रतेः स्वप
त्न्याः नयनाभ्यां लेह्येन लेहनार्हेण रतिनयनैकदृश्येनेत्यर्थः ॥ यद्वा रतिर्नाम अतिसुंदरी तस्या न

६

॥६॥

यनपेयेनेसति सौंदर्यं कामदहस्येति पुंवे पादहन मुनीनां जितेंद्रियाणां अपि ब्रह्मः संभावनीयां
अंतः अंतरंगे चित्त चंचलत्वं प्रभवंति समर्थः हि स्त्रि मोहाय त्वत्पादविषय वांछासादनाय महतां
महात्मनां॥ अत्रैषु पद्याजना॥ हे भगवति प्रणतजन सौभाग्य जननी त्वां हरि राराध्य पुरा नारीभू
त्वा पुररिपुमपि क्षोभमनयत्॥ स्मरोपि त्वां नत्वा रतिनयन लेह्येन वपुषा महतां मुनीनामपि अंत
र्मोहाय प्रभवति हि॥ पुरा किल नारायणः स्त्री रूपधारी कनकस्वामिनं प्रलोभ्याय धीत्वा तादृशं स्त्री
रूपं शंभुना प्रार्थितः सन् तस्मै दर्शयित्वा तं व्यामोहयामास॥ इत्यादि कथानुसंधेया॥ मन्मथोपि
सकलमुनिमनः संक्षोभं कुर्वाणः प्रावर्तत॥ एतच्च वामकेश्वरतंत्रे चतुःशत्यां निरूपितं॥ एनामे
व पुराध्यात्वा विष्णुः त्रैलोक्यमोहिनी॥ त्रैलोक्यं मोहयामास कामारिं भगवान् हरिः॥ कामदेवोपि देवी
त्रिमहात्रिपुरसुंदरी॥ समाराध्याभवल्लोके सर्वसौभाग्यसुंदरः इति॥ अन्यत्र यतः यत् रति मूलकम
नः संक्षोभकरणं तद्भगवती प्रसाद लभ्यमिति वक्तुं कवेरयमारंभः॥५॥ यद्यपि पूर्वस्मिन् श्लोके भ
गवती प्रसादात् सादितं मन्मथस्य प्रागल्भ्यमुक्तं तथापि मन्मथस्यानंगविद्यायां मन्मथप्रस्तारस्य अभ्य
षित्वात् दायत्त्वमिति प्रागल्भ्यमाह॥ धनुः पौष्पं मौर्वी मधुकरमयी पंचविशिखाः वसंतः सामंतो

॥६॥

मलयमरुदायोधनरथः॥ तथाप्युक्तः सर्वं हिमगिरिसुते कामपि कृपामपांगात्ते लब्ध्वा जगदिद
मनंगो विजयते॥ ६॥ अत्र पक्षे यत्तदोरध्याहारः उभयाध्याहारः सकलकविसमयसिद्धः यथा र
घुवंशे वागर्थाविव संपृक्तौ विसर्गे यौ संपृक्तौ नौ वंदे इति॥ तथा येनाम केचिदहनः प्रथमं यस्य
वल्लाभिसाधोयउत्पत्स्यते नं प्रत्येव पतन्निति धनुरायोधनसाधनं चापः पौष्पं मौर्वी सिंजिनी मधु
मधुकरमयी मधुकरैः प्रचुराभरपंक्त्या निर्मितस्यर्थः परस्परासंबंधत्वान्नो मधुकराणां सिंजिनी
त्वं न संगच्छत इति तात्पर्यं पंचपंचसंख्यासंख्ययोः विशिखाः बाणाः पंचानां विक्षेपणे तूणी भा
व एव कारणमिति तात्पर्यं॥ किंच। पंचविशिखाः इत्यनेन। न हि विशिखानां प्रसूनात्मकत्वप्रसिद्धेः
विशिखकार्यकारित्वाभाव इति तात्पर्यं॥ वसंतः कालविशेषः वसंतो मधुमाधवाविभिधानो
नृ सामंतः सचिवः तस्य कालात्मकत्वात् साचिव्यकारित्वं संगच्छत इति तात्पर्यं॥ मलयमरुत् द
क्षिणानिल आयोधनरथः आयोधनस्य युद्धस्य साधनं स्यंदनः मलयमरुतो मलयप्रसिद्धत्
त्वात् न सार्वत्रिकत्वं सार्वत्रिकत्वेपि न सर्वदा सद्भावः सर्वदा सद्भावेपि नीरूपत्वात् रथकार्यका

6

रिसाभाव इति तात्पर्यं तथापि उक्तप्रकारे सर्वजनीने सिद्धे पि एकः असहायभूतः सर्वं सकलं प्रपं
चं हिमगिरिसुते हिमप्रधानो गिरिर्हिमगिरिः शाकपार्थिववत्साधुः तस्य सुता मेदनात्तस्याः संबु
द्धिः कामपि अनिर्वाच्यां अविज्ञाद्यत्व संभावनायां कृपामनुकंपां अपांगात् कटाक्षात् तेन लब्ध्वा प्रा
प्य जगत् जंगमात्मलोकं स्थावरात्मकस्याप्रसक्तेः इदं परिदृश्यमानं अनंगः अंगरहितः अत्र
साधकस्य दौर्बल्यं सूचितं॥ हस्ताभावादेव चापाकर्षणशरसंधाने अप्यसंभाविते पादाभावा
च्च रथावस्थितिरप्यसंभाविता वक्त्राद्यभावात्तु वचस्य न मधुनासाद्यं संभाषणसन्निरीक्षण
सहासनादप्यसंभाव्यं इति तात्पर्यं॥ विपराभ्यां जेरित्यात्मनेपदं॥ अत्रेत्थं पदयोजना॥ हे भगव

ति हिमगिरिसुते यस्यानंगस्य धनुः पौष्पं मौर्वी मधुकरमयी विशिखाः पंच सामंतो वसंतः आ
योधनरथो मलयमरुत् तथापि सोनंगः एकः ते अपांगात् कामपि कृपां लब्ध्वा सर्वमिदं जगद्विज
यते॥ अत्र विभावनालंकारः विजसाधनाभावे पि विजयोत्पत्तेः कारणं विना कार्योत्पत्तिर्विभावन
मिति लक्षणं॥६॥ सुधासिंधोर्मध्य इति उत्तरश्लोकोपयोगितया समर्पितां चतुर्विधैरनुसंधा
नमहिमामणिद्वीपगवक्षायात्यंतरूपं स्फुरति तादृशं प्रस्तौति॥ क्वणत्कांचीदामा करिकलभ

॥७॥

स्तननता परिक्षीणा मध्ये परिणतशरच्चंद्रवदना॥ धनुर्बाणान् पाशं सृणिमपि दधाना करतलैः पुरस्ता
न्नः पुरमथितुराहोपुरुषिका॥७॥ क्वणत्कांचीदामा सिंजन्मणिमेखला करिकलभकुंभस्तननता करि
कलभकुंभतुल्याभ्यां स्तनाभ्यां ईषन्नम्रा मध्येप्यर्थः॥ परिक्षीणा [illegible] मध्ये अवलग्ने तनुमध्येत्य
र्थः॥ परिणतशरच्चंद्रवदना परिणतः संपूर्णकलः शारदि शरत्काले चंद्रः इंदुस्तद्वद्वदनं यस्याः सा
धनुश्चापं बाणान् पुष्पमयान् पाशं दाम सृणिमंकुशं अपि च व्युत्क्रमेण समुच्चिनोति दधाना
बिभ्रती करतलैः चतुर्भिर्हस्तांबुजैः पुरस्तात् हृदयकमले मणिपूरान्निर्गमे स्थितेषु सः॥ आस्तामु
पविशतु नः अस्माकं पुरमथितुः त्रिपुरांतकस्य॥ यद्वा पुराणि त्रीणि वर्णानि त्रिपुराबीजानि म
थाति मथित्वा नवनीतं करोतीति यस्मिन् रुद्रयामले स रुद्रः पुरमथितेत्युच्यते आहोपुरुषिका
आहोशब्द आश्चर्यवाची पुरुषशब्दस्य प्रसंगात्मवाचिनः अहंशब्दवाच्यत्वं लक्ष्यते अतः आहो
अहंभावः आहोपुरुषिका अहंकार इति यावत् रुद्रस्य अहंकाररूपिणी भगवती सा शिवः शक्त्य
त्यादि श्लोकव्याख्याने प्रपंचितं॥ प्रपंचयिष्यते च॥ अथ पदयोजना॥ क्वणत्कांचीदामा करिक

॥८॥

लभकुंभस्तनननतामध्येपरिक्षीणापरिणतशरच्चंद्रवदनाधनुर्बाणान्पाशंसृणिमपिकरतलैर्द
धानानःपुरस्तात्पुरमथितुराहोपुरुषिकाआस्तांअवयच्छत्तुकंतच्चतयाज्ञाचक्रमितिसांप्रदायिकश्लोकप
क्षेव्याख्यानांतेनिपुणतरमुपपादितंतत्ततएवावधार्यं॥७॥सुधासिंधोर्मध्येसुरविटपवाटीपरि
वृतेमणिद्वीपेनीपोपवतिचिंतामणिगृहे॥शिवाकारेमंचेपरमशिवपर्यंकनिलयांभजंतित्वांध
न्याःकतिचनचिदानंदलहरीं॥८॥सुधासिंधोरमृतसमुद्रस्यमध्येसुरविटपवाटीपरिवृतेसुरवि
टपानांवाटीभिःताभिःपरिवृतेमणिद्वीपेमणिमयेअंतरीयेनीपोपवनवतिनीपैःकदंबैरुपव
नवतिचिंतामणिगृहेचिंतामणिरचितेमंदिरेशिवाकारेशिवात्मकेशिवशक्तिरूपत्रिकोणइ
तियावत्मंचेखट्वायांपरमशिवपर्यंकनिलयांपरमशिवएवपर्यंकस्तस्मिन्तत्रनिलयःअवस्थि
तिर्यस्यास्तांभजंतिसेवंतेत्वांभगवतीधन्याःसुकृतसाधनसंपन्नाःकतिचनविरलाःचिदा
नंदलहरींचिज्ज्ञानंतदाकारआनंदोनिरतिशयसुखंतस्यलहरीमुत्स्येकरूपां॥अत्रेयंपदयो
जना॥हेभगवतिसुधासिंधोर्मध्येसुरविटपवाटीपरिवृतेमणिद्वीपेनीपोपवनवतिचिंताम
णिगृहेशिवाकारेमंचेपरमशिवपर्यंकनिलयांत्वांचिदानंदलहरींकतिचनधन्याःभजंति॥अत्र

॥८॥

दमन्तुसंधेयं॥ भगवत्पादाचार्याः समयमतपारदृश्वानः समयाचारप्रवणाः समयरूपां भगव
गवतीं स्तुवंति॥ समयाचारो नाम आंतरपूजारतिः कुलाचारो नाम बाह्यपूजारतिरिति रहस्यं एतच्च
तवाधारे मूले सह समयेत्यादि श्लोकव्याख्यानावसरे निपुणतरमुपपादयिष्यामः॥ श्रीचक्र
स्य वियच्चक्रमिति नामांतरमस्ति। वियच्चक्रं तु वियत्स्वरूपत्वान्न वियत्स्वरूपत्वेऽपि द्विविधं हार्दाकाशा
जं बाह्याकाशजं वा॥ बाह्याकाशजत्वं नाम बाह्याकाशावकाशे पीठादौ भूर्जपत्रपुडुपट्टहेमजे रत्ना
दिपट्टतले लिखित्वा समाराधनं एतद्देवकौलपूजेत्याकुर्वद्धुः एतदुत्तरत्र स्फारयिष्यते॥ हार्दाका
शत्वं नाम हृदयाकाशावकाशे चक्रस्य पूजनं इदमेव समयपूजेत्याहुः समयिनः एतदुत्तरत्रास्फा
र्यते तत्र नवयोनिषु अधः स्थितशिवात्मकयोनिचतुष्कस्योपरि ऊर्ध्वस्थितयोनिपंचकादधः प्र
देशस्य बैंदवस्थानस्य नाम सुधासिंधुरिति॥ बिंदुस्थानं सुधासिंधुः पंचयोन्यः सुरद्रुमाः॥ तत्रैव
नीपश्रेणी च तन्मध्ये मणिमंडपं॥ तत्र चिंतामणिकृतं देव्या मंदिरमुत्तमं॥ शिवात्मके महामंचे महेशा
नोपबर्हणे॥ अतिरम्यतले तत्र कशिपुश्च सदाशिवः॥ ततकाश्च चतुष्पादा महेंद्र्य प्रतद्रुहः॥ तत्रा

शान्त्यात्मक ४

स्तेपरमेशानीमहात्रिपुरसुंदरी॥द्विवार्कमंडलं भित्वा द्रावयंती दुमंडलं॥तदुद्भूतामृतस्यंदपूरैः परमा
नंदनंदिता॥कुलयोषित्कुलं सद्यःप्रपरपूरुषमेति सा॥इति रुद्रयामले श्वरमहातंत्रे बहुरूपाष्टकविधा मै
यां कथितं॥देव्या मंदिरमित्यस्यार्थः॥देवीमंदिरं त्र्यपश्चिमाग्रं त्रिकोणात्मकं श्रीचक्रमुच्यते॥अत
उक्तं द्विवाकारमंचद्भूनि।त्रिकोणात्मकश्रीचक्रस्य बिंदवस्थाने प्रसंगत्वात् बिंदवस्य प्रधानत्वात् प्रधा
नेगुणस्यांतर्भावादंतर्भाव उक्त इति रहस्यं॥भक्तकाद्व्यस्यार्थः॥भक्तकाभक्त्याद्द्रुहिणहरिरुद्रेश्वराः

॥१९॥

एतन्मूगतास्तेमंचत्वंद्रुहिणसादिश्लोकव्याख्याने वक्ष्यते॥द्विवार्कमंडलं भित्वेत्यस्यायमर्थः द्विवा
नामशक्तिः कुंडलिनी अर्कमंडलं हृदयकमलोपरिस्थितं भित्वा भिन्नं कृत्वा अवधुय आधारेस्य
र्थः अर्कमंडलोपरिस्थितं ब्रह्मद्वारं पिधाय सहस्रदलकमलांतःस्थितं बिंदुमंडलं द्रावयंती अत
एव कुलयोषित्कुंडलिनीशक्तिः कुलं कुलमार्गे सुषुम्णामार्गे त्यक्त्वा तत्रैव बिंदुमंडले आस्थापय परं व
र्षणसुखं वर्षंति हि सततं सहस्रनाडीभुवर्षणं कुर्वंतीति शेषः सा कुंडलिनी पुनः स्वस्थानमेति
स्वाधिष्ठानं प्राप्य स्वपीतीति तात्पर्यं॥द्विवादीनां मंत्राणां स्थापनं वा कामरूपत्वाद्देवानां असं
एतन्मूहृत्योपस्थापनं

नासन्नेसेवार्थंघटेत॥ इममेवार्थंसंक्षेपेणाहभगवान्सदाशिवः॥ सुधाब्धौनंदनोद्यानेरत्नमंडपमध्यगां॥
बालार्कमंडलाभासंचतुर्बाहुंत्रिलोचनां॥ पाशांकुशौशरांश्चापंधारयंतीशिवांशिवां॥ ध्यात्वाचाहतंच
क्रंव्रतस्थः परमेश्वरीं॥ पूर्वोक्तध्यानयोगेनसंविद्ध्यानमाचरेदिति॥ अनेनक्रमेणकांचीदामेतिसु
धासिंधोर्मध्यइतिचश्लोकद्वयमेकीकृत्यव्याख्यातमित्यवगंतव्यं॥८॥ महींमूलाधारेकमपिमणि
पूरेहुतवहंस्थितंस्वाधिष्ठानेहृदिमरुतमाकाशमुपरि॥ मनोपिभ्रूमध्येसकलमपिभित्वाकुलपथं
सहस्रारेपद्मेसहरहसिपत्याविहरसि॥९॥ महींपृथ्वीतत्वंमूलाधारेगुदस्थानेसर्वाधारभूतंच
क्रंमूलाधारंइतितस्मिन्मूलाधारे॥ सर्वाधारोमहीयस्मान्मूलाधारतयास्थिता॥ तदभावेतुदेहस्य
पातःस्यात्कूर्मोपिवेत्ति॥ रुद्ररहस्येपृथिवीतत्वात्मकस्यमूलाधारस्याभावेदेहस्तूर्ध्वंगच्छेदधोवा
पतेदित्यर्थः॥ कंउदकंतत्वंअपिशब्दःस्वाधिष्ठानोक्तवह्निंसमुच्चिनोति॥ मणिपूरेमणिपूरचक्रे
यत्रस्थिताभगवतीमणिभिस्तत्स्वदेहंपूरयतिसदेशोमणिपूरःसमयिनामांतरपूजावसरेतन्नी
यकमलेनानाविधमणिगणखचितविभूषणार्पणंदेव्याःकर्तव्यत्वादितिरहस्यंहुतवहंअग्नित

५

॥३०॥

त्वं स्थितं प्रतिष्ठितं ॥ स्वाधिष्ठाने स्वाधिष्ठाननाम केच चक्रे भागयस्याः कुंडलिन्यास्वयमधिष्ठाय ग्रंथि
कर्तायस्थानं स्वाधिष्ठानं ॥ यथोक्तं योगदीपिकायां ॥ स्कंदग्रंथिरयं प्रोक्तः स्वाधिष्ठानाग्रसीमनीति ।
सौषुम्नमाधारचक्रस्योपरि स्वाधिष्ठानं वर्णनीयं तथापि आकाशादितत्त्वोत्पत्तिक्रमम वलंब्य क्रमे-
ण मणिपूरचक्रवर्णनं कृतमिति खलु संधेयं ॥ एतच्च तया ज्ञानचक्रमित्यादि श्लोकषट्कव्याख्यानावसरे
सम्यगुपवर्णितव्यं ॥ हृदि हृदयाकाशे अनाहतनाम निचक्रे ॥ अनाहतनादस्थानत्वात् अनाहतं
नामास्य मरुतं मरुत्तत्त्वं आकाशमाकाशतत्त्वं ॥ उपरि पूर्वोक्तानामुपरि विशुद्धचक्रे शुद्धस्फटिक
संकाशरूपत्वात् ॥ विशुद्धिर्नामास्य मनः मनस्तत्त्वं अपि शब्दः समुच्चयार्थः भ्रूमध्ये भ्रुवोरं
तराले आज्ञाचक्रे ॥ अत्र आङ् ईषदर्थे आज्ञा ज्ञानं ॥ ईषज्ज्ञानं यत्र जायते साधकानां भगवती वि
षयं प्रथमग्रंथिभेदनाति यतस्ततया भगवत्या आज्ञाचक्रे क्षणमात्रावस्थानात् ॥ साधकानां तडिल्ले
खारूपेणावभासनात् आज्ञाचक्रं नामास्य स्थितमिति सर्वत्रानुषज्यते ॥ एतत्सर्वं कुलपथं सु
षुम्णामार्गं भित्वा सहस्रारपद्मे सहस्रदलकमले सह मिलित्वा रहसि एकांते पत्या सदाशिवेन

विहरसे क्रीडसे॥ अत्रेत्थं पदयोजना॥ हे भगवति मूलाधारे महीं कं मणिपूरे हुतवहमपि स्वाधि
ष्ठाने हुतवहं हृदि मरुतं आकाशमुपरि मनोपि भ्रूमध्ये स्थितमिति व्यक्तिः अस्य येन सर्वत्रानु
शु षज्यते॥ सकलं कुलपथं भित्वा सहस्रारे पद्मे रहसि पत्या सह विहरसे॥ अत्रेदमनुसंधे
यं॥ मूलाधारस्वाधिष्ठानमणिपूरअनाहतविशुद्ध्याख्यानां नामकानि षट्कोणिरतानि पृथिव्यग्नि
जलपवनाकाशमनस्तत्वात्मकानि तानि च ... यानि तेषु चक्रेषु तन्मात्रतया स्थितानि॥ तन्मा
त्रास्तु गंधरूपरसस्पर्शशब्दात्मकाः आज्ञाचक्रे स्थितेन मनस्तत्वेन एकादशेंद्रियगणः संग
हीतः इत्येवं एकविंशतितत्वानि प्रतिपादितानि॥ पत्या सह रहसि सहस्रपत्रे विहरसि इत्यने
न तत्वचतुष्टयं सूचितं॥ तच्च मायाशुद्धविद्यामहेश्वरसदाशिवात्मकं तत्तत्वचतुष्टयमेवं मिलित्वा
पंचविंशतितत्वानि प्रतिपादितानि॥ तानि मायापर्यंतानि मायया युक्तत्वात् प्राकृतानि मायो
महेश्वरेण संयुक्ता सति तस्य जीवभावमापादयति॥ स जीवः प्राकृतलयपुंड्र विद्यानुसदा
शिवेन संयुक्ता सती सदाख्या नाम कलेति प्रवर्त्यते॥ अतो भगवती चतुर्विंशतितत्वाति

99

॥११॥

रिक्तः सदाशिवेन पंचविंशेन सार्द्धं विहरमाणा षड्विंशत्त्वमापन्ना परमात्मेति गीयते॥ एतदुक्तं भव
ति॥ सादाख्या कला पंचविंशेन सदाशिवेन मिलिता षड्विंशा भवतीति मेलनस्य तत्त्वांतरत्वात्॥ न चोभ
योर्मेलनमुभयात्मकं तस्य द्वैतो नो त्मकत्वात् तत्त्वांतरमेवेति रहस्यं॥ यत्तु श्रुतिवाक्यं॥ पंचविंशतिआ
त्मा भवतीति॥ तत्तु सदाशिवतत्त्वप्रतिपादनपरं॥ न मेलनपरमिति ध्येयं॥ ननु कथं बैंदवस्था
ने श्रीचक्रस्य मध्यस्थितं शिवचक्राणां चतुर्णामुपरि शक्तिचक्राणां पंचानां मध्यस्थानादवस्थित
त्वात् सहस्रारपद्मस्य तु शिरसि स्थितत्वात् सर्वेषामुपरि वर्तमानत्वात्तस्य बैंदवस्थानत्वं नोपप
द्यत इति चेत् न निरस्यतां भागवतमतिरहस्यं॥ चतुर्भिः शिवचक्रैः शक्तिचक्रैश्च पंचभिः॥ शि
वशक्तिमयं तंत्रं श्रीचक्रं शिवयोर्वपुरिति॥ शक्तिचक्राणि त्रिकोणाष्टकोणदशारद्वितयचतु
र्दशारकोणात्मकानि पंच शक्तिचक्राणि॥ शिवचक्राणि तु अष्टदलषोडशदलमेखलात्रितयभूपु
रत्रितयात्मकानीति॥ अतः शक्तिचक्राणां बाहुल्यतः शिवचक्राणि शिवशक्त्योर्वहिरायोगात्॥ ता
नि चक्राणि बिंदुरूपेण कंप्य शक्तिचक्रांतरस्थापितानि॥ अतएव बिंदुः शिवचक्रे चतुष्टयात्मक

॥१३॥

शक्तिचक्रेषु पंचसु व्यस्तुवानः समास इति शिवशक्त्योरैक्यमिति केचित्॥ अन्ये तु॥ बिंदुत्रिकोण
२ योरैक्यं अष्टकोणाष्टदलांबुजयोः दशार्धयुग्मचारदलांबुजयोः चतुर्दशारभूपुरयोरैक्यं अनेन प्रका
रेण शिवशक्त्योरैक्यमित्याहुः। अत्र बिंदुशब्देन शिवचक्रचतुष्टयप्रतिनिधिभूतो वर्तुलाकारो लक्ष्य
ते॥ तत्र तु चतुष्कोणमध्यवर्ती बिंदुः स तु सहस्रदलकमलांतर्गतः आधारस्वाधिष्ठानदशदलप्रकृति
भूतः शिवशक्तिमेलनाविष्टतनुः सादाख्यं षड्विंशं तत्वं तेन सह नादबिंदुकलानामैक्यं नास्ति तस्य
नादबिंदुकलातीतत्वात्॥ एतच्च पुरस्तात्प्रपंचयिष्यते॥ अत एव सहस्रदलकमलांतर्गतचंद्रमंड
लमध्यवर्ती सुधासिंधुरेव भगवत्या विहारस्थानमिति॥ सहस्रारे पद्मे सह रहसि पत्या विहरसि
इति सुधासिंधोर्मध्य इति च श्लोकद्वयस्यैक एवार्थ इति रहस्यं॥ इममेवार्थं भैरवयामले चंद्रज्ञा
नविद्यायां शिव आह पार्वतीं प्रति॥ चतुर्भिः शिवचक्रैश्च शक्तिचक्रैश्च पंचभिः॥ नवचक्रैश्च संवि
द्धं श्रीचक्रं शिवयोर्वपुः॥ त्रिकोणमष्टकोणं च दशकोणद्वयं तथा॥ चतुर्दशारं चैतानि शक्तिचक्रा
णि पंच च॥ बिंदुश्चाष्टदलं पद्मं पद्मं षोडशपत्रकं॥ चतुरस्रं च चत्वारि शिवचक्राण्यनुक्रमात्॥

त्रिकोणमष्टदलं लिङ्गं ममारे स्याद्दलांबुजे।। द्वादशारयोः षोडशारं भवेद्धृद्भुवनास्त्रके।। नैर्ऋतानामपि चक्रा
णां च कोणानां च परस्परं।। अविनाभावसंबंधं यो जानाति स चक्रवित्।। त्रिकोणमष्टकोणं च दशकोण
द्वयं तथा।। मन्वस्रं चतुष्कोणं कोणचक्राण्यनुक्रमात्।। मूलाधारं तथा स्वाधिष्ठानं च मणिपूरकं।। अ
नाहतं विशुद्धाख्यमाज्ञाचक्रं विदुर्बुधाः।। तदाधारस्वरूपाणि कोणचक्राणि पार्वति।। त्रिकोणरूपि
णी शक्तिः बिंदुरूपः शिवः स्मृतः।। अविनाभावसंबंधस्तस्माद्बिंदुत्रिकोणयोः।। इतः पूर्वं अधोमुखं

तृतीयो ।।३२।।

चतुःकोणत्रिनवसमाप्तकं बिंदुरिति शक्तिः।। शिवच[illegible]णि बाह्यानि तद्रूपेणावस्थितानीसेवयेदिति।। य
द्वा कौलमतानुसारेण।। अधोमुखानि चत्वारि त्रिकोणानि शिवात्मकानि।। ऊर्ध्वमुखानि पंच त्रिकोणा
नि शक्त्यात्मकानि।। कौलमते संहारक्रमेण लेखनेन यत्त्रिकोणात्मकं श्रीचक्रं एतत्सर्वं चतुर्भिः
श्रीकंठैरित्यादिश्लोकव्याख्यानावसरे चक्रद्वयमपि सहस्रारे पद्मे सहरहसि पद्मे वा विहरसि इत्य
त्रापि रूपं च क्रैक्यत्वात्।। उभयत्र योगितया अत्रैव चक्रं कथितं।। विशेषस्तु तत्रैवावधार्यः।।९।।
सुधाधारासारैश्चरणयुगलान्तर्विगलितैः प्रपंचं सिंचन्ती पुनरपि रसाम्नायमहसः।। अवाप्य स्वां
भूमिं भुजगनिभमध्युष्टवलयं स्वमात्मानं कृत्वा स्वपिषि कुलकुंडे कुहरिणि।।१०।। सुधाधाराऽमृ

।।३२।।

तस्य धाराणामासारैः संपातैः अत्र आसारशब्द एव धारासंपातवचन इति धाराशब्दसाहचर्या
दासारशब्दः संपातमात्रवृत्तिन पौनरुक्त्यं ॥ यद्वा सुधाया आधारभूताः आसारा धारासंपाता[illegible]श्च स्तै
रणयुगलांतर्विगलितैः चरणयुगलस्य पदारविंदस्य द्वितयस्य अंतर्विगलितैः मध्यप्रदेशात्स्य
न्दितैः प्रपंचं द्विसप्ततिसहस्रसंख्याकनाडीमार्गान् सिंचंती सेचयंती पुनरपि सेचनानंतरमपि र
साम्नायमहसः स्वं द्रावक कोऽत्रात्र रसाम्नायमहः शब्दो यामलेषु कलानिधौ प्रसिद्धः ॥ रसस्य सुधा
याः आम्नायो गुणना आधिक्यमिति यावत् ॥ तदात्मकं महः कांतिर्यस्य सः रसाम्नायमहा इति
युसत्तिः अवाप्य प्राप्य स्वां स्वकीयां भूमिं आधारचक्रं भुजगनिभं सर्पसदृशं अध्युष्टवलयं अ
र्धत्रिवलयं कुंडलिनी विशेषणं स्वं निजमात्मानं कृत्वा स्वस्वरूपमवलंब्य विश्वास्य स्वपिषि निद्रासि कुल
कुंडे कुः पृथिवी तत्त्वे लीयते यत्र तत्कुलं आधारचक्रं लक्षणया सुषुम्नामार्गः कुलमित्युच्यते ॥
अतएव कौलाः कुलपूजकाः आधारसेवकाः इति ॥ कौलत्वं तेषामिति रहस्यं तदुपरत्र स्फार्यते ॥
कुलमार्गस्य सुषुम्नाया मूलेपद्मकमलं कंदाकारं आधारकंदः स एव कुंडस्तस्मिन् कुहरिणि कम

९२

लकंदमध्यस्थितचिच्छिद्रं तु स्वयंछिद्रं यस्य कुंडस्य तत्तथोक्तं॥ आधारकंदमध्यस्थितेन सुषुम्णा
मध्यबिसतंतुनिभा तत्र कुंडलिनी शक्तिर्वर्ततइति तात्पर्यं॥ अत्रेत्थं पदयोजना॥ हे भगवति चर
णयुगलांतर्विगलितैः सुधाधारासारैः प्रपंचं सिंचंती रसाम्नायमहसः सकाशात् स्वां भूमिं पु
नरप्यवाप्य भुजगनिभमध्युष्टवलयं स्वमात्मानं कृत्वा कुहरिणि कुलकुंडे स्वपिषि॥ अत्रेदम
नुसंधेयं॥ शिरःस्थितं चंद्रमंडलं सर्वयोगशास्त्रसिद्धं॥ तत्तु समयिनां मते श्रीचक्रमेव चंद्र
मंडलं षोडशकलात्मकत्वात् श्रीविद्यायाः प्रतिपदादिषोडशदिनेषु कलाक्षयवृद्धियोर्वक्ष्य
माणत्वाच्च चंद्रमंडलमेव॥ तदेवं बाह्यस्थितमपि चंद्रमंडलं श्रीचक्रमेवेति सुभगोदयव्या
ख्याने निदर्शितं तत्सुमहारहस्यं॥ अतश्च शिरःस्थितसहस्रदलकमलांतर्गतश्रीचक्रा
त्मकचंद्रबिंबमध्यस्थिता या भगवत्यास्ताच्चरणकमलनिर्गलज्जलैः सुधामयैः साधक
स्य सकलशरीरं संप्लाव्य पुनर्भुजगरूपेणाधारकुंडं प्रविश्य सुषुम्णामवष्टभ्य सा भगवती
स्वपितीति॥ यथोक्तं वामकेश्वरतंत्रे॥ भुजंगाकाररूपेण मूलाधारं समाश्रिता॥ शक्तिः कुं

॥१३॥

शक्तिः कुंडलिनी नाम बिसतंतुनिभा शुभा ॥ शुभा क्षणप्रभा विद्युन्निभेत्यर्थः ॥ मूलकंदं फणा
ग्रेण जं कमलकंदवत् ॥ मुखेन पुच्छं संगृह्य ब्रह्मरंध्रं समाधिना ॥ पद्मासनगतः स्वस्थो गुदमा
कुंच्य साधकः ॥ वायुमूर्ध्वगतिं कुर्वन् कुंभकाविष्टमानसः ॥ वाय्वाघातवशादग्निः स्वाधिष्ठान
गतो ज्वलन् ॥ ज्वलनाघातपवनाघातैरुन्निद्रिताहिराट् ॥ रुद्रग्रंथिं ततो भित्वा ब्रह्मग्रंथिं भिनत्त्यतः ॥
ब्रह्मग्रंथिं च भित्वैव कमलानि भिनत्ति षट् ॥ सहस्रकमले शक्तिः शिवेन सह मोदते ॥ सावावे
स्थोपरा ज्ञेया सैव निर्वृतिकारणमिति ॥ श्रुतिरपि ॥ भगवत्सांघ्ररणांबुजसुधाधारासारैः
प्रपंचसेचनं प्रतिपादयति ॥ तथाहि ॥ लोकस्य द्वारमर्चिमत्पवित्रं ॥ ज्योतिष्मद्भ्राजमानं महस्व
त् ॥ अमृतस्य धारा बहुधा दोहमानं चरणं नो लोके सुधितां दधातु ॥ अस्यार्थः लोकस्य स्वनि
वासस्थानस्य सायुज्यस्य सार्ष्ट्या देवीब्रह्मलोकादेर्वा द्वारं तत्प्रापकमित्यर्थः ॥ अर्चिमत् अ
र्चिः शिखा मयूखाः अस्य संतीति अर्चिमत् अर्चिष्मदित्यर्थः ॥ छांदसः सकारलोपः मयूखाः कि
रणाः पवित्रं स्वयमतिशुद्धं अन्यशुद्धिहेतुश्च ज्योतिष्मद्भ्राजमानं महस्वदिति साम्रेडनं अर्चि

मत्वस्तु रत्यर्थः॥ षट्चक्रं त्रिखंडमात्तकाचक्रं सोमसूर्यानलात्मकमिति वक्ष्यते॥ अर्चिष्मदित्यस्मिन्ने
न आग्नेयानि अचैरवि अर्थान्तरन्यासं कथ्यंते॥ ज्योतिष्मदित्यस्मिन्ने न ऐंदवानि षड्त्रिंशदुत्तरशतानि
ज्योतींषि विनिर्दिश्यंते॥ महस्वदित्यस्मिन्ने न भानवीया द्वाशत्तरशतं नमहांसि किरणाः संगृह्यंते॥ एतच्च
क्षितौ षट्पंचाशद्दित्यादिश्लोकव्याख्यानावसरे निपुणतरमुपपादयिष्यामः॥ अमृतस्य
धाराबहुलप्रवाहान्बहुधाप्रकारेण द्विसप्ततिसहस्रनाडीमार्गेषु दोहमाने किरत॥ चंद्रमंड
लगलत्सुधाप्रवाहान्स्वनिर्णजनपवित्रितान्वर्षदित्यर्थः॥ चरणं चरणशब्दो नपुंसकः॥ ॥१५॥
पदं घ्रिश्चरणोस्त्रियामित्यभिधानात्॥ नः अस्मान्सामकान्लोकप्रपंचे सुधितान्लमा
न॥ पद्मासज्ञानबुद्धिप्रकाशान्सुधियः कृत्वा दधातु पुष्णातु॥ नत्वयं मंत्रः अबहुलासुद
षिपुयोस्यत्वेनाम्नातः मंत्राणां समवेतार्थप्रकाशशीलत्वात्स्मरणाय स्याहे स्वर्थोपलितमा
दस्यैव देवतात्वात् एवमन्वाख्यानं न संगच्छत इति चेत्न उच्यते॥ अत्राहुर्भगवत्पादाः॥ सि
द्धमन्त्रं परिसज्य भिक्षामटति दुर्मतिरिति॥ अयमाशयः॥ वेदान्तस्य सकलस्य सिद्धफलदानसम

र्थत्वेनसर्वविद्वदभिमतेनच्छद्व्यवहारावसितत्वात्क्तिकलोकस्यद्वारभिसादिविशेषणविशिष्ट
सात्भगवत्याश्चरणमेयच्चरणायस्वाहेस्तत्रचरणशब्देनाभिधीयतइति॥१०॥पूर्वश्लोकेइंदुम
ण्डलात्मकंश्रीचक्रमिस्फक्तंतदेवश्रीचक्रमुपदिशति॥चतुर्भिः श्रीकंठैः शिवयुवतिभिः पंच
भिरपिप्रभिन्नाभिः शंभोर्नवभिरपिमूलप्रकृतिभिः॥चतुश्चत्वारिंशद्वसुदलकलाश्चत्रिव
लयत्रिरेखाभिः सार्धंतवशरणकोणाः परिणताः॥११॥चतुर्भिश्चतुःसंख्यासंख्येयैः श्रीकंठैः
श्रृणातिहिनस्तीतिश्रीर्विषंकंठेयस्यासौश्रीकंठोहरः तेकोणाअपिश्रीकंठाः तदात्मकत्वान्नय
ब्दस्यपरत्वात् अतएवबहुवचनसिद्धिः श्रीकंठात्मकैरित्यर्थः॥शिवयुवतिभिः शक्तिभिः पूर्वव
द्बहुवचनसिद्धिः शक्त्यात्मकैरित्यर्थः॥पंचभिः पंचसंख्यासंख्येयैः अपिशब्दोभेदे॥प्रभिन्ना
भिः प्रकर्षेणभिन्नाभिः प्रकर्षस्तुशिवशक्तिक्रमव्यवहारस्थानस्याविद्यमानत्वात् एतच्चस
मयमतेनसृष्टिक्रमेणपंचकचक्रलेखनेऽयंकौलमतेनसंहारक्रमेणनवयोनिचक्रलेख
नेऊर्ध्वाधोमुखत्वयावस्थितैः प्रभिन्नत्वंतेषांपृथक्पृथक्स्थितत्वमित्यर्थः॥शंभोरितिपंचमी

९५

॥३५॥

संपुटमाले न चत्वारः श्रीकंठाउ अंते॥ नवभिः नवसंख्यैः अपि दा ब्दो वक्ष्यमाण बाकुल्यंसंतु छिनोति॥
मूलप्रकृतिभिः प्रपंचस्य मूलकारणैः अत एव तेषां योनित्वव्यपदेशः नवयोनयो नवधात्वा
त्मिकाः॥ तथा चोक्तं कामिकायां॥ योगस्य प्राप्तमदास्थित्वा नवः शक्तिमूलकाः॥ मज्जाशुक्रप्रा
णजीवधातवः त्रिवमूलकाः॥ नवधातुरयं देहो नवयोनिसमुद्भवः॥ जीवधातुर्नाम जीवाधिष्ठा
नत्वान्नूओ जो धातुरेव जीवधातुरित्युच्यते॥ यथोक्तं वागभट्टेन॥ रसादिशुक्रान्तानां धातूनां
प्रसादः श्रेष्ठो जीवाधारस्तेजो धातुरोज इति॥ दशमी धातुरेके च परा शक्तिः तदीश्वरी दशमी यो
निर्वै देवं संस्थानं तदीश्वरी तस्य देहस्येत्यर्थः॥ एवं पिंडोऽस्तु सन्नवैन तद्ब्रह्मांडोऽस्तु द्वयो॥ पंच
भूतानि शक्तीनि मायादीनि शिवस्य तु॥ माया च शुद्धविद्या च महेश्वरसदाशिवौ॥ पंचविंश
ति तत्त्वानि तत्रैवांतर्भवंति ते॥ एकादशेन्द्रियाणि शब्दादितन्मात्रास्तच्छब्देन परामृश्यंते॥ त्रिव
र्गात्मस्यात्मकं विद्धि जगदेतच्चराचरं॥ चरं पिंडं अचरं ब्रह्मांडं इत्यर्थः॥ केचित्तु एकपंचाशत्तत्त्व
त्वान्याहुः॥ तथा हि॥ पंचभूतानि तन्मात्राः पंचपंचकं चेंद्रियाणि च॥ ज्ञानेंद्रियाणि पंचैव तथा कर्मेंद्रि
याणि च॥ त्वगादिधातवः सप्त पंच प्राणादिवायवः॥ मनोबुद्धिरहंकृतिः ख्यातिर्गुणाः प्रकृतिपूरुषौ॥

॥३५॥

रागोविद्याकलाचैवनियतिःकालएवच॥मायाचशुद्धविद्याचमहेश्वरसदाशिवौ॥शक्तिश्चशिवतत्वं
चतत्वानिक्रमशोविदुरिति॥एतानिएकपंचाशत्तत्वानिवायव्यसंहितादिशैवपुराणेषुसर्वेषुप्रति
पादितानि॥अस्यार्थः॥पंचभूतानिपृथिव्यप्तेजोवाय्वाकाशात्मिकानिकार्यकारणरूपेणावस्थि
तानिगंधादितन्मात्रपंचकंपृथिव्यादीनांकारणभूतं॥ज्ञानेंद्रियाणिश्रोत्रत्वक्चक्षुर्जिह्वाघ्राणा
त्मकानि॥कर्मेंद्रियाणिवाक्पाणिपादपायूपस्थात्मकानि॥धातवःत्वगसृङ्मांसमेदोस्थिम
ज्जाशुक्राणि॥वायवःप्राणापानव्यानोदानसमानाः॥मनःमननात्मिकाशक्तिः॥अहंकृतिरहंका
रजनिकाशक्तिः॥कालःसंहारशक्तिः मायाऐंद्रजालिकादिज्ञानं॥शुद्धविद्यामोक्षकज्ञानं॥महेश्व
रःजौरेगुणाविष्णुःसृष्टिकर्ता॥सदाशिवःसृष्टिस्थितिकर्ता॥शक्तिर्महेश्वरसदाशिवयोर
क्षर्णैशक्तिः चकारात्कालात्मिकासंहरणशक्तिश्च॥शिवमनंतेषुशुद्धबुद्धमुक्तस्वरूपंएतेषुतत्वेषु
*सर्जनं*कतिचनतत्वानिकुत्रचिदंतर्भवंति॥त्वगादिसप्तधातवःभूतेष्वंतर्भवंति॥प्राणादि
वायवःवायावंतर्भवंति॥अतोभूतेष्वेवतेषामंतर्भावः॥अहंकारस्यमनस्यंतर्भावः॥ख्यातेर्वि

९६

वे

॥३६॥

थायामंतर्भावः॥ गुणानां प्रकृतावंतर्भावः प्रकृतेस्तु शक्तावंतर्भावः पुरुषस्य महेश्वरेंतर्भा
वः कलायाः शुद्धविद्यायामंतर्भावः नियतेस्तु शक्तावंतर्भावः कालेमहेश्वरसदाशिवेअंत
र्भावः॥ रागस्तु शुद्धविद्यायामंतर्भावः॥ शिवतत्वेस्य सदाशिवतत्वेभाव इति तत्वानि पंचविंश
तिरेवं पंचभूतानि तन्मात्रपंचकं पंचज्ञानेंद्रियाणि पंचकर्मेंद्रियाणि मनस्तत्वं मायाशुद्धविद्या
महेश्वरसदाशिवाशक्तिकानि चत्वारि एतानि पंचविंशति तत्वानि सर्वसंमतानि श्रुत्यनुगृहीतत्वा
त् तथा च श्रुतिः॥ पंचविंशआत्माभवतीति॥ अतश्च षड्विंशतत्वानीत्यादि तत्वविकल्पः श्रो
त्रानुसारेण पंचविंशतितत्वपरस्तु संक्षेपं॥ अथ सर्वतत्वातीतं शिवशक्तिसंपुटं तस्मादे
वजगदुत्पत्तिः तथोक्तं सुभगोदये॥ परोपि शक्तिरहितः शक्तः कर्तुं न किंचन॥ शक्तः स्यात्पर
मेशानि शक्त्यायुक्तो भवेद्यदि॥ तत्र वक्तव्यमस्ति तत्तु सुभगोदयव्याख्यानावसरे निपु
णतरमुपपादितमस्माभिरिति॥ अलमतिविस्तरेण प्रकृतमनुसरामः॥ चतुश्चत्वारिंश
द्वृत्तसंख्याकाः वसुदलकलाश्रविलयत्रिरेखाभिः षत्रिंशत्तेन च वसुशब्देन अष्ट

स्य

॥३६॥

त

स

संख्यालक्ष्यतेअतःकलासंख्याषोडशदलंकलाःषोडशातेनकलासाम्येनषोडशसंख्यायुक्तं
तेअष्टसाम्येनदलंलक्ष्यतेअतःकलासंख्याषोडशदलमित्यर्थः त्रिवलयंत्रयाणांवलयानां
समाहारस्त्रिवलयंत्रिमेखलमित्यर्थः त्रिरेखाःप्राकारवलयरेखाःभूपुरत्रयमित्यर्थः
एतेनभूपुरत्रितयंचतुर्दिक्षुद्वारयुक्तं॥तदुक्तं॥विंदुत्रिकोणवसुकोणदशारयुग्ममन्व
स्त्रनागदलसंयुतषोडशारं॥वृत्तत्रिभूपुरयुतंपरितश्चतुर्द्वाःश्रीचक्रमेतदुदितंप
रदेवतायाः॥श्रुतिरपि॥चतुर्द्वारागमंतासंहार्येनगरंनवंति॥अस्यार्थः॥चतुर्द्वाःचतु
र्द्वारमित्यर्थः॥छांदसोवर्णलोपश्च अहारागमंअहारैःआकारवलयैःत्रिभिरगमंदुर्ग
मंतामीमानिभूतानिभगवतितवतेनगरंपुरंश्रीचक्रात्मकंसंहार्यसंहारकरमित्यर्थः॥
पृथिव्यादिमहाभूतानितत्त्वानितत्रैवप्रलीयंतइतितात्पर्यं॥कश्चिदेवंव्याचष्टतोसंहा
र्यंसंहारक्रमेणलेखनीयमिति॥तत्रकौलमतएवसंहारक्रमेणचक्रस्यलेखनी
यतादिति॥प्रकृतमनुसरामः ताभिःसार्द्धंसहतवभवसाः द्वारणकोणाःद्वारणगृहवेद

॥३८॥

वेमंदिरं च कोणाश्चेति द्वंद्वसमासः॥ ततः कोणाश्चतुश्चत्वारिंशदित्यर्थः॥ ननु बिंदुत्रिकोणेन्या
दिक्रमेण त्रिकोणबिंदुभ्यां योगे षट्चत्वारिंशत्कोणाः॥ बिंदुपरित्यागे पंचचत्वारिंशत्कोणा इति
चेत्॥ सत्यं प्रस्तारवशात् त्रिकोणस्य अधःस्थितं कोणद्वयं अष्टकोणांतर्गतेन तन्मध्ये कोणास्त्रि
चत्वारिंशदेवेति शरणेन सार्द्धं कोणा इति द्वंद्वसमासगत्या व्याख्यानं॥ यद्वा त्रयश्चत्वारिंशदि
ति पाठांतरं तत्र स्पष्ट एवार्थः॥ परिणताः परिणामं प्राप्ताः॥ अयमर्थः त्रिकोणाष्टकोणदश
कोणयुगलचतुर्दशकोणेषु त्रिविचक्राणि अष्टदलषोडशदलमेखलात्रितयभूपुरत्रयात्म
कानि चत्वारि त्रिकोणवसुदलं वसुकोणषोडशदलं मिश्रारे मेखलात्रितयं भूपुरत्रयं भुवनास्र
कं अंतर्भूतं परिणतमित्युक्तमेतत्॥ एतच्च पूर्वं प्रतिपादितं॥ अथेत्थं पदयोजना॥ हे भगव
ति चतुर्भिः श्रीकंठैः शंभोः सकाशात्प्रभिन्नाभिः पंचभिः श्रीयुवतिभिः नवभिरपि मू
लप्रकृतिभिः तच्चशरणकोणाः वसुदलकलास्त्रवलयत्रिरेखाभिः सार्द्धं परिणताः
संतश्चतुश्चत्वारिंशदादिनि॥ अत्रेदमनुसंधेयं॥ अत्र चक्रे अष्टाविंशतिमर्मस्थानानि

॥१७॥

संधयस्तु चतुर्विंशतिः ॥ ननु मर्माणि चतुर्विंशतिरेव चेति ॥ उच्यते ॥ अष्टदलषोडशारमे
खलात्रयभूपुरत्रयाणां त्रिवृच्चक्राणां त्रिरेखासंगमस्थानलाभायेपि शाचनिकीमर्मसं
ज्ञा ॥ यथोक्तं चंद्रज्ञानविद्यायां ॥ मन्वस्रद्विदशाराष्टकोणेषु च चतुष्टयं ॥ अष्टाविंशति
मर्माणि चतुर्विंशति संधयः इति अस्यार्थः ॥ चतुर्दशकोणदशारयुग्मअष्टकोणेषु त्रि
रेखासंगमस्थानगणनायां चतुर्विंशतिमर्मस्थानानि यत्नचतुष्टयेन त्रियच्चक्रासमे
न सार्द्धमष्टाविंशतिरिति ॥ एतत्सर्वं चक्रलेखनाज्ञाने ज्ञातुं दुःशकमिति चक्रलेखनप्र
कारो निरूप्यते ॥ स च प्रकारः सृष्टिक्रमेण संहारक्रमेण चेति ॥ संहारक्रमेण लेखनं कौ
लमार्ग एव तथापि नवयोनिपरिज्ञानार्थं स प्रकारो निरूप्यते ॥ संहारक्रमेण तावत्पु
रतो यत्नमालिख्य यन्नमध्ये नयरेखा लिखित्वा पश्चिमरेखाग्रांताभ्यां त्रिकोणमुत्पाद्य
स्वापेक्षया पश्चाद्रेखया योजयेत् ॥ एवं प्राग्रेखाग्रांताभ्यां त्रिकोणमुत्पाद्य स्वापेक्षया
सम्मुख्या योजयेत् पश्चिमद्वितीयरेखाग्रांताभ्यां त्रिकोणमुत्पाद्य स्वापेक्षया अग्रम्या

॥३८॥

योजयेत्॥ आग्निहुतीयरेखाग्रांताभ्यांत्रिकोणमुत्साद्य स्वापेक्षयाअष्टम्यायोजयेत्॥ ततः प्रा
च्यपश्चिमरेखाभ्यांत्रिकोणमुत्साद्य स्वापेक्षयापंचम्यायोजयेत्॥ एवं प्राग्रेखाग्रांताभ्यांत्रिको
णमुत्साद्य स्वापेक्षयापंचम्यायोजयेत्॥ मध्यस्थितातिरश्चरेखाग्रांताभ्यांत्रिकोणमुत्साद्य
स्वापेक्षयातृतीययारेखयायोजयेत्॥ एवंचतुर्विंशतिमर्माणिचतुर्विंशतिसंधयः नव
योनिचक्रमेतत्कौलमतरहस्यं॥ सृष्टिमस्तुसमयमार्गः सच निरूप्यते आदौत्रिकोणमा
लिख्यमध्येबिंदुनिक्षिप्य बिंदोरूप × कं × रित्रिकोणंलिखित्वात्रिकोणांतरं प्रागग्रेविलिखितं
स्यप्रथमकोणाग्रेत्रिकोणांतरंपश्चिमाभिमुखंलिखेत्॥ एवमष्टकोणंचक्रमुत्पन्नं एतस्मा
देवदशारमुत्सादयेत्॥ तद्यथा॥ अष्टकोणप्राच्यपश्चिमरेखापार्श्वद्वयमुत्साद्यविदिग्गत
मर्मस्थानेभ्यश्चतुर्भ्यश्चतुरस्त्रिकोणानुत्साद्य अष्टकोणकोणगतयोनेरुपरिदक्षिणोत्त
रायतरेखापार्श्वद्वयमुत्साद्यविदिग्गतमर्मस्थानेभ्यश्चतुर्भ्यश्चतुरस्त्रिकोणानुत्साद्य अ
ष्टकोणकोणगतयोनेरुपरिदक्षिणोत्तरायतरेखाग्रेणाग्निकोणत्रिकोणमुयोजयेत्॥ एवंप
श्चिमतोयोजयेद्दशारंभवति॥ एतस्माद्देवदशारात्पुनर्द्वादशारमुत्सादयेत्॥ एत

॥४८॥

तर

स्मादेव दक्षारात्स्य चतुर्द्वारमुत्सादयेत्॥ तद्यथा॥ प्रथमं द्वारं पूर्वपश्चिमरेखाभ्रांताभ्यां
षट्कोणमुत्सादयेत् षट्कोणगतमर्मस्थानात्मध्यचतुर्थं स्थितिकोणचतुष्कं साधयेत् ततउपरिस्थि मु
स्थितमर्मचतुष्टयात् दक्षारन्यायेन त्रिकोणचतुष्कमुत्साद्य पश्चात्पश्चिमरेखमेलयेत्॥ एवं त्र
यश्चत्वारिंशत्कोणाश्चतुर्विंशतिसंधयश्चतुर्विंशतिमर्माणि इति॥ एतत्समयमतरहस्यं॥
अस्मिन्नूचक्रे त्रिकोणमूर्ध्वमुखं लेखनीयं॥ कौलचक्रे त्रिकोणमध्यगतो बिंदुः समयचक्रे
तु चतुष्कोणमध्यगतो बिंदुः॥ कौलचक्रे कोणसंख्या नास्ति नव त्रिकोणात्मकत्वात्॥ नवा
नां त्रिकोणानां मेलने मर्मसंधयः एवोत्पद्यंत इति महद्रहस्यं उभयचक्रे साधारणं॥ अनंतरमूर्ध्व
मष्टदलं पद्मं ततः षोडशदलपद्मं ततो मेखलात्रितयं ततश्चतुर्द्वारयुक्तं भूपुरत्रितयमि
ति श्रीचक्रोद्धारो विज्ञातव्यः॥ अत्र मेरुप्रस्तारः कैलासप्रस्तारः भूप्रस्तारास्त्रयः संभवं
ति॥ तत्र मेरुप्रस्तारो नाम नित्याषोडशिकात्म्यं॥ कैलासप्रस्तारो मातृकानादात्म्यं॥ भूप्र
स्तारो वशिन्यादिना तादात्म्यं॥ एतत्सर्वं चतुःशत्यां तत्त्वेरित्यादिश्लोकव्याख्यानावसरे निपु

१८

॥३९॥

णतरमुपपादयिष्यामः॥ अथ रहस्यनाम्नोर्विशेषमुक्तः॥ उभयोर्नाम मुनयः सर्वे चक्रसमा
श्रयाः॥ सेयमानाम्य चक्रविद्या देवगंधर्वपूजिता॥ अग्नीषोमात्मकं च चक्रमग्नीषोममयं जगत्॥ अ
ग्नावंतर्बभौ भानुरग्नीषोमरग्नीषोममयं स्मृतं॥ त्रिखंडमात्रकाचक्रं सोमसूर्यानलात्मकं॥ त्रि
कोणं बैंदवं सौम्यमष्टकोणं च वह्निभ्रकं॥ चतुर्दशारं वन्हेस्तु चतुरस्रं च भानुमत्॥ एतत्प्रसादादि
द्राद्यावसवोऽष्टौ मरुद्गणाः॥ येये समृद्धा लोकेस्मिंस्ते पुरा चक्रसेवकाः॥ पुरत्रयं च चक्रस्य सो
मसूर्यानलात्मकं॥ महालक्ष्म्याः पुरं चक्रं तत्रैवासौ तत्याज्ञायइति॥ इममेवार्थं श्रुतिरप्याह तैत्ति
रीयके अरुणोपनिषद्॥ इमानुकं भुवनासीषधामेत्यारभ्य ऋषिभिरदास्तम्भिरित्यंता॥ अरुणो
पनिषन्नाम अरुणायाः भगवत्याः प्रतिपादिका उपनिषत्॥ भद्रं कर्णेभिरित्यारभ्य तत्पश्चीपुण्या
भवतीत्यंता अरुणोपनिषत् अरुणामेव प्रतिपादयति॥ इममर्थं दृष्टवान् रुणकेतु ऋषिः श्रुत्यर्थ
स्तावतः॥ इमानुकं भुवनासीषधाम॥ अस्यार्थः उभयोनाम मुनयः परस्परं संगिरंते इमां चक्र
विद्यां नुकं वितर्के भुवनाभुवनानि सीषधेम अभवगच्छाम चक्रविद्यामुपाश्रित्य सैव भुवनान्यव
निष्ठ तद्दति वितर्के याम इत्यर्थः॥ यद्वा इमां चक्रविद्यां भुवनाभुवनानाम कृतया सीषधेम नुकंप

॥३९॥

छायां वितर्कं च समरः॥ इंद्रश्च विश्वे च देवाः॥ अस्य वाक्यार्थः स्पष्टः खेकविद्यामुपाश्रित्यैव यासत
द्रूपत्वमर्थतिरोधः॥ यत्तं च नस्तन्वे च प्रजो वाद्रिसेरिंद्रः सहस्रेषधानुः॥ अस्यार्थः॥ यत्तमग्निष्टोमादि
कं नः अस्माकं तन्वे च तनुं शरीराद्युपलीमिति यावत् प्रजां संतानं चकारात् सर्वाः संपदः आदित्यै
मरुद्गणैः इंद्रः सहस्राद्युवखेकविद्योपासनात्प्राप्तपरमैश्वर्यः॥ इंद्रश्च खेकविद्यामस्माकमुपदिश्य
दोषधातु संपादितवान् प्राप्तकाले लोहः॥ आदित्यैरिंद्रः सगणो मरुद्भिः॥ अस्माकं भूत्वा वितातन
नूतं॥ मं वद्भ्य स्यार्थः॥ पुत्रमित्रकलत्रादीनामविनाशरक्षकः भवंतु भवत्विति सर्थः॥ इंद्रएव अस्माकं
योगक्षेमसंपादक इति॥ आप्लव स्वप्रप्लवस्य॥ एवं भयम् खेकविद्यां प्रस्तुवंति॥ आपादमस्तकं
प्लवनं अमृतनिष्पंदसेचनं कुरु त्रकर्षेण प्लवनं द्विसप्तति सहस्रनाडीमार्गेषु आसेचनं कुरु॥
ओं ङीवभजमामुङः॥ ओं ङीपिंडे उं ब्रह्मांडे च द्विद्रसयांतः भवे पिंडांड रूपेण अस्मदीयेन ब्र
ह्मांडरूपेण बाह्येन भवदीयेन आभ्युत्थितेभवत्सायुज्यं देहीत्यर्थः॥ अजअवगाष मुडुर्मामवगाछ अ
जुगुप्सणे त्यर्थः॥ अजगतावितिधातोः रकारलोपश्छांदसः॥ सुखादिं दुःखनिधनं॥ अस्यार्थः॥
सुखमिति आदयतीति सुखादिः सुखसंपादकः इंदुश्चंद्रः वैदवस्थानगतः॥ खनिधनं॥ खं वैद

४०

॥२०॥

यस्थानमेवनितरांधनं यस्याः सातां॥पद्य॥सुखादीसुखप्रथमां सुखात्मिकां दुःखनिधनां दुःख
स्यनिधनं नाशो यत्रेति दुःखनिधनां अपरिज्ञातदुःखगं धामि स्यर्थः॥पद्य॥सुखादीत्रोभनेन
खेन इंद्रियेणमनसा आदौ आद्यामनोवेद्यामि त्यर्थः॥दुःखनिधनां दुःखानां दुष्टेंद्रियाणांच भु
रादीनामगोचरामिति॥प्रतिमुंचस्वस्वापुरं॥स्वाभगवंतीपुरंरंफांतः शब्दः प्रतिमुंचस्व अ
धितिष्ठ॥मरीचयः स्वायंभुवाः॥अस्यार्थः स्वयंभगवस्याः सकाशात्संभुवउत्पन्नाः मरीचयो
मयूखाः स्वायंभुवाः॥स्वार्थिकोण्॥सर्वाणिभूतान्याच्छयंतेतइति शेषः॥सूर्यचंद्राग्नीनां प्र
काशकत्वं स्वायंभुवमरीचिप्रसादादेवेति उत्तरत्रवक्ष्यते॥येशारीराण्यकल्पयन्॥अस्या
र्थः॥येमयूखाः षष्ठ्युत्तरत्रिशतसंख्याताः शारीराणिकालात्मकानिषष्ठ्युत्तरत्रिशतसंख्या
कानिदिनानितान्येवसंवत्सरः॥संवत्सरोवैप्रजापतिरितिश्रुतेः॥ते देहं कल्पयंतु॥तेमरी
चयः तेतवभगवत्याः देहं कल्पयंतु देहमाश्रयंतु देहशब्देन देहावयवश्चरणमुच्यते॥भव
च्चरणोत्पन्नाइत्यर्थः॥माचलेख्यास्मन्नीरीषत्॥तेतवख्याख्यातिः ज्ञानं मावनीरीषत्॥अ
स्मान्नमहातुभवद्विषयज्ञानमस्माकं सर्वदास्तिष्ठत्वित्यर्थः॥इतः परं पश्यपश्यकेचित्पाठवुष्ट

॥२०॥

तेखरमाणाः परस्परं संगिरंते ॥ उत्तिष्ठत मा स्वप्त अग्निमिछध्वं भारताः राज्ञः सोमस्य तृप्तासः सूर्ये
ण सयुजोषसः ॥ अस्यायमर्थः ॥ हे भारताः भायां भारूपायां ज्योतिरूपायां चक्रविद्यायामिति यावत् ॥
रताः उपासनारताः ॥ यद्वा भारत्याः सरस्वत्याः श्रीविद्याया उपासकाः सामान्ये विहितत्रस्य यस्य वि
शेषपथा विद्याज्ञारता इति ॥ उत्तिष्ठत उपासनोपक्रमं कुरुत ॥ मा स्वप्त अप्रमत्ता भवत ॥ अग्निमि
छध्वं स्वाधिष्ठानगताग्निं प्रज्वालयत राज्ञश्चंद्रस्य उभयासहितः सोमः चंद्रमंडलांतर्गतबैंद
वस्थानगतत्वाद्ध्याः चंद्रस्य सोमशब्दवाच्यत्वसिद्धिः तस्य चंद्रस्य निष्यंदैः तृप्तासः तृप्ताः
सूर्येण अनाहतचक्रविशुद्धचक्रयोर्मध्यस्थितेन सूर्येण सयुजा अग्निचंद्रमध्यवर्तिना सूर्थः
य द्वा सूर्येण सयुजा राज्ञा तृप्तास इत्यन्वयः ॥ कीदृशाः उषसः पूष्मायामयक्षेत्राः ॥ यद्वा उषसः
उषःकाले तस्मिन्काले एव भगवतीनिदध्यासनादेर्योग्यत्वात् ॥ इतः परं पूजासामग्रीमुपदिश
ति पञ्चभिः ॥ सुवासुवासाः ॥ सुवाद टंगः स्वस्थः सन् सुवासाः शुभ्रवस्त्राः ॥ इदं शुभ्राभरणमा
ल्यादीनामुपलक्षकं एवंविधः सन् पूजयेदिति शेषः ॥ श्री चक्रस्वरूपं नाचदाह ॥ अष्टाचक्रा

॥२१॥

नवद्वारा॥ अष्टकोणदशकोणद्वितयचतुर्दशकोणअष्टपत्रषोडशपत्रत्रिवलयरेखात्रयात्मका
नि अष्टौ चक्राणि यस्याः सा॥ अतएव नवद्वाराः नवचक्रानि द्वाराणि त्रिकोणरूपाणि यस्याः सा नवद्वा
रा॥ देवानां पूरयोध्या॥ देवानामिंद्रादीनां पूज्यत्वेन संबंधिनी पूः श्रीविद्यानगरं॥ यद्वा॥ द्व्यंतीति
देवाः पंचविंशतितत्वानि तेषां पूरधिष्ठानं॥ यद्वा॥ सूर्यचंद्राग्नीनां पूः सोमसूर्यानलात्मकत्वात्
श्रीचक्रस्य तस्य पुरत्रयसमष्टिरूपत्वात् पूरिरुच्यते सिद्धिरिति शेषं॥ अयोध्या॥ असा
ध्या मंदभाग्यानामिति शेषः॥ तस्यां हिरण्मयः कोशः॥ स्वर्गो लोको ज्योतिषावृतः॥ अस्या
र्थः॥ तस्यां पुरि श्रीचक्रमध्ये हिरण्मयः कोशः सहस्रदलकमलकोशादित्यर्थः॥ बिंदवस्था
ने सहस्रदलकमलकोशस्य विद्यमानत्वात्॥ तस्य कोशस्य ज्योतिषा स्वर्गो लोक आवृतः
ज्योतिर्लोकस्वर्गलोकादित्यर्थः॥ अथ पञ्चमपद्यके विद्योपासनायाः फलमाहुः॥ यो वै तां
ब्रह्मणो वेद अमृतेनावृतां पुरीं तस्मै ब्रह्म च ब्रह्मा च॥ आयुः कीर्तिं प्रजां ददुः॥ ब्रह्मणः ब्रह्म
स्वरूपायाभवेगेस्याः तां पूर्वोक्तां अमृतेनावृतां चंद्रमंडलगलत्पीयुषधारावृतां पुरीं श्रीच

॥२१॥

श्रीचक्ररूपां त्रिपुरायाः पुरं यो वेद ज्ञानपूर्वकमर्चनं करोति तस्मै विदुषे अर्चकाय ब्रह्म ब्रह्मस्व
रूपा भगवती ब्रह्मा च ब्रह्मस्वरूपो भगवान् चकार द्वयमुभयोर्मेलनं समुच्चिनोति ॥ मिलित
योरेव बैंदवस्थाने सहस्रारे सुधासिंधुमध्ये चिंतामणिगृहे निवासात् एतावुभौ आयुः श्रियं
कीर्तिं यशः प्रजां संतानं ददतुः दद्यातामित्यर्थः ॥ व्यत्ययो बहुलमिति वचनव्यत्ययः ॥ त्रिवर्गान्यो
स्तत्रैव निवासमाहुः ॥ विराजमानां हरिणीं यशसा संपरीवृतां ॥ पुरं हिरण्मयीं ब्रह्मा विवेशा
वपराजिता ॥ अस्यायमर्थः ॥ विभ्राजमानां अनंतकोटिसंख्याकः किरणैरिति शेषः ॥ प्रकाश
मानां ॥ हरिणीं हिरण्यवर्णां ॥ हिरण्यवर्णां हरिणीमिति श्रुतेः ॥ यशसा कीर्त्या सम्यक् परिवृतां
ये ये लोके कीर्तिमंतस्ते सर्वे भवं[...]तीप्रसादसमासादितकीर्तिमंत इत्यर्थः ॥ तां बैंदवीं पुरं
चिंतामणिगृहं हिरण्मयीं सुवर्णवर्णां श्रुतिरस्तै च ब्रह्मा सदाशिवः ब्रह्मासं शिवोऽस्तु सदाशि
वो मिति श्रुतेः ॥ पुल्लिंगब्रह्मशब्दसदाशिवशब्दयोरेकएवार्थः ॥ प्रतीतः विवेश प्रविवेश ॥ अ
पराजिता सा दाख्यचंद्रकला विशेषवाक्यद्वयेन उपयोः प्रयेशभेदप्रतिपादनं बैंदवे चिंताम

22

णिग्रहे सदाशिवः सर्वदा सन्निहितः अपराजिता कुंडलिनी शक्तिः षट्चक्राणि भित्वा भूयो भूयः प्र
विशतीति अमुमर्थं विज्ञापयितुं शिवशक्त्योस्तस्मिंश्चक्रे अवस्थितिप्रकारमाहुः ॥ पराङ् स
ज्ञामयी पराङ् स्त्री नाम शक्ती ॥ पराङ् अधोमुखी वक्रस्वरूपिणी शिवशक्त्योर्मध्ये शक्तिः अज्ञाम २२
यी जातिरहिता नामरहितानि सदुःखरहितानंदमयी सर्थः एतिवर्तते ॥ यद्वा अज्ञामयी ज्याभि
भिस्तेन पंचभूतानि लक्ष्यंते ॥ तेन तन्मयी न भवतीति अज्ञामयी मनस्तत्त्वादिमयी शिवचक्र
॥२२॥ स्य केचतुर्थो न्यासकेतिया यतः शिवयोनीनां बैंदवस्थानादधः अथाङ्मुखत्वपाद स्थानात् ॥२२॥
अनाशकी नाम्ना रहिता शक्तिचक्रात्मकपंचयोन्यात्मिका पराङ् अधोमुखी एतिशक्तियोनीनाम
पि शिवयोन्यपेक्षया अवाङ्मुखत्वात् एवं शिवयोनिशक्तियोन्योः परस्परमवाङ्मुखत्वं चक्रेले
खनक्रमादवगम्यते ॥ विदुषः फलमाहुः ॥ इह चामुत्र चान्वेति विद्वान्देवासुरानुभयान् ॥ दिव्यंत
इति देवाः एकादशेंद्रियाणि असुरा असवः प्राणाः प्राणादि पंचवायवः नोन्नराति आददत इति
पंचतन्मात्रा महदादयश्च उत्सं ते उभयान् उभयत्र देवासुरेषु अन्वितान् मायापुद्गविद्यामहेश्व
र सदाशिवान् यो विद्वान्पंचविंशतितत्त्वजातं विदित्वा शिवशक्तिसंपुटात्मकं पंचविंशतितत्त्वि

लक्षणं षड्विंशं तत्त्वं पस्तुवेत्ति स विद्वान् इह च इहलोके अमुत्र लोकांतरे च इज्ञातार तम्य त्रा
तू सार्ष्टि सालोक्य सामीप्य सारूप्य सायुज्यात्म रूपं पंच विषयामुत्त्याअन्वेति ॥ सुत्यते ॥ साष्ट्र्या
दि स्वरूपं तत्त्रपं चं पुरस्तात्त्रपं चयिष्यते ॥ अथ देवासुरोभय ज्ञान मा कुः ॥ यत्कुमारी मंद्रयते
यद्योषित्सति व्रता ॥ अरिष्टं यत्किंच क्रियते अग्निस्तदनुवेधति ॥ अयमर्थः ॥ कुंडलिन्यां ज्ञाते
रवस्था त्रयं विद्यते यद्यस्मिन् चक्रे कुमारी कुमारावस्था यत्र प्रथमं सुप्तोत्थिता मंद्रयते मं
द्रस्वरं करोति कुंडलिन्याः सर्पात्मकत्वात् सर्पो हि सुप्तोत्थाने मंद्रस्वरं करोति तद्वदित्यर्थः ॥
यद्योषिद्यस्मिन् चक्रे कुलयोषित् विहुग्रंथिपर्यंतं गत्वा रौतीति त्वोषः ॥ कुलयोषित् कुलं स्य
कारोति विद्वेषः प्रभेदनं इति सनत्कुमारस्य वचनात् ॥ यस्मिन् चक्रे पतिव्रता पसा सदाशिवेन
सार्द्धं सहस्रदलकमले विहरमाणा रिष्टं शुभाभावः इत्यभिधानात् तदन्यदरिष्टं शुभं अमृता
स्वाद इत्यर्थः यत्किंच क्रियते तत् स्वाधिष्ठानगताग्निः अनुवेधति सपर्यां करोति अतश्च अ
भ्यासवशात् वायुनाग्निं प्रज्वाल्य अग्निशिखानुविद्ध विलीन चंद्रमंडल गलत्पीयूषधारा सुभ

भवेत्सं च विंशति तत्युक्तिना परमेश्वरीति ज्ञातुं सुराः कमिस्युर्यदेशाः ॥ चक्रविद्योपासनं व
र्णिनामाश्रमिणां ज्ञानिनामज्ञानिनां च फलदायकमित्यभिधीयाहुः ॥ अस्तनासस्तनास्तभ्य
यज्वानोऽप्ययज्वानः ॥ स्वर्गं तेनापेक्षन्ते ॥ अयमर्थः ॥ अस्तनासः अपध्वाः अकुपितांतःक
रणकल्मषाद्द्यर्थः ॥ स्तनासः पक्वाश्च ॥ आज्यसेरसुगिरसुगागमः क्षपितांतःकरणकल्म
षाद्द्यर्थः यज्वानः यजनशीलाः त्रैवर्णिकाः आश्रमिणश्चे अयज्वानः अयज्वानः यागरहि
ताः शूद्रादयः ॥ तस्माच्छूद्राय ह्रेन वक्ष्यमाण इति श्रुतेः ॥ त्रैवर्णिकैकनियमनाधिकारजपयं
ज्ञाद्यग्निहोत्रादिपरा ॥ चक्रविद्योपासने शूद्रस्याप्यधिकारचोदना ॥ निषादस्थपतिवत् ॥
वैदिककर्मण्यधिकारसिद्धो न कोऽपि विक्षतिः ॥ यतः द्रणगतौ चक्रविद्यामयगच्छन्तः स्वः स्व
र्गं नापेक्षन्ते ॥ चक्रविद्योपासनव्यतिरेकेण देवतान्तरोपासनमनिष्टमाहुः ॥ इदं क्रमप्रिं च ये
विदुः त्रिकनाद्यसंयंति रात्रिभिः समुदीरिताः ॥ अस्माच्छ्लोकादमुष्माच्च ॥ अयमर्थः ॥ सुरा
सुरसुरव्यस्य वंदितचरणारविंदायाः सर्वभूतानां नयामिन्याः सर्वव्यापिन्याः जगदुत्पत्तिस्थि
तिलयहेतोश्चक्रविद्या अन्यत्वेन ये इदं अग्निं च कारा द्यमादिलो कपालान् एषि व्यादि

इति अचलीनः प्रेयालंकारो ध्वन्यते॥ लोके न कापि तुल्यवस्तुनः सद्भावात् स्वस्य स्वयमेव तु
ल्यमिति प्रतीतेः॥९२॥ नरं वर्षीयांसं नयनविरसं नर्मसु जडं तवापांगालोके पतितमनुधावंति
शतशः॥ गलद्वेणीबंधाः कुचकलशविस्रस्तसिचया हठात्त्रुट्यत्कांच्यो विगलितदुकूला युवतयः
॥९३॥ नरं मनुष्यमात्रं वर्षीयांसमतिवृद्धं नयनविरसं नयनाभ्यां विरसं काचकामलापटलादि
नयनदोषयुक्तं नर्मसु रतिकलासु जडमतिमूढं तव भगवत्याः अपांगालोके कटाक्षवीक्षणे पति
तं कटाक्षैकगोचरमित्यर्थः॥ अनुधावंति अनुधावमानाः शतशः शतसंख्याकाः शतशब्दः सं
ख्यातीतोपलक्षकः भूभुवः स्वर्लोकोपरिस्थिताः सर्वा इत्यर्थः॥ गलद्वेणीबंधाः गलंतो वेणीबं
धा यासां ताः कुचकलशविस्रस्तसिचयाः कुचकलशाभ्यां विस्रस्ताः सिचयाश्चेलांचला यासां
ताः हठात्त्रुट्यत्कांच्यः त्रुट्यंत्यः गलंत्यः कांच्यो रशनाकलापा यासां ताः विगलितदुकूलाः स्र
स्तनीवीबंधाः युवतयस्तरुण्यः॥ अत्रेत्थं पदयोजना॥ हे भगवति नरं वर्षीयांसं नर्मसु जडं त
वापांगालोके पतितं शतशः युवतयः गलद्वेणीबंधाः कुचकलशविस्रस्तसिचयाः हठात्त्रुट्य

९२

२४

॥२५॥श्री

कां स्मः विगलितदुकूलाः तादृशं नरं तव नामेनि मत्वेति शेषः ॥ अनुधावंति एतादृशा मादनप्रये
गाः सुखं विंदुकृत्वेत्यादि श्लोक व्याख्यानावसरे निपुणतरमुपपादयिष्यामः ॥ ८३ ॥ क्षितौ षट् पंचा
शद्द्विसमधिकं पंचाशदुदके हुताशे द्वाषष्टिश्चतुरधिकं पंचाशदनिले ॥ दिवि द्विः षड्त्रिंशन्मनसि
च तुःषष्टिरिति ये मयूखास्तेषामप्युपरि तव पादांबुजयुगं ॥ ८४ ॥ क्षितौ पृथ्वीतत्त्वे मूलाधा
रे षट्पंचाशत् षट्संख्योत्तरपंचाशत्संख्याकाः द्विसमधिकं पंचाशत् द्वाभ्यां समधिकं पंचाश
त् उदके उदकतत्त्वे मणिपूरस्थाने हुताशे वह्नितत्त्वे स्वाधिष्ठानचक्रे द्वाषष्टिः द्वौ च ष
ष्टिश्च द्वाषष्टिः विभाषा चत्वारिंशत्प्रभृतौ सर्वेषामिति सूत्रेण द्विशब्दादिकारस्य आकारः च
तुरधिकं पंचाशत् अनिले वायुतत्त्वे अनाहतचक्रे दिवि आकाशतत्त्वे विशुद्धचक्रे द्विः
षड्त्रिंशत् द्विरावृत्ति षड्त्रिंशत्संख्याकाः द्विसप्ततिसंख्याकाः इत्यर्थः मनसि मनस्तत्त्वे आ
ज्ञाचक्रे चतुःषष्टिरिति एवं प्रकारेण प्रसिद्धाः शास्त्रेषु आगमेषु स्वसंवेद्यत्वेन च योगिनां प्रसि
द्धाः संति तेषां मयूखानामप्युपरि सहस्रदलमध्यवर्ति चंद्रबिंबात्मके [illegible] पर नामके सु

॥२५॥

द्विः

धासिंधौतवभयस्याः पादांबुजयुगं एवं समयसंप्रदाय इति शेषः ॥ अत्रेत्थं पदयोजना ॥ हे भगवति
ये मयूखाः क्षितौ षट्पंचाशत् उदके द्विसमधिकपंचाशत् ॥ कृशानौ द्वाषष्टिः अनिले चतुरधिकपं
चाशत् हृदि विंशत्यधिकपंचाशत् मनसि चतुःषष्टिरिति तेषामुपरि तव पादांबुजयुगं वर्तते ॥ अत्र षट्पं
चाशदादिस्यादिसंख्याशब्दानां संख्येयपरत्वात् संख्येयानां मयूखानां बहुत्वेपि एकवचनांतत्व
मेव ॥ यदाह ॥ विंशत्याद्याः सदैकत्वे संख्याः संख्येयसंख्ययोः ॥ संख्यार्थे द्विबहुत्वे स्तां न तु संख्येय
इति नियमात् संख्येयानां मयूखानां नियमाश्रसक्तेः बहुवचनत्वं सिद्धं ॥ अत्रेदं तत्त्वं ॥ षट्पंचा
शदादिस्यादिसंख्यानां संख्येयविशेषणत्वेपि न शुक्लादिगुणतौल्यं ॥ यथाह पदमंजरीकारः ॥ विं
शत्यादयो गुणा न शुक्लादिभिर्गुणैः समानधर्माणो भवितुमर्हंति विंशत्यादयो हि तावत् पृथक् प्र
योगिषु द्रव्येषु वर्तंत इति व्यासज्यवृत्तयः शुक्लादयस्तु प्रत्येकं पर्यवसायिन इति ॥ अत्रेदमनि
हस्यं ॥ संख्येयपराणां संख्याशब्दानां बहुवचनेन षट्पंचाशत्तो मयूखा इति प्रामाणवत्रीस्फुरतर
सहस्रसंख्याभवेयुः ॥ अतो न विवक्षितार्थसिद्धिरिति अनियतफलमिति ॥ अत्रेदमनुसं
धेयं ॥ आधारस्वाधिष्ठानमणिपुरअनाहतविशुद्ध्याज्ञाख्यानां क्रमात्सकं श्रीचक्रं त्रिखंडं सोमसू

॥२६॥

र्यानलात्मकं मूलाधारस्वाधिष्ठानचक्रद्वयमेकं खंडं मणिपूरानाहतचक्रद्वयमेकं खंडं विशु
द्ध्याज्ञाचक्रद्वयमेकं खंडं ॥ अत्र प्रथमखंडोपरि अग्निस्थाने तद्देव रुद्रग्रंथिरित्युच्यते ॥ द्वितीय
खंडोपरि सूर्यस्थाने तद्देव विष्णुग्रंथिरित्युच्यते ॥ तृतीयखंडोपरि चंद्रस्थाने तद्देव ब्रह्मग्रंथि
रित्युच्यते ॥ सोमसूर्यानलात्मकं द्वयस्य परोहक्रमेणावगंतव्यं तत्र प्रथमखंडोपरि स्थितो व
न्हिः स्वज्वालाभिः प्रथमखंडमावृणोति ॥ द्वितीयखंडोपरि स्थितः सूर्यः स्वकीयैः किर
णैर्द्वितीयखंडमावृणोति ॥ तृतीयखंडोपरि स्थितश्चंद्रः स्वकलाभिस्तृतीयखंडमावृणो
ति ॥ आधारचक्रे महीतत्वात्मके वन्हेः षट्पंचाशज्ज्वालाः मणिपूरके उदकतत्वात्मके स्वोपरि
स्थिते द्विपंचाशज्ज्वाला एवमष्टोत्तरशतं वन्हेर्ज्वालाः सूर्यस्य अग्नितत्वात्मके स्वाधिष्ठा
ने द्वाषष्टिकिरणाः अनिलतत्वात्मके अनाहतचक्रे चतुःपंचाशत्किरणाः सूर्यकिरणानां
मणिपूरं विहाय स्वाधिष्ठानप्रवेशः सूर्याग्न्योरेकत्वात् सूर्यान्तर्भावादग्नेश्च ॥ स्वाधिष्ठान
मणिपूरयोस्तु सूर्याग्निस्थानयोर्मध्ये अग्निस्थाने सूर्यप्रवेशः सूर्यस्थाने अग्निप्रवेशः ॥
जगद्दहनाग्निश्यामनामकसंवर्तमेघात्मकसूर्यकिरणजनितवर्षोत्सवार्थं ॥ एतत्तु तडित्वंतं

॥२६॥

त्येत्यादिश्लोकव्याख्यानावसरे निपुणतरमुपपादयिष्यामः॥ एवं सूर्यस्य षोडशोत्तरं किरणा भवंति॥
चंद्रस्य कलाः विपत्तत्वात्मके विशुद्धिचक्रे द्विसप्ततिः मनस्तत्वात्मके आज्ञाचक्रे चतुःषष्टिः एवं चंद्रस्य
द्विरष्टाद्युत्तरशतं कला भवंति॥ यथोक्तं भैरवयामले॥ भैरवाष्टकप्रस्तावे॥ अष्टोत्तरशतं वन्हेः षोडशो
त्तरं रवेः॥ षट्त्रिंशद्युत्तरशतं चंद्रस्य च विनिर्णयः॥ एवं सोमसूर्यानलाः पिंडांडब्रह्मांडे आवृत्य
वर्तंते॥ पिंडब्रह्मांडयोरैक्यात् पिंडावृत्तिरेव ब्रह्मांडावृत्तिरिति रहस्यं॥ एवं पिंडांडमावृत्य व
र्तते सहस्रदलकमले तच्च ज्योत्स्नामयो लोकः तत्रास्ते चंद्रमा नित्यकलः॥ एतच्च तवाज्ञाचक्र
स्थमित्यादिश्लोकव्याख्यानावसरे निपुणतरमुपपादयिष्यामः॥ आज्ञाचक्रोपरि स्थितश्चं
द्र इति युक्तं सुभगोदये षोडशकलानां षोडशनित्यात्मकत्वात् तासां प्रतिपदादिशुक्लपक्षकृष्णप
क्षतिथ्यात्मकतया वृद्धिक्षयसद्भावात् चंद्रस्यापि सहस्रदलकमलगतस्य वृद्धिक्षयौ भवत
एवेति॥ ननु चंद्रस्य वृद्धिक्षयौ न भवतः किंतु षोडशनित्यात्मकाः षोडशचंद्राः पौर्णमासीभिः
प्रतिपदादिपौर्णमास्यंततिथिप्रवर्तकाः॥ तथैव अमावास्याप्रभृति कृष्णपक्षप्रतिपदंत
तिथिप्रवर्तकाः स्वात्मानिरोधाननिरोधानाभ्यामिति मंत्ररहस्यं॥ इदमत्रानुसंधेयं॥ श्रीविद्या

मू

याश्चंद्रकलापरनामधेयायाः पंचदशातिथिरूपत्वात्तु षष्ठ्युत्तरत्रिशतंमयूखाः दिवसात्मकाः तेनसं

वत्सरो लक्ष्यते॥ तस्य कालशक्त्यात्मकस्य संवत्सरस्य प्रजापतिरूपत्वात् प्रजापतेर्जगत्कर्तृत्वा

त्तन्मरीचीनां जगदुत्पत्तिस्थितिलयकरत्वं॥ तेच मरीचयः अस्मिन्पिंडांडे ब्रह्मांडेच॥ एवमेवप्र

तिब्रह्मांडप्रतिपिंडांडेषष्ठ्युत्तरत्रिशतसंख्याकाममयूखाः अतश्चानंतामयूखाः॥ सूर्यचंद्राग्नि

संघ्नाएतेमयूखाः भगवतीपादारविंदजन्मानः तोस्तान्लोकान्प्रकाशयंति॥ अयंच लोकस्य

द्वारमर्चिमस्यचित्रमित्यादिश्रुत्यामयूखानांभगवतीपादारविंदसंभवउक्तः॥ तदेवं मरीच

यः स्वायंभुवा इतिश्रुत्यातेषांमरीचीनांसृष्टिस्थितिलयकरत्वमुक्तं॥ एतदुक्तंभवति॥ सूर्यचं

द्रामयः भगवतीपादारविंदोद्भूतानंतकोटिकिरणमध्येकतिपयान्किरणानाहृत्यभगवती

प्रसादसमासादिततेजस्त्रकाशकत्वसामर्थ्याजगंतिप्रकाशयंतीति॥ अलभ्यसर्वलोकाति

क्रांतंचंद्रकलाचक्रंबैंदवेस्थानमिति॥ तत्रवर्तमानंचरणांबुजं अनेककोटिब्रह्मांडपिंडांडाव

च्छिन्नमयूखानामुपर्येववर्तमानत्वात्तेषामप्युपरितवपदांबुजंवर्तत इतिसिद्धानुवादेनवा

रोपस्तुतिरितिसनुसंधेयं॥ यथोक्तंभैरवयामले॥ चंद्रज्ञानविद्यायांगौरीप्रतिमहेश्वरेण॥

॥२८॥

॥२८॥

साधुसाधुमहाभागेपएंत्रैलोक्यसुंदरि॥गुह्याद्गुह्यतरंज्ञानंनकुत्रापिप्रकाशितं॥कलाविद्याप
राशक्तिःश्रीचक्राकाररूपिणी॥तन्मध्येबैंदवंस्थानंतत्रास्तेपरमेश्वरी॥सदाशिवेनसंपृक्तासर्व
तत्वातिगासती॥चक्रंत्रिपुरसुंदर्याब्रह्मांडाकारमीश्वरि॥पंचभूतात्मकंचैवतन्मात्रात्मकमेवच॥
इंद्रियात्मकमेवंचमनस्तत्वात्मकंतथा॥मायादितत्वरूपंचतत्वातीतंचबैंदवं॥बैंदवेजगदुत्पत्ति
स्थितिसंहारकारिणि॥सदाशिवेनसंपृक्तातत्वातीतामहेश्वरी॥योनीरूपापराकारायस्यादे
होद्भवाच्छिवे॥किरणाश्चसहस्रंचद्विसहस्रंचलक्षकं॥कोटिरर्बुदमेतेषांपरासंख्यानविद्यते॥
तेमेधानुप्रविश्यचभातिलोकंचराचरं॥यस्यादेवामहेशानिभासासर्वंविभासते॥यद्भासार
हितंकिंचिन्नचप्रकाशते॥तस्याश्चशिवशक्तेश्चचिद्रूपायाश्चतंविना॥आंध्यमापद्यतेनूनं
जगदेतच्चराचरं॥तेषामनंतकोटीनांमयूखानांमहेश्वरि॥मध्येषट्त्रिंशतंतेमीत्रिंशतंकिरणाः
शिवे॥ब्रह्मांडस्थभुवनानास्तेसोमसूर्यानलात्मना॥अग्नेरष्टोत्तरशतंपंचाशत्षोडशोत्तरकंरवेः॥ष
ट्त्रिंशदुत्तरशतंचंद्रस्यकिरणाःशिवे॥ब्रह्मांडंभासयंतस्तेपिंडांडमपित्र्यंबकरि॥दिवासूर्यस्त
थारात्रौसोमोवह्निश्चसंध्ययोः॥प्रकाशयंततःकालांस्तेयस्मात्कालात्मकास्त्रयः॥षट्त्रिंशतंच

२६

त्रिरूतंदिनान्येव नु हायनः॥ हायनात्मा महादेवः प्रजापतिरिति श्रुतिः॥ प्रजापतिर्लोककर्ता म
रीचिप्रमुखान्मुनीन्॥ सृजंसेते लोकपालान् ते सर्वे लोकरक्षकान्॥ संहारश्च हरायत्तउत्पत्ति
र्भवनिर्मिता॥ रक्षानुमउसंल्लग्नास्त्वपिस्थितिलयेद्वियः॥ निमुक्तः परमेशान्यो जगदेवं प्रवर्त
नेद्धृति॥ तमेवानुभवित्र्येसादिना॥ तमेवभान्तमनुभातिसर्वं यस्यभासा सर्वमिदं विभातीति
श्रुत्यर्थउक्तः॥ अत्रबहुवक्तव्यमस्तिन तदत्ररत्न सम्यङ्निरूपयिष्यामः॥ १४॥ सारस्य तन्त्रप्रयो
गमाह॥ शारज्योत्स्नाशुभ्रांशान्तिमुक्तजटाजूटमुकुटांपरत्रासत्राणस्फटिकघटिकापुस्तककर
रां॥ सकलतान्लोकथमियसतां सन्निदधते मधुक्षीरद्राक्षामधुरमधुरीणाभणतयः॥ १५॥
शारज्योत्स्नाशुद्धांशरदिन्दुशरत्कालज्योत्स्नाचन्द्रिकातद्वच्छुद्धां॥ अतिशुभ्रां॥ शान्तिमुक्तजटाजू
टमुकुटां शान्तिमुक्तोजटाजूटमुकुटो यस्याः सा तां चंद्रकलावतंसामित्यर्थः॥ वरत्रासत्राणस्फ
टिकघटिकापुस्तककरां वरदः १ पः १ वरदानमुद्रा त्रासत्राणं अभयमुद्रा स्फटिकघटिकातद्वटि
नं पात्रं स्फटिकाक्षमालिकेति केचित् तत्सक्षे स्फटिकगुटिकेति पाठः पुस्तकं विद्यामुद्रा पुस्तक
बोधनैर्युक्तकराः यस्याः बहुव्रीहिवादित्वादुत्तरपदलोपः॥ ननुस्फटिकगुटिकापुस्तकानि करेय

स्यादिति सप्तमी बहुव्रीहिः प्रहरणादिभ्य उपसंख्यानमिति तस्य प्रहरणादिभ्य एवेति नियतत्वात्॥ स
कृदेकवारं न करोति निषेधार्थौ त्वात्वामिति सर्थः॥ नत्वा नमस्कारं कृत्वा कथं कार्थं चित्तइवेति वाक्यालं
कारे सतां कवीश्वराणां सन्निदधाने सन्निधानं प्राप्नुवंति॥ मधुक्षीरद्राक्षामधुरिमधुरीणाः मधु क्षौद्रं
क्षीरं पयः द्राक्षा मृद्वीका एतेषां मधुरिमा माधुर्यं तत्र धुरीणाः धुरं वहंति अग्रेसराः तद्वन्मधुरा इत्यर्थः
भणितयः वैखर्यः॥ अत्रेत्थं पदयोजना॥ हे भगवति शारदे ज्योत्स्नाभृदंशावलीयुतजटाजूटमुकुटांबर
त्रासचाणस्फटिकघुटिकापुस्तककरांलां सकलन्त्वा सतां मधुक्षीरद्राक्षामधुरिमधुरीणाः भणितयः
कथमिव न सन्निदधते॥ अयमर्थः॥ अत्रव्यतिरेकमुखेन सकलन्नमस्कारोपि कवित्वबीजभूतसं
स्कारो स्यादकः॥ तदभावे प्रकारांतरेण येन केनापि यातद्वैजोत्पत्तिर्नास्तीति सूचितं॥ ९५॥ कवीद्रा
णां चेतः कमलवनबालातपरुचिभजंते ये संतः कतिचिदरुणामेव भवतीं॥ विरिंचि प्रेयस्यास्तरु
णतरश्रृंगारलहरीगभीराभिर्वाग्भिर्विदधति सतां रंजनममी॥ ९६॥ कवीद्राणां कवीश्वराणां चेतः क
मलवनबालातपरुचिं चेतांस्येव कमलानि पद्मानि तेषां वनं खंडं तस्य बालातपरुचिः प्राभातिका
रुणकांतिः तां भजंते सेवंते ये संतः सत्पुरुषाः कतिचिद्विरलाः अरुणामेव अरुणाख्यां अरुणवर्णां

२८

॥२९॥

वभवंती त्वां विरिंचि प्रेयस्याः विरिंचेर्ब्रह्मणः प्रेयसी सरस्वती तस्याः तरुणतरशृंगारलहरीगभीरा
भिः तरुणतरे अतियौवने॥यद्वा॥तरुणतरश्चासौ शृंगारश्च तस्य लहरी उद्रिक्तप्रवाहः॥यद्वा॥लह
रीशब्देन चंद्रोदये या हृद्यो उल्लासः स उच्यते॥लहरीयुक्त गभीराभिरति गंभीराभिरित्यर्थः॥वा
ग्भिर्वाग्विलासैर्विदधति कुर्वंति सतां सभासदां रंजनं हृदयानुरंजनं अमी संतः परामृश्यंते॥अ
त्रेत्थं पदयोजना॥हे भगवति कवीन्द्राणां चेतःकमलचय बालातपरुचिं अरुणामेव भवंती कृति
चित्तृप्ये संतः भजंते अमी संतः विरिंचिप्रेयस्याः तरुणतरशृंगारलहरीगभीराभिः वाग्भिः स
तां रंजनं विदधति॥अयमर्थः॥हृदयकमले भगवतीं अरुणां ध्यायंतः तुंभावमापन्ना सरस्वती
वशृंगाररसप्रधानैर्वाग्विलासैः सभारंजनं कुर्वंति॥भगवत्या मातृकात्मिकेत्या सरस्वतीरूप
त्वेनैव सारस्वतपदत्वं अरुणवर्णध्यानमहिम्ना शृंगाररसप्राधान्येन वाग्विलासप्रवृत्तिरिति
यथोक्तं वामकेश्वरतंत्रे॥अरुणारव्या भगवतीमरुणां भांविचिंतयेत्॥पाशांकुशधरां देवीं धनुर्बा
णधरां त्रिवां॥वरदाभयहस्ता च पुस्तकाक्षस्रगन्विताम्॥अष्टबाहुं त्रिनयनां रवेलंतीमलंगुपैः॥
स करोसेवशृंगाररसस्वादचलंपटान्॥सभासदस्तदा सर्वान् साधकेंद्रः सभास्थल इति॥अ

त्र परंपरितरूपकालंकारः ॥ भगवत्या बालानपरुचिवारोपस्येणेचेतसः कमलवनतारोपणस्य च नि
मित्तत्वात् रूपकरूपकंपरंपरितमिति लक्षणं ॥ ९६ ॥ सवित्रीभिर्वाचां शशिमणिशिलाभंगरुचिभि
र्वशिन्याद्याभिस्त्वां सह जननि संचिंतयति यः ॥ स कर्ता काव्यानां भवति महतां भंगिरुचिभिर्वचोभि
र्वाग्देवीवदनकमलामोदमधुरैः ॥ १७ ॥ सवित्रीभिः जनयित्रीभिः वाचां गिरां शशिमणिशिलाभं
गरुचिभिः चंद्रकांतमणिशकलतुल्यकांतिभिः शकलितचंद्रकांतमणीनामतिधावल्यं लोकसिद्धं
वशिन्याद्याभिः वशिनीप्रमुखाभिः तद्गुणसंविज्ञानो बहुव्रीहिः ॥ वशिनी आद्या यासां ताः ॥ शब्द
योक्षोवशिन्याद्याः योगिन्यो द्वादशागंधो कर्षिण्याद्यपञ्चतस्त्र इति यशिन्याद्या अत्र एकस्यादिप
दस्य लोपः वशिन्याद्याद्या इत्यर्थः ॥ वशिन्यष्टकं ॥ वशिनी मोदिनी विमला अरुणा जयिनी सर्वे
श्वरी कौलिनी एताभिस्त्वां भगवतीं सह साकं जननि हे मातः संचिंतयति यः स साधकः कर्ता कवयि
यिता काव्यानां प्रबंधानां भवति समर्थः प्रभवति महतां महासनां कालिदासप्रभृतीनां भंगिरुचि
भिः भंगीनां रेखानां रुचिभिः स्वादुभिः वचोभिर्वाग्विलासैः वाग्देवीवदनकमलामोदमधुरैः
वाग्देव्याभारत्यावदनकमलेय आमोदः परिमलस्तेन मधुरैः अस्मिन्के पुंभावमापन्नाया भारत्या

कामेश्वरी

२९

वाग्विलासादिमेदुखेवभ्रमजनकैरित्यर्थः ॥ अत्रेत्थं पदयोजना ॥ हे जननि वाचां सवित्रीभिः शशि
मणिशिलाभंगरुचिभिः वशिन्याद्याभिः सह त्वां यः संचिंतयति स महतां भंगिरुचिभिः वाग्देवी
वदनकमलामोदमधुरैः वचोभिः काव्यानां कर्ता भवति ॥ तत्रेदमनुसंधेयं ॥ वशिन्याद्याभिः स्वा
मिन्यत्र स्वामिन्यनेन भगवत्याः स्वरूपमुक्तं ॥ भगवत्याः स्वरूपं तु पंचाशद्वर्णात्मकमातृकेव एत
त्संबंधिन्यः शक्तिः कामदत्त्यादिश्लोकव्याख्यानावसरे प्रपंचयिष्यते ॥ नेयं पंचाशद्वर्णात्मिका मातृ
का अष्टवर्गात्मिका भगवती ॥ ते चाष्टवर्गाः अकचटतपयशाद्याः षोडश स्वराः प्रथमवर्गः ॥

कादयः पंच द्वितीयः चादयः पंच तृतीयः टादयः पंच चतुर्थः तादयः पंच पंचमः पादयः पंच
षष्ठः यादयश्चत्वारः सप्तमः शादयः पंच अष्टमः एवमष्टवर्गात्मिका भगवती मातृका त्रिपु
रसुंदरी अकचटतपयशा वर्गेषु यथाक्रमं वशिन्यादिशक्तिभिः योजिता बिंदुत्रिकोणात्मक
शिवचक्रचतुष्टयवसुकोणदशारद्विदलचतुर्दशकोणात्मकेषु अष्टचक्रेषु योजितास्तत्त्वी
ध्याता काव्यकर्तृत्वसंपादिका ॥ वशिन्याद्याभिरित्यादिशब्देन कामेश्वरीप्रभृतीनामष्टा
नां संग्रहणं योगिनीसंग्रहणं गंधाकर्षिण्यादिचतुष्षष्टिसंग्रहणं कृतमित्युक्तं ॥ वशिन्याद्य

॥३०॥

कमुक्तंगायोगिनीद्वादशकंतुविद्यायोगिनीरेचिकायोगिनीमोचिकायोगिनीअमृतायोगि
नीदीपिकायोगिनीज्ञानायोगिनीआप्यायनीयोगिनीव्यापिनीयोगिनीमेधायोगिनीव्योमरू
पायोगिनीसिद्धिरूपायोगिनीलक्ष्मीयोगिनीएवंद्वादशयोगिनीभिःसार्द्धंचत्रीन्यष्टकंमि
लिताविंशतिःकलाभवंतितांविंशतिःकलाःशुद्धस्फटिकसंकाशाःदशारयुग्मकोणपु
संचिंतयतियःउक्तफलदाः॥अयंचभूप्रस्तारभेदः॥भूप्रस्तारस्यचतुःषष्ठ्यानंतरेत्यादिश्लो
कव्याख्यानावसरेनिपुणतरंनिरूप्यते॥गंधाकर्षिणीरसाकर्षिणीरूपाकर्षिणीस्पर्शा
कर्षिणीचचतुर्द्वारेषुयोजितोध्याताःउक्तफलदाः॥तथाचश्रुतिः॥गंधद्वारांदुराधर्षांनि
त्यपुष्टांकरीषिणीं॥ईश्वरींसर्वभूतानांतामिहोपह्वयेश्रियमिति॥अयमर्थः॥गंधद्वारां
गंधरसरूपस्पर्शाःगंधशब्देनसंगृहीताःतेनगंधादिनागंधाकर्षिण्यादयअधिदेवताःसं
गृहीताभवंतिगंधाकर्षिणीरसाकर्षिणीरूपाकर्षिणीस्पर्शाकर्षिणीचेति॥ताभिर्युक्तानि
चतुर्द्वाराणियस्याःसागंधद्वारातांदुराधर्षांदुष्प्रापांमंदभाग्यानामितिशेषःनित्यपुष्टांनि
त्यानंदस्वरूपिणींकरीषिणींसर्वाकर्षिणीमित्यर्थः॥पद्म॥करिभिर्गजैरीषिणींपरिवृतां

80

स्या इति सप्तमी बहुव्रीहिः प्रहरणादिभ्य उपसंख्यानमिति तस्य प्रहरणादिभ्य एवेति नियतत्वात्॥ स
कलदेकवारं नमस्करोति निषेधार्थो या यो मि सर्थः॥ नत्वा नमस्कारं कृत्वा कथंभूतं कार्थं चित्तद्वेति या भ्यालं
कारे सतां कवीश्वराणां सन्निदधते सन्निधानं प्राप्नुवंति॥ मधुक्षीरद्राक्षामधुरिमधुरीणाः मधुक्षौद्रं
क्षीरं पयः द्राक्षा मृद्वीका एतेषां मधुरिमा माधुर्यं तत्र धुरीणाः धुरं वहंति अग्रेसराः तद्वन्मधुरा इत्यर्थः
भणितयः वैखर्यः॥ अत्रेदं प्रयोजनं॥ हे भगवति शारदे त्वं या स्वाभुङ्गान्वितपुस्तकटाक्षमुकुटांबर
भासचाणस्फटिकगुटिकापुस्तककरां त्वां सकलं नत्वा सतां मधुक्षीरद्राक्षामधुरिमधुरीणाः भणितयः
कथमिव न सन्निदधते॥ अयमर्थः॥ अत्र व्यतिरेकमुखेन सकलं नमस्कारोपि कवित्वबीजं भूतसं
स्कारोत्पादकः॥ तदभावे प्रकारांतरेण येन केनापि यातदृजोत्पत्तिर्नास्तीति सूचितं॥ १५॥ कवीद्रा
णां चेतः कमलवनबालातपरुचिं भजंते ये सं तः कतिचिदरुणामेव भवती॥ विरिंचि प्रेयस्यास्तरु
णतर शृंगारलहरीगभीराभिर्वाग्भिर्विदधति सतां रंजनममी॥ १६॥ कवींद्राणां कवीश्वराणां चेतः क
मलवनबालातपरुचिं चेतांस्येव कमलानि पद्मानि तेषां वनं खंडं तस्य बालातपरुचिः प्राभातिका
रुणकांतिः तां भजंते सेवंते ये संतः सत्पुरुषाः कतिचिद्विरलाः अरुणामेव अरुणाख्यां अरुणवर्णां

भ्रमयति रवींदुस्तनयुगां॥१९॥ मुखं वक्त्रं बिंदुं बिंदुरूपं कृत्वा बिंदुस्थाने मुखं ध्यायेदित्यर्थः
कुचयुगं स्तनयुगलं अधः अधस्तात् तस्य मुखस्य तदधः तस्य कुचयुगस्य अधः तद्देशे हरा
र्द्धं हकारस्य अर्द्धं हरार्द्धं शक्तिः त्रिकोणं योनिरिति यावत्॥ ध्यायति यः साधकः तत्र स ध्या
हार्यः॥ हरमहिषि त्रिनेत्रभार्यायाः मन्मथकलां कामराजबीजं स साधकः स द्यस्तदानीमेव संक्षो
भं सर्वजगत्संक्षोभं नयति प्रापयति। वनिता इति शेषः क्रियाविशेषणद्योतकः॥ अतिलघु
अतितुच्छं त्रिलोकीमपि त्रिभुवनमपि आशु शीघ्रं भ्रमयति॥ रवींदुस्तनयुगां रवींदू चंद्र
सूर्यौ तावेव स्तनौ तयोर्युगं युग्मं यस्याः सा॥ अत्रेत्थं पदयोजना॥ हे हरमहिषि मुखं बिंदुं
कृत्वा तस्याधः कुचयुगं कृत्वा तदधः हरार्द्धं कृत्वा तत्र ते मन्मथकलां ध्यायेद्यः साधकः स
स सद्यः वनिताः संक्षोभयतीति यत्तन्न अतिलघु किंतु रवींदुस्तनयुगां त्रिलोकीमपि
आशु भ्रमयति॥ अत्र त्रिलोक्याः रवींदुस्तनयुगत्व विशेषणेन स्त्रीत्वारोपण॥ अयं मादन
प्रयोगः॥ वनितास्वियं प्रयोक्तव्य इति ज्ञापितुं॥ अत्रेदं मनुसंधेयं॥ साधकस्त्रिकोणे
बिंदुस्थाने साध्यायाः कांतायाः वा वक्त्रं ध्यात्वा तदधस्तात्तस्याः कुचद्वयं ध्यात्वा तत्कुचद्वय

39

॥३३॥

स्याधस्तात्तस्या योनिं विचिंत्य तत्र च क्लं कुचद्वय योनिषु प्रधानं गेषु मारं बीजं संचिंत्य तया कांते
या क्रांतया आत्मनस्तादात्म्यं संपादयेत् ॥ प्रयोगं चतुःरास्रं ॥ बिंदुं संकल्प्य वक्लं तु तदधस्तात्कुच
द्वयं ॥ तदधश्च हरार्द्धं तु चिंतयेत्तदधो मुखं ॥ तत्र कामकलारूपामेरणां चिंतयेदिह ॥ तेन तस्ते नैव
रूपेण निजरूपं विचिंतयेदिति ॥ एवं मादनप्रयोगा अनेके सनत्कुमारसंहितायां समस्तास्या
मुक्ताः ॥ तत्र कतिचन निरूप्यंते ॥ बिंदौ तद्वत्क्लं मारोप्य तदधो बाहुयुग्मकं ॥ तदधः कुचयु
गं तु तदधो योनिमेव च ॥ एतेषु पंचस्थानेषु पंच बाणान्विचिंतयेत् ॥ पंचबाणश्रीमानिमु
खे बाहुयुग्मे कुचे योनिमध्ये यथाक्रमं द्रां द्रीं क्लीं ब्लूं सः इति विचिंतयेदिसर्थः ॥ अयं प्रयोगः
कामराजप्रयोगसमय एव ॥ त्रिकोणे बिंदुस्थाने अधो वक्लं विचिंतयेत् ॥ बिंदोरूपरिभागे
तु वक्लं संचिंत्य साधकः ॥ तदुपर्येव वक्षोजद्वितयं संस्मरेद्बुधः ॥ तदुपर्येव योनिं च क्रमशो भु
वनेश्वरीं ॥ श्रीविद्यां कामराजं च विन्यस्याशु विमोहयेत् ॥ अयं प्रयोगो मुखं बिंदुं कृत्वेति प्र
योगादित्रीप्रकरः ॥ अत्रापि पंचबाणप्रयोगः पूर्ववत् ॥ एवमेते नाद्यन्ता मादनप्रयोगाः स
नत्कुमारसंहितायामवगंतव्याः ॥ ग्रंथविस्तरभयान्नोक्ताः ॥ ७९ ॥ किरं तीमंगेभ्यः किरण

॥३३॥

धा

निकुरंबामृतरसं हृदि त्वामाधत्ते हिमकरशिलामूर्त्तिमिव यः ॥ स सर्पाणां दर्पं शमयति शकुंता
धिप इव ज्वरप्लुष्टान् दृष्ट्या सुखयति सुधारसासिरया ॥२०॥ किरंती वर्षंती अंगेभ्यः सकाशात् कि
रणनिकुरंबामृतरसं किरणानां मरीचीनां निकुरंबः समूहस्तस्मादुत्पन्नः अमृतरसः तं ह
दि हृदये त्वां भवतीं आधत्ते स्मरतीति यावत् हिमकरशिलामूर्त्तिं हिमकरशिलायाश्चंद्रकांतम
णेः मूर्त्तिरुत्कीर्णा शालभंजिका चंद्रकांतमणिनिर्मितदेहामिव यः साधकः स सर्पाणां दर्पं शाम
यति शकुंतानां पक्षिणां अधिपो गरुत्मानिवेति संभावनायां गरुत्मदाकारकारित्वमात्रं न भव
ति अपितु तत्कार्यकारित्वं संभावितमिति गरुत्मान्यथा प्रत्यक्षो गरुत्मानिवेत्यर्थः ॥ ज्वरप्लुष्टा
न् ज्वरेण प्लुष्टान् दृष्ट्या वीक्षणेनैव ॥ अत्र दृष्टिप्रयोगः कथितः ॥ सुखयति सुखिनः करोति
तत्करोतीति णिच् ॥ णाविष्टवत्प्रातिपदिकस्येति यन्मतुबादिलोपः एवं सुखयतीति रूपं
रूपंसिद्धं ॥ सुधाधारासिरया आधारभूता सिरा अमृतस्यंदिका नाडी ॥ यद्वा सुधाधाराशालिका यस्यां
सिरायामिति बहुव्रीहिः ॥ स्त्रियाः पुंवद्भावितपुंस्कादित्यादिना पुंवद्भावः ॥ सुधाधाराचासौ सिरा
च तया सुधारसासिरया इति वा पाठः सुधाधाराशालिकान्विशा ॥ अत्रेत्थं पदयोजना ॥ हे देवि यः साध

82

कः अंगेभ्यः किरणनिकुरंबामृतरसंक्षिरंती हिमकरशिलामूर्तिमिव हृदि यामाधत्ते स शकुंता-
धिपइव दृष्ट्या सर्पाणां दर्पं शमयति॥ सुधासारशिरया दृष्ट्या ज्वरप्लुष्टान्सुखयतीति॥ अनेन
श्लोकेन गारुडप्रयोग उक्तः॥ तदुक्तं चतुःशत्यां॥ षण्मासध्यानयोगेन जायते गारुडोपमः॥
दृष्ट्या कर्षयते लोकं दृष्ट्या वकुरुते वशं॥ दृष्ट्या संक्षोभयेन्नारीं दृष्ट्या च हरते विषं॥ दृष्ट्या चातु-
र्थिकादीश्च ज्वरान्नाशयते क्षणात्॥ चंद्रकांतशिलामूर्तिं विंतयित्वा विनाशयेत्॥ तापज्वरा-
न्दोषांश्च शीघ्रं तार्क्ष्यइवापरः॥ गरुडध्यानयोगेन स्मरणान्नाशयेद्विषमिति॥ अनेनैव सप्र-
तीतिको न्वयः॥ यथा शकुंताधिपः सर्पाणां दर्पं शमयति एवं साधकेंद्रः ज्वरप्लुष्टान्सुख-
यतीति तिरस्कृत्य साधकेंद्रो ज्वरप्लुष्टानां सर्पाणां दर्पमपि शकुंताधिपइवेत्यादिक्रमनुसं-
धेयं॥२०॥ तडिल्लेखातन्वीं तपनशशिवैश्वानरमयीं निषण्णां षण्णामप्युपरि कमलानां
तव कलां॥ महापद्माटव्यां मृदितमलमायेन मनसा महांतः पश्यंतो दधति परमाह्लादल-
हरीं॥२१॥ तडिल्लेखा विद्युल्लता तद्वत्तन्वीं दीर्घा सूक्ष्मा ज्योतिर्मयी क्षणप्रभावद्दिस्थिरा
सौदामिन्याः क्षणप्रभावत्वं आज्ञाचक्रे क्षणमात्रदर्शनात्॥ एतच्च आज्ञाशब्दार्थनिरूपणाव-

॥२४॥

॥२४॥

सरेपूर्वमेवप्रतिपादितं॥तपनशशिवैश्वानरमयीसूर्यचंद्रानलात्मिकां॥तत्रचिरखंडस्यरूपनि
रूपणावसरेसम्यङ्निरूपितं॥निषण्णामासीनांषण्णांषट्संख्याकानांअपिसमुच्चयेग्रंथित्रयस्याप्यु
परिकमलानांपद्माकराणांषट्कानिआधारस्वाधिष्ठानमणिपूरअनाहतविशुद्धाख्यानांकमलस्य
रूपंपूर्वमेवनिरूपितंतत्रमहसःकलांसादाख्यांबैंदवींकलांमहापद्माटव्यांमहतिबहूनिपद्मानि
पद्मदलानिसहस्रसंख्याकानितान्येवअटवीतस्यांसहस्रदलकर्णिकायामित्यर्थः॥पद्ममहापद्मंस
हस्रदलकमलंतदेवअटवीतस्यांमर्दितमलमायेनमर्दिताःक्षपिताःमलाःकामादयःमायाअविद्या
स्मिताहंकारादयःयस्यतत्तेनमनसाअंतःकरणेनमहांतोयोगीश्वराःपश्यंतःसादाख्यकलासुधा
धारानिष्यंदमनुभवंतःदधतिअवरुंधंतिपरमाह्लादलहरींपरमोनिरतिशयानंदःसुखविशेषःतस्य
लहरींउद्रेकंउद्रिक्तपरमानंदसादाख्यकलामननानुभवजनितंसर्वदासंपादयंतीत्यर्थः॥अत्रेत्थंपद
योजना॥हेभगवतितडिल्लेखातन्वीतपनशशिवैश्वानरमयीषण्णांकमलानामप्युपरिमहापद्माटव्यां
निषण्णांतवकलांमर्दितमलमायेनमनसापश्यंतोमहांतःपरमाह्लादलहरींदधति॥२९॥भवानित्वंदा
सेमयिवितरदृष्टिंसकरुणामितिस्तोतुंवांछन्कथयतिभवानित्वमितियः॥तदैवत्वंतस्मैदिशसिनि

33

जसायुज्यपदवीं मुकुंदब्रह्मेंद्रस्फुरन्मुकुटनीराजितपदां ॥ २ ॥ हे भवानि भवस्य पत्नि त्वं भगवती दासे म
यि दासभक्ते किंकरे मयि वितर देहि दृष्टिं कटाक्षं सकरुणां करुणायुक्तां इत्येवंप्रकारेण स्तोतुं स्तोत्रं क
र्तुं वांछन् कथयति गदति भवानि त्वमिति भवानि त्वं दासे मयि वितर दृष्टिं सकरुणामिति वाक्य
स्य प्रतीकं भवानि त्वमित्येवं साधकः तदेव भवानि त्वमिति वाक्यैकदेशोच्चारणसमय एव त्वं भव
ती तस्मै वाक्यैकदेशोच्चारकाय दित्सासि ददासि निजसायुज्यपदवीं निजस्य आत्मसायुज्यस्य पद
वीं तादात्म्यं मुकुंदब्रह्मेंद्रस्फुरन्मुकुटनीराजितपदां मुकुंदो विष्णुः ब्रह्मा द्रुहिणः इंद्र आखंडलः तेषां

स्फुरंत्यप्रथा भवंति तथा मुकुटैः नीराजिते नीराजनाविधिक्रियां चिते पदे पदौ यस्याः सा तां ॥ अत्रैवार्थ
पदयोजना ॥ भवानि त्वं दासे मयि वितर दृष्टिं सकरुणामिति स्तोतुं वांछन् भवानि त्वमिति यः कथयति
तस्मै तदैव त्वं मुकुंदब्रह्मेंद्रस्फुरन्मुकुटनीराजितपदां निजसायुज्यपदवीं दित्सासि ॥ अयमर्थः ॥ भवा
नि त्वं दासे मयीत्यादिवाक्यप्रथमप्रतीके भवानि त्वमिति पदद्वये भवानीति पदस्य लोटुत्तमपुरुषै
कवचनांतत्वमवगम्य तत्सामानाधिकरण्येन त्वंपदस्यान्वये महावाक्यप्रयोगेनैव साधकेन प्र
युक्त इति मत्वा महावाक्यस्य फलं [illegible] दित्सासि भवती जपहोमाद्युपासनाविधिभ्यस्त्वा दास्या

पासनायाः सद्यः फलदायकत्वं॥ अनिच्छयापि संस्पृष्टो दहत्येव हि पावक इति न्यायेन अविवक्षया प्रयुक्तमपि महावाक्यं फलदायकमिति नाप्यचिमत्स्य कारित्वं देव्या इति रहस्यं॥२१॥ त्वया हृत्वा वामं वपुरपरितृप्तेन मनसा शरीरार्द्धं शंभोरपरमपि शंके हृतमभूत्॥ यदेतत्त्वद्रूपं सकलमरुणाभं त्रिनयनं कुचाभ्यामानम्रं कुटिलशशिचूडालमुकुटं॥२२॥ त्वया भवत्या हृत्वा अपहृत्य वामं वामाङ्गं वपुः शरीरं अपरितृप्तेन असंतुष्टेन मनसा अंतरंगेन शरीरार्द्धं शंभोः अपरमपि दक्षिणमपि शंके मन्ये हृतं गृहीतमभूत्॥ यत्‌ यस्मात् एतत्त्वत् हृदयकमलांतः प्रतिभाति त्वद्रूपं तव शरीरं सकलं कृत्स्नं वामाक्षिणाभागात्मकं अरुणाभं अरुणस्य प्रातःकालसूर्यस्येव आभा यस्य तत्॥ यद्वा अरुणारक्तवर्णा आभा प्रभा यस्य तत् अरुणाभं त्रिनयनं नयनत्रययुक्तं कुचाभ्यामानम्रं ईषन्नम्रं कुटिलशशिचूडालमुकुटं कुटिलः शशी नावकचंद्रकलया चूडालं चूडावत् मुकुटं यस्य तत्॥ अत्रेयं पदयोजना॥ हे भगवति शंभोः वामं वपुरर्द्धं त्वया हृत्वा अपरितृप्तेन मनसा अपरमपि शरीरार्द्धं हृतमभूदिति शंके यद्यस्मात्कारणात् एतत्त्वद्रूपं सकलमरुणाभं त्रिनयनं कुचाभ्यामानम्रं कुटिलशशि

॥२६॥

कुड्मलमुकुटं॥ अयमर्थः॥ भगवत्या शांभोरेकस्मिन्नर्द्धे अपहृते अपराद्धस्यापहारार्थं रउत्प्रेक्ष्य
क्ष्यते॥ यद्वा॥ उत्तरकौलसिद्धांतप्रतिपादकोयंश्लोकः॥ उत्तरकौलसिद्धांते शक्तितत्त्वादन्यत्
शिवतत्त्वं नास्ति अतश्च शिवतत्त्वं शक्तितत्त्वेंतर्भूतमिति॥ तदेवोपास्यमिति प्रस्तुतं॥ एतच्च
मनस्त्वं व्योमत्वमिति श्लोकव्याख्यानावसरे तथा धारे मूल इत्यादिश्लोकव्याख्यानावसरे
च निपुणतरमुपपादयिष्यामः॥२३॥ जगत्सूते धाता हरिरवति रुद्रः क्षपयते तिरस्कुर्वन्नेत
त्स्वमपि वपुरीशस्तिरयति॥ सदापूर्वः सर्वं तदिदमनुगृह्णाति च शिवस्तवाज्ञामालंब्य क्षण
चलितयोर्भ्रूलतिकयोः॥२४॥ जगत्स्थावरजंगमात्मकं सूते सृजति धाता स्रष्टा हरिर्विष्णुः
अवति रक्षति रुद्रः क्षपयते संहरति धातृहरिरुद्राः सृष्टिस्थितिलयकारिणः॥ तिरस्कुर्वन्
उपसंहरन् एतद्धातृहरिरुद्रात्मकं तत्त्वत्रयं स्वं स्वकीयमपि वपुर्देहं ईशः महेश्वरतत्त्वं तिरयति
अंतर्हितं करोति॥ ईश्वरः धातृहरिरुद्रान् आत्मन्यारोप्य स्वयमपि सदाशिवतत्त्वेंतर्भूत इत्यर्थः
अनेन ब्रह्मांडप्रलय उक्तः॥ तदनंतरं ब्रह्मांडे सिसृक्षा सदाशिवस्य जायते तदानीमाह सदा
पूर्व इति॥ सदापूर्वः सदाशब्दः पूर्वो यस्य शिवशब्दस्य स च सदापूर्वः शिवशब्दः तेन सदाशि

॥२६॥

यत्राभेदेन वाच्यवाचकयोरभेदोपचारात्सदाशिवनामकं तत्त्वमुपचर्यत इति॥ सर्वं तदिदं पूर्वोक्तं
धातृहरिरुद्रेशानानामकं तत्त्वचतुष्टयमनुगृह्णाति॥ चकारः शंकाछेदे॥ शिवः सदाशिवः॥ कथ
मनुगृह्णाति सा शंकायामाह॥ तवाज्ञामचलं श्रयेति तव भगवतः क्षणचलितयोः भ्रूलतिकयोः
क्षणमात्रं चलितयोः भ्रूलतिकयोः भ्रूलतिकाचलनेन विरचितामाज्ञामचलं श्रयेत्यर्थः॥ भव
भ्रूविक्षेपमात्रेण धातृहरिरुद्रेशानानामकं तत्त्वचतुष्टयमुत्पन्नं भ्रूकुटीकरणमात्रेण तद्विनश्य
ति॥ अनंतकोटिब्रह्मांडानामुत्पादने संहरणे च तव भ्रूविक्षेपमात्ररूपा शक्तिः सा चिरं सदाशिवस्य
करोतीति तात्पर्यं॥ अथ पदयोजना॥ हे भगवति धाता जगत्सूते हरिर्जगदवति रुद्रः जगत्क्षप
यते ईशः एतत्तिरस्कुर्वन्नात्मानमपि वपुस्तिरयति॥ सदापूर्वः शिवः तदिदं तव क्षणचलितयोः
भ्रूलतिकयोराज्ञामालंब्यानुगृह्णाति॥ २४॥ त्रयाणां देवानां त्रिगुणजनितानां तव शिवे भवेत्पूजा
पूजा तव चरणयोर्या विरचिता॥ तथा हि त्वत्पादोद्वहनमणिपीठस्य निकटे स्थिता ह्येते शश्व
न्मुकुलितकरोत्तंसमुकुटाः॥ २५॥ त्रयाणां देवानां धातृहरिद्रुहिणानामित्यर्थः॥ त्रिगुणज
नितानां सत्त्वरजस्तमोप्रधानानां तव भवस्य हे शिवे शिवस्याद्यमहिषि भवेन्भवस्यैव पूजा

३४

॥३८॥

त्तकालेलिङ्॥ पूजा सपर्या सैव पूजा नान्येति द्वितीयपूजाशब्दार्थः॥ तव चरणयोः पदांबुजयोः या पू-
जा विरचिता निर्मिता॥ युक्तं चैतदित्याह तथाहीत्यादि॥ तथाहि॥ युक्तमेतत् त्वत्पादोद्वहनमणिपीठस्यां
तव पादयोः उद्वहनार्थं यन्मणिपीठं परिकल्पितं तत्स्यनिकटे उपसिंहासननिकटे स्थिता वर्तन्ते स्म
हि यस्मात् एते विधातृहरिरुद्राः अधिकारपुरुषाः शश्वदनवरतं मुकुलितकरोत्तंसमुकुटाः मुकुलि-
ताः कृतांजलयः करा एव उत्तंसाः तेषु कृता मुकुटा एषां ते॥ अत्रेत्थं पदयोजना॥ हे त्रिवेतव त्रिगुणज-
नितानां त्रयाणां देवानां तव चरणयोर्या विरचिता पूजा भवेत् सैव पूजा॥ तथाहि॥ त्वत्पादोद्वहने
मणिपीठस्य निकटे हि यस्मात् एते मुकुलितकरोत्तंसमुकुटाः शश्वत् स्थिताः॥ अयं भावः॥ भव-
त्याः पादपीठसेवया न पूजामात्रेण लभ्यते अपितु भवत्याः प्रसादपूर्वकादेवेति॥२५॥ विरिंचिः पं-
चत्वं व्रजति हरिराप्नोति विरतिं विनाशं कीनाशो भजति धनदो याति निधनं॥ वितंद्रीमाहेंद्री
विततिरपि संमीलितदृशा महासंहारेऽस्मिन् विहरति सति त्वत्पतिरसौ॥२६॥ विरिंचिर्ब्रह्मा पंच-
त्वं पंचभूतानां व्यष्टिरूपतां मरणमिति यावत् व्रजति याति॥ हरिर्विष्णुः आप्नोति प्राप्नोति विरतिं उप-
रतिं मरणमिति यावत्॥ विनाशं मृत्युं कीनाशो यमः भजति त्रो धने धनदः कुबेरः याति प्राप्नोति

॥३८॥

निधनं मरणं वितंद्री विशेषणं तंद्री प्रमीला यस्याः सा निद्राणेत्यर्थः महेंद्राणामियं माहेंद्री चतु
र्दशानां मनूनां इंद्राणां संघः विततिरपि संमीलितदृशा संमीलिता दृग्यस्याः सा संमीलितदृशा ॥
हलंतादपि दृष्टिबिष्यतीति टाप् ॥ यद्वा संमीलिता दृग्यया तया संमीलितदृशा करणेन ॥ महासंहारे
कल्पांते अस्मिन् विहरति विश्वं खलु तया विलीनं हे सति पतिव्रते त्वत्पतिः सदाशिवः असौ सहस्र
कमलोपरि दृश्यमाने ॥ अत्रेत्थं पदयोजना ॥ विरिंचिः पंचत्वं व्रजति हरिर्विरतिमाप्नोति कीनाशो
विनाशं भजति धनदो निधनं याति माहेंद्री विततिरपि संमीलितदृशा वितंद्री अस्मिन् महासंहारे हे सति
पतिव्रते असौ त्वत्पतिर्विहरति ॥ अयं भावः ॥ सर्वेषामप्यधिकारिपुरुषाणां ईश्वराणां च संहारे ब्रह्मा
उभंगसमये तव पत्युर्यद्विहरणं तत्तव पातिव्रत्यमहिमापन्नमिति ॥ २६ ॥ जपो जल्पः शिल्पं सक
लमपि मुद्राविरचनं गतिः प्रादक्षिण्यक्रमणमशनाद्याहुतिविधिः ॥ प्रणामः संवेशः सुखमखि
लमात्मार्पणदृशा सपर्यापर्यायस्तव भवतु यन्मे विलसितं ॥ २७ ॥ जपो मंत्रजपः उपांशूच्चैर्वा कि
यत इत्यादिभिश्चोदितः स एव जल्पः याद्दच्छिकसंलापः शिल्पं सकलमपि हस्तविन्यासादिक्रिया
निचयः मुद्राविरचना मुद्राणां संक्षोभद्रावणाकर्षवश्योन्मादमहांकुशखेचरीबीजयोनीत्रिखं

॥३८॥

स्वंडात्मकानां विरचना कारणं ॥ गतिर्या दृष्टिकगतिः प्रादक्षिण्यक्रमणं प्रदक्षिणक्रिया अशनादि
अदनादि यत्किंचित्सदार्थचर्वणं आहुतिविधिः आहुतीनां देवतोद्देशेन हविः प्रक्षेपात्मकानां विधिः
करणं ॥ प्रणामो नमस्कारः संवेशः यादृच्छिकदंडवल्लुंठनं ॥ जल्पः शिल्पादिव्यतिरेकेन अंगभंगन
यनोन्मीलननिमीलनादिकं सुखवद्वस्तु अखिलं समस्तं शब्दस्पर्शरूपरसगंधात्मकानां आ
त्मार्पणदृशा आत्मार्पणबुद्ध्या सपर्यापर्यायः सपर्या पूजा तस्याः पर्यायः रूपांतरं सपर्यैवेत्यर्थः
तव भवतु भूयात् यत्र सिद्धं मे मम विलसितं विलासः ॥ अत्रेत्थं पदयोजना ॥ हे भगवति मे आ
त्मार्पणदृशा जल्पः जपः सकलमपि शिल्पं मुद्राविरचना गतिः प्रादक्षिण्यक्रमणं अशनादि
आहुतिविधिः प्रणामः संवेशः अखिलं सुखं च विलसितं तव सपर्यापर्यायो भवतु ॥ अयम
र्थः ॥ जल्पादीनां जपादिरूपता यथायथार्हं कल्पिता एवं नयनोन्मीलननिमीलन निमेषोन्मे
ष अंगभंगजंभादीनां यथार्हं सपर्यापर्यायता उद्याः शब्दादेः सुखकरस्य वस्तुस्रानः बोउ
शोपचारव्यतिरेकेण आत्मार्पणबुद्ध्या [illegible] सपर्यापर्यायः संतुष्टीकृतानां ॥ यद्वा शब्दा

॥३८॥

पर्यापर्यायः॥तत्रेदमनुसंधेयं॥समयिनांमतेसमयस्यसादाख्यस्यतत्त्वस्यसपर्यासहस्रक
लएवनतुबाह्यपीठादौ॥यतः येसमयिनोयोगीश्वराः जीवन्मुक्ताः संसारयात्रायामनुवर्तमा
नाः सादाख्यतत्त्वमनुचिंतयंतः आत्मस्यप्रवणावर्ततेतेषांजपोजल्पः शि॰ इत्यादिनासपर्याप
र्यायप्रकारोनिरूपितः॥येतुसमयिनोयोगीश्वराः विजनेगुहांतरेवाबद्धपद्मासनासीनाः नि
गृहीतेंद्रियाः सादाख्यतत्त्वैकध्याननिष्ठावर्ततेतेषवक्ष्यमाणचतुर्विधषड्विधैक्यानुसंधानमे
वभगवत्याः सपर्येत्यर्थः॥तदुक्तंभवति॥ततश्चपक्षद्वयेपिबाह्यक्रियायांतत्क्रियालोपेचत
त्संपादनायासक्लेशोनास्तिसमयिनामितिरहस्यं॥यत्तुचंद्रज्ञानविद्यायामुक्तं॥सूर्यमंडलम
ध्यस्थांदेवींत्रिपुरसुंदरीं॥पाशांकुशौधनुर्बाणधारयंतींप्रपूजयेदितिबाह्यपूजाप्रकारकथ
नंतत्तुसमयैकदेशिमतमितिपुरस्तात्प्रपंचयिष्यते॥२७॥सुधामप्यास्वाद्यप्रतिभयजराम
त्युहरिणींविपद्यंतेविश्वेविधिशतमखाद्यादिविषदः॥करालंयत्क्ष्वेडंकवलितवतःकालक
लनानशंभोस्तन्मूलंतवजननितांटकमहिमा॥२८॥विपिं वि॰ पं॰ चलु मित्यादिश्लोकेमृत्यु

36

॥३९॥

प्रतिभयोभयंजरामत्युजरामरणेहरतीतिप्रतिभयजरामत्युहरिणींतांविपद्यंतेम्रियंतेक्विपे
अखिलाःविधित्रातमखाद्याःविधिर्ब्रह्माच्युतमखोदेवेंद्रःतेआद्याःप्रभृतिभूताःयेषांतेदिवि
षदःसुरगणाःकरालंअत्युग्रंभयंकरंक्ष्वेडंविषंकालकूटंकवलितवतःभक्षितवतःकालक
लेनाकालेनअवसानकालेनकलनाअवच्छेदःमरणमितियावत्॥नशंभोस्तन्मूलंतस्यका
लकलनाभावस्यमूलंनचभवसाःजननिमातःताटंकमहिमाताटंकस्यकर्णाभरणस्यसामर्थ्यं
अत्रेत्थंपदयोजना॥हेजननिविश्वेविधित्रातमखाद्यादिविषदःप्रतिभयजरामत्युहरिणीं
सुधामपि■स्वाद्यापिविपद्यंते॥करालंक्ष्वेडंकवलितवतःशंभोःकालकलनानास्तीतियत्त
न्मूलंतवताटंकमहिमा॥अयंभावः॥यदिशंभोरपिविपत्तिःस्यात्ताटंकच्युतिस्तर्हिस्यादि
ति॥ताटंकवालकत्वंकालस्यनास्तिकालोखन्निस्थितिलयानांताटंकनियंतत्वात्तदभावप
त्तिप्रसमहिमासर्वातिशायीति॥२८॥किरीटंवैरिंचंपरिहरपुरःकैटभभिदःकठोरेकोटीरे
स्खलसिजहिजंभारिमुकुटं॥प्रनम्रेष्वेतेषुप्रसभमुपयातस्यभवनंभवस्याभ्युत्थानेतवप
रिजनोक्तिर्विजयते॥२९॥किरीटंमुकुटंवैरिंचंविरिंचिसंबंधिपरिहरदूरनएवकुरुपुरःअग्र

॥३९॥

भागे कैटभभिदः कैटभासुरभिनत्तीति कैटभभित् तस्य विह्नोः कठोरकोटीरमुकुटांचले
स्खलसि अत्र काकुरनुसंधेया जहि त्यज जंभारिमुकुटं जंभारेरिंद्रस्य मुकुटकिरीटत्वन्नत्रेषु प्रक
र्षेण दं उवन्नतेषु विरिंचि कैटभभित् जंभारिषु प्रसभं अतिशी घ्रं ससंभ्रममसि सर्थः ॥ उपयातस्य
समागतस्य भवनं मंदिरं भवस्य परमेश्वरस्य अभ्युत्थाने अभिमुखोत्थिते तव परिजनोक्तिः
स्वसेवकानां वचनं विजयते सर्वोत्कर्षेण वर्तते ॥ अत्रेत्थं पदयोजना ॥ हे भगवति भवनमुपया
तस्य भवस्य प्रसभं तवाभ्युत्थाने परिजनोक्तिर्विजयते ॥ अत्रोदात्तोऽलंकारः समृद्धिवद्वस्तुव
र्णनमुदात्तमिति लक्षणात् ॥ २९ ॥ स्वदेहोद्भूताभिर्घृणिभिरणिमाद्याभिरभितो निषेव्ये नित्ये
त्वामहमिति सदा भावयति यः ॥ किमाश्चर्यं तस्य त्रिनयनसमृद्धिं तृणयतो महासंवर्ताग्नि
र्विरचयति नीराजनविधिं ॥ ३० ॥ स्वदेहोद्भूताभिः स्वस्य देहस्तस्मादुद्भूताभिः अत्र देहशब्दो दे
हावयवं चरणं लक्षयति ॥ घृणिभिर्मयूखैः मयूखानां चरणोद्भवत्वमुक्तं प्राक् ॥ अणिमाद्याभिः
अणिमागरिमेसादिभिरष्टसिद्धिभिः अभितः आवरणत्वेन स्थिताभिः युक्तामिति शेषः ॥ नि
षेव्ये संसेव्ये नित्याभिः त्रिपुरसुंदर्यादिभिः त्वामेतादृशीमहमिति अहंभावनया सदा सर्वकालं

भावयति ध्यानं करोति यः साधकः किमाश्चर्यमाश्चर्यं नास्ति तस्य साधकस्य त्रिनयनसमृद्धिं
त्रीणि नयनानि मार्गाः प्रकाराः सूर्यचंद्राग्निरूपाः यस्य दर्शने इति त्रिनयनः॥ यद्वा इडापिंगला
सुषुम्णा मार्गास्त्रयस्तद्दर्शने उपाया इति त्रिनयनः सदाशिवः॥ यद्वा त्रीणि नयनानि चक्षूंषि
यस्य स त्रिनयनः सुष्वादि त्राणत्वाभावेः॥ तस्य समृद्धिमैश्वर्यं तृणयतः तृणीकुर्वतः महासं
वर्ताग्निः प्रलयकालाग्निः विरचयति करोति नीराजनविधिं नीराजनानुष्ठानं तस्य नीराज
नक्रियायामयास्थितः प्रलयकालाग्निरूपी स्यर्थः॥ अत्रैषं पदयोजना॥ हे निषेव्ये त्वदेहोद्गू
॥४०॥
ताभिः घृणिभिरणिमाद्याभिः अभितो व्यस्थिताभिर्निःसाभिश्च संवलितां त्वां यः साधकः
अहमिति सदा भावयति त्रिनयनसमृद्धिं तृणयतस्तस्य महासंवर्ताग्निर्नीराजनविधिं वि
रचयनीस्यत्रार्थे किमाश्चर्यमिति॥ अयंभावः॥ अहमिति भावनया तादात्म्यसिद्धौ भगव
त्यास्तन्नीराजनविधिराश्चर्यकरो न भवतीति॥ ३०॥ चतुःषष्ट्या तंत्रैः सकलमतिसंधाय
भुवनं स्थितस्तत्तत्सिद्धिप्रसवपरतंत्रैः पशुपतिः॥ पुनस्त्वन्निर्बंधादखिलपुरुषार्थैकघटना
स्वतंत्रं ते तंत्रं क्षितितलमवातीतरदिदं॥ ३१॥ चतुःषष्ट्या संख्याकं चतुःषष्टिसंख्याकैः म

त्तामायायांबरादिभिस्तंत्रैः तत्र चतुःषष्टिशब्दस्य संख्येयपरत्वादेकवचनांतत्वं॥ सकलं समस्तं अत्तिसंधाय अपवाह्य वंचयित्वा भुवनं प्रपंचं स्थितः निवृत्त व्यापारः॥ तत्तत्सिद्धिप्रसवपरतंत्रैः ताभ्य ताभ्यःसिद्धयस्ताभ्यस्तत्सिद्धयः चतुःषष्टितंत्रेषु एकस्मिन्नेकस्मिं तंत्रे प्रयोजनाभूते केकसिद्धयइत्यर्थः॥ तासां प्रसवउत्पत्तिः तत्रपरतंत्रैः॥ यद्वा तेषां तेषां सिद्धयस्तत्तत्सिद्धयः येषां येषां साधकानां स्वाभिमताः सिद्धयः तासां तासां परतंत्रैः उत्पाद्यैकनिष्ठैः पशुपतिः पशूनां प्राणिनां पतिः पत्यतीति पत्यावः॥ यद्वा इंद्रियाण्येव पश्यंतीत्युत्पत्त्या पत्त्रावस्तान्पश्यन्पाति रक्षतीति पशुपतिर्जीवः शिवएव जीवइति पशुपतिः शिवः पुनर्भूयः त्वन्निर्बंधात्त्वया निर्बंधः चतुःषष्टितंत्रप्रतिपादितसर्वसिद्धांतरूपः सकलपुरुषार्थसाधनभूततंत्रांतरोपदेशस्वीकारव्यग्रयादेव्याभवत्याकृतो निर्बंधइतियावत्॥ यद्वा त्वदितिभिन्नंपदं पंचम्यं तं अखिलपुरुषार्थैकघटनास्वतंत्रं अखिलानां पुरुषार्थानां मुख्यत्वेन घटनायां स्वतंत्रं त्वमेव प्रधानं तेभवसास्तंत्रसिद्धांतशास्त्रक्षितितलं भूतलमवातीतरत्॥ अतरतेणौ चाङ् रूपं

॥४३॥

स्यर्थत्वादृति बुद्ध्यादिसूत्रेणाह्निकमेकत्वं॥ इदं वक्ष्यमाणं॥ अत्रेत्थं पदयोजना॥ हे भगवति पशु
पतिः सकलं भुवनं तत्तत्सिद्धिप्रसवपरैस्तंत्रैः चतुःषष्ठ्या तंत्रैः अतिसंधाय स्थितः पुनस्त्व
न्निर्बंधादखिलपुरुषार्थैकघटनास्वतंत्रं ते तंत्रमिदं क्षितितलमवातीतरत्॥ चतुःषष्टि
तंत्राणि चतुःशत्या॥ चतुःषष्टिच तंत्राणि मातॄणामुत्तमानि च॥ महामायाशंबरं च योगि
नीजालशंबरं॥ तत्वशंबरकं चैव भैरवाष्टकमेव च॥ बहुरूपाष्टकं चैव यामलाष्टकमेव च॥
चंद्रज्ञानं मालिनी च महासंमोहनं तथा॥ वामजुष्टमहादेवं वातुलं वातुलोत्तरं॥ हृद्भेदं तंत्र
भेदं च गुह्यतंत्रं च कामिकं॥ कलावादं कलासारं तथान्यत्कुंडिकामतं॥ मतोत्तरं च वीणाख्यं
त्रोतलं त्रोतलोत्तरं॥ पंचामृतं रूपभेदं भूतोड्डामरमेव च॥ कुलसारं कुलोड्डीशं कुलचूडाम
णिस्तथा॥ सर्वज्ञानोत्तमं चैव महाकालीमतं तथा॥ अरुणेशं मोदिनीशं विकुंठेश्वरमेव
च॥ पूर्वपश्चिमदक्षं च उत्तरं च निरुत्तरं॥ विमलं विमलोत्थं च देवीमतमतः परं॥ एवं च
तुःषष्टितंत्राणि शंभुना पार्वतीं प्रति॥ कथितानि॥ एतानि तंत्राणि जगतामतिघातकारणा
नि विनाशहेतून्यभूतानि वैदिकमार्गदूरवर्तित्वात्॥ अतएवोक्तं भगवत्पादैः॥ चतुःषष्ट्या

॥४३॥

तंत्रैः सकलमिदमतिसंधायेति ॥ वदद्भिः सकलविद्वल्लोकप्रतारकाणि मानि चतुःषष्टितं
त्राणीति ॥ तथाहि ॥ महामायाशांबरतंत्रे ॥ महामायाप्रपंचनिर्माणफलं मायाप्रपंचनिर्माणं
नाम सर्वेषां च - रादीनां अन्यथापदार्थज्ञानकारणं ॥ यथा घटस्य पटाकारेण प्रतिभासनं ॥
शांबरतंत्रं मायाप्रधानं तंत्रं शांबरमित्युच्यते ॥ योगिनीजालशंबरतंत्रे योगिनीनां जाल
दर्शनात् तच्च श्मशा॥नादिकुमार्गेण साध्यते ॥ तत्वशांबरं तत्वानां पृथिव्यादीनां शांबरं महेंद्र
जालविद्यायां पृथिवीतत्वे उदकतत्वादि उदकतत्वे पृथिव्यादितत्वानि एवमन्योन्यप्रतिभा
संते ॥ भैरवाष्टकं नाम सिद्धभैरव मायिकभैरव कंकालभैरव कालाग्निभैरव शक्तिभै
रव योगिनीभैरव कालभैरव महाभैरव प्रधानाष्टतंत्राणि सिद्ध्याद्यैहिकफलसाधना
न्यपि कापालिकमतत्वाद्वैदिकमार्गदूराणि ॥ बहुरूपाष्टकं शाक्तैः समुद्भूतानि रूपाणि ब्राह्मी
माहेश्वरी कौमारी वैष्णवी वाराही इंद्राणी चामुंडा शिवदूती चेति अष्टरूपाणि एतान्यष्टरू
पाण्यवलंब्य प्रवृत्तानि तंत्राणि अष्ट तेषामष्टानां गणः अष्टकं एतदपि वेदमार्गदूरत्वाद्बुद्धे
अपराष्टकेश्री विद्यायाः प्रसंगः ॥ बहुरूपाष्टकप्रस्तावे प्रसक्तानुप्रसक्त्या पठितं इति नके

॥८२॥

ष्यि दोषः ॥ यामलाष्टकं यामलानामसिद्धान्तप्रतिपादकानि तंत्राणि यामलानि अष्टतेषांग
णः यामलाष्टकं तदपि वैदिकमार्गाद्दूरं ॥ यद्यपि चतुःषष्टितंत्राणां यामलत्वं लोकव्यवहार
सिद्धं तत्तु अवैदिकत्वसाम्यादुपचारादिति ध्येयं ॥ चंद्रज्ञानं चंद्रज्ञानविद्या ॥ चंद्रज्ञानविद्य
यां षोडशनित्याप्रतिपादनं ॥ नित्याप्रतिपादकत्वेपि कापालिकमतानःपातित्वाद्धेयमि[illegible]
नुपादेयं चंद्रज्ञानविद्या चतुःषष्टितंत्रान्तीनामालिनीविद्या समुद्रेनोपायहेतुः सापि वैदिक
मार्गदूरवर्तिनी ॥ महासंमोहनं जाग्रतामपि निद्राहेतुः ॥ सापि बालजिह्वाछेदिकाकुमा
र्गेण साध्येति निषिद्धा ॥ वामजुष्टं महादेवतंत्रं वामाचारप्रवर्तके इति हेयं ॥ वातुलं वातुलो
त्तरं कामिकं च तंत्रत्रयं वर्णाद्रिप्रतिष्ठांतविधिप्रतिपादकं ॥ तस्मिन्तंत्रत्रये कर्षणादि
प्रतिष्ठांतो विषयः ॥ एकदेशे प्रतिपादिताः सर्वैकदेशो वैदिकमार्ग एव अवशिष्टस्त्ववैदि
कः ॥ हृद्भेदतंत्रं कापालिकमेव यद्यपि हृद्भेदतंत्रे षट्कमलभेदसहस्रकमलप्रवेशो प्रति
पादितो तथापि तस्मिन्तंत्रे वामाचार एव प्रवृत्त इति कापालिकमेव तंत्रं ॥ तंत्रभेद गुह्य
तंत्रयोः प्रकारो नरहस्येन परकतंत्राणां भेद इति तद्विद्यानुष्ठाने बहुहिंसाप्रसक्तेस्ते

॥८२॥

त्रद्रूपं वेदमार्गदूरं॥ कलावादं नाम कलानां चंद्रकलानां वादः प्रतिपाद्नं यस्मिन्तंत्रे त
त्कलावादं॥ वात्स्यायनादिकं यद्यपि कामः पुरुषमात्रेपि कलाग्रहणमोक्षण देशस्थानग्र
हणचंद्रकलारोषणादीनां कामपुरुषार्थे अनुपयोगात् परदारगमनादिनिषिद्धाचारोप
देशाच्च॥ एकदेशे निषिद्धं यद्यपि निषिद्धाः शाः कापालिकमतं न भवति तथापि तत्र प्रवर्तमा
नः पुरुषो वश्यं कापालिकाचारो भवतीति कापालिकत्वेन गणना तंत्रस्य॥ कलासारं वर्णो
त्कर्षविधिर्यत्र प्रवर्तते तत्कलासारं वामाचारप्रधानं॥ कुंड्किामतं घुटिकासिद्धिहेतुः
सोपि वामाचारप्रधान एव॥ मतोत्तरतंत्रे रससिद्धिः॥ वीणाख्यं वीणा नाम योगिनी सास्मि
न्नस्तीति वीणाख्यं॥ सा वीणा संभोगयक्षिणीति केचिदाहुः॥ त्रोतलं घुटिकांजनपादुकासि
द्धिः घुटिकापानमात्रं॥ त्रोतलोत्तरे चतुःषष्टिसहस्रसंख्याकयक्षिणीनां दर्शनं॥ पंचामृतं
पंचानां पृथिव्यादीनां पिंडांडे यत्र मरणाभावः प्रतिपादितः तत्संचामृतं तंत्रं कापालिकमेव॥
रूपभेदादितंत्रपंचकं मारणहेतुरिस्य वैदिकं॥ सर्वज्ञानादितंत्रपंचकं कापालिकसिद्धांते भ
देशात् दिगंबरमतमिति दूरत एव हेयं॥ पूर्वादिदेवीमतपर्यंतं दिगंबरैकदेशि क्षपणकमत

८९

मितितनो दूरत एव हेयं ॥ एवं चतुःषष्टितंत्राणि परिज्ञातॄणामपि वंचकानि ॥ ऐहिकसिद्धिमा
त्रपरत्वाद वैदिकदूरमार्गप्रि परिज्ञातारो ऽपि ऐहिकफलापेक्षया तत्र प्रवृत्ताः प्रतारिता एवे
ति रहस्यं ॥ ननु विप्रलिप्साद्याज्ञाय दोषरहितस्य भगवतः परमेश्वरस्य पशुपतेः कांश्चि
त्प्रति विप्रलंभकर्तृत्वं कथमिति चेन्न ॥ मैवं परमेश्वरः परम कारुणिको विप्रलिप्साद्याज्ञा
यदोषास्तत्र न संस्येव ॥ किंतु परमेश्वरः पशुपतिः ब्रह्मक्षत्रियवैश्यशूद्रजातीयान्मूर्द्धा
वसिक्ताद्यनुलोमप्रतिलोमजातीयान् अधिकृत्य तंत्राणि निर्मितवान् ॥ तत्र च चंद्रकला
विद्यास्तु त्रैवर्णिकानां वक्ष्यमाणास्त्वधिकारः शूद्रादीनां संकीर्णानां चतुःषष्टितंत्रेष्वधि
कारः ॥ एवमधिकारभेदमजानानाः अमी मांसकाद्या मुह्यंतीत्येषामेव सदोषो न पशुप
तेः परमेश्वरस्येति ध्येयं ॥ चंद्रकलाविद्याष्टकं श्रीविद्याप्रतिपादकं तंत्रं ॥ चंद्रकलाज्यो
त्स्नापतिः कलाविधिः कुलार्णवं कुलेश्वरी भुवनेश्वरी बार्हस्पत्यं दुर्वासोमतं चेति ॥ नहि
स्मिंस्तंत्राष्टके त्रैवर्णिकानां शूद्रादीनामधिकारोस्ति न च ब्राह्मणादीनधिकृत्य सव्यमार्गेण
प्रादक्षिण्येन सर्वोप्यनुष्ठानकलापः प्रतिपादितः शूद्रादीनधिकृत्य अपसव्यमार्गेण वा

॥८३॥

माचारो निरूपितः शुभागमपंचरात्रे तु वैदिकमार्गेणैवानुष्ठानकलापो निरूपितः ॥ अयं शु
भागमपंचकं निरूपितो मार्गो वशिष्ठसनकशुकसनंदनसनत्कुमारैः पंचभिर्मुनिभिः प्रद
र्शितः अयमेव समयाचार इति व्यवह्रियते ॥ तथैवास्माभिरपि शुभागमपंचकानुसारेण स
मयमतमवलंब्य भगवत्पादमतमनुसृत्य विवेचितम् ॥ चंद्रकलाविद्याष्टकं तु कुलस
मयानुसारित्वेन मिश्रकमित्युच्यते विद्भिः चतुःषष्टितंत्राणि तु कुलमार्ग एव ॥ मिश्रकं
कौलमार्गं च परित्याज्यं चशब्दोऽङ्गीकरीति ईश्वरवचनात् मिश्रकं कौलमार्गं परित्याज्यं ॥ कौलैर्भग
ते अवलंब्यते इति कौलमार्गं कौलमतं कर्मणि घञ् ॥ अतश्च शुभागमपंचकमेव वैदिकैरा
दरणीयं केवलसमयमार्गप्रदर्शनपरत्वात् ॥ समयमार्गस्वरूपं तु नवाधारे मूले सहस्रमय
ये स्यादिश्लोकव्याख्यानावसरे निपुणतरमुपपादयिष्यामः ॥ तत्र शुभागमपंचके षोडशानि
त्यानि प्रतिपादनं मूलविद्यायामन्तर्भावमंगीकृत्य अंगत्वेन चक्रविद्यायामंगतयैवान्तर्भावः
कथितः अत एव चतुःषष्टिविद्यास्वन्तर्भूतायां चंद्रकलाविद्यायां षोडशनित्याः प्रधानत्वेन प्रतिपा
दिता इति नप्रतिपादकं तंत्रं कौलमार्गः अयं तु समयमार्ग इति भेदः ॥ अत्रेदमनुसंधेयं ॥ शुभा

गमपंचकं नाम॥ वसिष्ठसंहिता सनकसंहिता सनंदनसंहिता सनत्कुमारसंहिता शुक
संहिता चेति पंचसंहिता चेति पंचसंहिताः शुभागमपंचकं॥ तत्र वसिष्ठसंहितायां देवीं प्रति
ईश्वरवचनं॥ यथा॥ शृणु देवि प्रवक्ष्यामि नित्याषोडशकं तव॥ न कस्यचिन्मया ख्यातं सर्व
तंत्रेषु गोपितं॥ तत्रादौ प्रथमा नित्या महात्रिपुरसुंदरी॥ ततः कामेश्वरी नित्या नित्या च भ
गमालिनी॥ नित्यक्लिन्ना तथा चैव भेरुंडा वह्निवासिनी॥ महाविद्येश्वरी रौद्री त्वरिता कुल
सुंदरी॥ नित्या नीलपताका च विजया सर्वमंगला॥ ज्वालामाली चित्रूपा एता विद्यास्तु षो
डशा॥ प्रतिपत्प्रभृत्यादेः पौर्णमास्यंतमर्चयेत्॥ एकादि वृद्ध्या हान्या वा दर्शांतं देवि विग्र
हं॥ एतत्त्व षोडशनित्यानां षोडशनित्यात्मकं चोत्तरश्लोके सम्यक् निरूप्यते॥ तदानीं षोड
शनित्यानां श्रीचक्रे अंगतया तद्भावो निरूप्यते॥ षोडशनित्यास्तु अष्टवर्गात्मकतया अ
ष्टदलपद्मे अष्टपत्रेषु स्थिताः॥ यथाक्रमम् अष्टकोणचक्रे प्रागादिकोणमारभ्य एकैक
स्मिन्कोणे द्विकं द्विकं संतर्भूताः एवमष्टद्विकानि अष्टकोणेंऽतर्भूतानि एतान्येव नित्याः
षोडशस्वरात्मकतया षोडशदलपद्मे स्थिताः द्विद्वारे तदंतर्भूताः एतासां नित्यानां मध्ये

प्रथमं निसाद्वयं त्रीकोणबिंदुरूपेण स्थितं अवशिष्टास्तु चतुर्दशनिस्याः मन्वस्रे ऽन्तर्भूताः मेरुप
लोत्रयप्रस्तुरत्र ये बैंदवत्रिकोणयोरंतर्भूते एवं निसानां चक्रे तर्भावः ॥ इममेवांतर्भावं मेरुप्र
स्तारकमाहुः ॥ अतएव चंद्रकलाविद्याचक्रे विद्यसाकुःस्तं निसानां सिद्धं ॥ सनंदनसंहितायां अ
बीन्द्रप्रति सनंदनवचनं ॥ एतास्तु षोडशनिसाश्चंद्रकलायाश्चक्रे विद्यायाश्चांगभूताः एतास्तु षो
डशनिसाः स्वरात्मकाः पंचदशाक्षरी बीजमंत्र समेत अकारादिभूता कारविसर्गात्मक सकाराभ्यां सं
गृहीताः ॥ जीवकलारूपाः बैंदवस्थाने स्था बैंदवस्थाने स्थगिताः तत्रैवांतर्भूताः कादयोम
वसानाः पाशांकुशबीजयुक्ताः संतः अष्टादशकोणद्वये चांतर्भूताः सिद्धास्तु यकाराद्योव
र्णाः मन्वस्रे द्विरावृत्त्या चतुर्दशकोणपुच तुर्दशांतर्भूताः त्रिष्टवर्णचतुष्टये शिवचक्रचतुष्टये
तर्भूताः ॥ इममेव कैलासप्रस्तारमाहुः ॥ एवं निसानां चक्रविद्यायामंगत्वं प्रतिपादितं ॥ सनत
कुमारसंहितायामपि चक्रविद्यायां षोडशनिस्यानामंगत्वं प्रतिपादितं ॥ यथा सनत्कुमारव
चनं ॥ श्रीचक्रे स्यांगभूतानि साः वह्निन्याद्याभिः द्विर्द्विक्रमेलयित्वा बैंदवत्रिकोणे विहाय
अष्टकोणाद्यं तर्भाव्याः ॥ मध्ये त्रिपुरसुंदरी अंतर्भाव्या ॥ अष्टवर्गास्तु अष्टवह्निन्यादयः षोड

४३

॥८५॥

शानि साह्लादश्रायोगिन्यः चतस्रो गंधाकर्षिण्यादयः एवं चत्वारिंशत् अत्र एकां शक्तिं विहाय
त्रयश्चत्वारिंशत्कोणेषु त्रयश्चत्वारिंशद्देवता अंतर्भाव्याः एकां त्रिपुरसुंदरीं बिंदुस्थाना
दथ स्ताद् गंधाकर्षिण्याद्यास्तु चतुर्द्वारेषु इति निसानामं गत्वं प्रतिपादितं ॥ इममेवमर्थमत्र
स्तारमाकुः ॥ अष्टानां वन्हिन्यादीनां ह्लादश्रायोगिनीनां गंधाकर्षिण्यादीनां नामधेयानि सु
वित्रीभिर्वाचामित्यादिश्लोकव्याख्यानावसरे कथितानि ॥३१॥ अथ त्रिखिलपुरुषार्थै
कघटनास्वतंत्रं भागवतं तंत्रं पशुपतिः क्षितितलमवातीतरदिस्फच्चे पूर्वश्लोके तदेवप्रस्तौ
ति ॥ शिवः शक्तिः कामः क्षितिरथ रविः शीतकिरणः स्मरो हंसः शक्रस्तदनु च परा मार
हरयः ॥ अमी हृल्लेखाभिस्तिसृभिरवसानेषु घटिता भजंते वर्णास्ते तव जननि नामाव
यवतां ॥३२॥ शिवः ककारः शक्तिः एकारः काम ईकारः क्षितिः लकारः अथ शब्दोवसानद्यो
तकः ॥ रविः हकारः शीतकिरणः सकारः स्मरः ककारः हंसः हकारः शक्रः लकारः तदनु
चेत्यवसाने द्योतयति ॥ परा सकारः मारः ककारः हरिर्लकारः अमी द्वादश वर्णाः हृल्ले
खाभिः ह्रींकारैस्तिसृभिस्त्रिसविशिष्टैः अवसानेषु विरामस्थानेषु चतुष्कपंचकत्रिको

॥८५॥

णानामुपरिघटितायोजिताः भजंतेप्राप्नुवंतियणास्तेपूर्वोक्ताः ककारादयः नवभवस्याः
जननिहेमातः नामावयवतांनाम्नस्त्रिपुरसुंदरीमंत्रस्यअवयवताप्रतीकत्वं॥अत्रेर्थपं
दयोजना॥हेजननिशिवः शक्तिः कामः क्षितिः अथरविः शीतकिरणः स्मरः हंसः शक्रः
तदनुचपरामारहरयः इत्यमीवर्णास्तिसृभिः हल्लेखाभिः अवसानेषुघटिताः तेवर्णाः
नवनामावयवतांभजंते॥अत्रेदमनुसंधेयं॥शिवः शक्तिः कामः क्षितिरितिवर्णचतु
ष्टयंआग्नेयंखंडं॥रविः शीतकिरणः स्मरः हंसः शक्रः इतिवर्णपंचकंसौरखंडंउभयोः
खंडयोर्मध्येरुद्रग्रंथिस्थानीयंहल्लेखाबीजं॥परामारहरयइतिवर्णत्रयेणसोम्यं
खंडंनिरूपितं॥सौम्यसौरयोर्मध्येविष्णुग्रंथिस्थानीयंभुवनेश्वरीबीजं॥तुरीयमेका
क्षरंचंद्रकलाखंडंसौम्यचंद्रकलाखंडसौम्ययोर्मध्येब्रह्मग्रंथिस्थानंहल्लेखाबीजं॥
चंद्रकलाखंडंगुरूपदेशादवगंतव्यमितिनप्रकाशितं॥अतएवत्रिखंडोमोत्तकामंत्रः
सोमसूर्यानलात्मकइति॥अवरोहक्रमेणेतिशेषः॥सोमसूर्यानलात्मकइत्येतावन्मात्रे
वक्तव्येत्रिखंडइत्येकत्रिंशतानशक्तिइच्छाशक्तिक्रियाशक्त्यात्मकखंडत्रयमितिआग्रस्वप्न

॥८९॥

सुषुप्त्यवस्थात्रयात्मकं विश्वतैजसप्राज्ञवृत्तित्रयात्मकं तमोरजःसत्वगुणात्मकमित्ये-
वं परंपरा॥ एतच्च पुरस्तात्प्रपंचयिष्यामः॥ अतः शिवः शक्त्यादिशब्दाः कचिल्लक्षितलक्ष-
णया ककारादिवर्णपराः॥ तथाहि॥ त्रिपुरसुंदरीमंत्रस्य षोडशवर्णाः ते च षोडशवर्णाः
षोडशनित्यास्तत्त्वयास्थिताः॥ अत्र षोडश्याः कलायाः नित्यव्यपदेशः चंद्रकलारूपसा-
म्यात्॥ सा च परा कला चिदेकरसा तस्याः छाया विशुद्धिचक्रे षोडशारे कलात्मतयाभ्र-
मतीति रहस्यं॥ सा प्रधानं प्रकृतिः तस्या अंगभूताः पंचदशनित्या इति पूर्वश्लोके प्रति-
पादितं॥ यद्यपि ककारादयः श्रूयमाणाः पंचदशैव वर्णाः संप्रदायतो ज्ञातव्याः एको वर्णः
षोडशकलात्मकः प्रकृतिभूतइति॥ यद्यपि षोडशी कला गुरुमुखादेवावगंतव्या तथा-
पि तस्या अप्रतिपादने व्याख्यानेसापेक्षमिव अतोनुपादेयं स्यादेवेति सा कला निरूप्यते॥
न च सच्छिष्येभ्यो योपदेष्टव्या गुरुभिः कृपया सा कलेति शिष्याणामेवोपदेष्टव्या नान्येषामिति
वाच्यं॥ येनु मदीयं ग्रंथं दृष्ट्वा तां कलां जानंति ते मच्छिष्या एवेति अस्माकमनुग्रहः॥ न
नु पादवंदनपादोपसंग्रहणहस्तमस्तकसंयोगादेरंगकलापस्य शिष्यत्वापादकस्याभा-

॥८९॥

वेदितव्यं तेषु शिष्यत्वमिति चेत्सत्यं ॥ अस्मदीयं ग्रंथं दृष्ट्वाशेषायाः षोडश्याः कलायाः स्वरूपं
गुर्वंतरमुखाद्वजो न तां शिष्यत्वमास्तु ॥ ये न जानंति तेषां गुरुमुखादप्युपदेशेन भास्यंते
एव तस्यानीशुवैकपरतंत्रे अस्मिन्मंत्रे नैवास्माकं गुरव इति जिज्ञासायां उदीर्यमाणानां तेषां जि
ज्ञासूनां वर्तमानानां वर्तिष्यमाणानां च वयमेव गुरव इति तेषु अनुग्रहः कृतोस्माभिः ॥ षोड
शीकलानाम शकार रेफ ईकार बिंदुतो मंत्रः एतस्यैव बीजस्य नाम श्रीविद्येति ॥ श्रीबीजात्मि
का विद्या श्रीविद्येति रहस्यं ॥ एवं षोडशनित्यानां प्रकृतिभूताः ककारादयः ॥ ताश्च षोडश
नित्याः शुक्लप्रतिपदमारभ्य पौर्णमास्यंततिथिरूपाः कृष्णप्रतिपदमारभ्य अमावास्यंत
तिथिरूपाः ॥ ता एव चंद्रकलाभिधानाः चंद्रकला एव प्रतिपदादितिथय एव सुप्रसिद्धं ॥
यथोक्तं ज्योतिःशास्त्रे ॥ प्रतिपन्नाम विज्ञेया चंद्रस्य प्रथमा कला ॥ द्वितीयाद्याद्वितीया
याः पक्षयोः शुक्लकृष्णयोः ॥ अयमर्थः ॥ चंद्रस्य प्रथमायाः कलायाः प्रतिपदिति ना
मधेयं सैव कलात्मिका प्रतिपत् शुक्लपक्षे सूर्यमंडलान्निर्गता ॥ कृष्णपक्षे तु सूर्यमंड
लं प्रविष्टा एवं सूर्यमंडलान्निर्गता द्वितीया कला द्वितीया तिथिः ॥ कृष्णपक्षे तु सूर्यमं

शुक्लपक्षे

८४

॥४८॥

ऽलं प्रविष्टा द्वितीया कला द्वितीयातिथिः रिति॥ एवं सर्वत्रोहनीयं॥ अतश्च पंचदशा
कलाव्यवधाने सूर्यचंद्रयोर्यत्र सा पौर्णमासी॥ पंचदश्यां कलायां सूर्यचंद्रयोरत्यंतसं
योगः सामावास्येति ज्ञेयं॥ अतः कौलमते चंद्रकलानां षोडशानां नित्यानां प्रतिदिन
मेकस्या एकस्या अनुष्ठानं॥ सर्वासां॥ समयमते षोडश्याः कलायास्तु पंचदशस्वपि
तिथिषु अनुष्ठानं सिद्धं॥ पंचदशानां नित्यानां तत्रैवांतर्भावात्॥ अयं संप्रदायक्रमः स
म्यगुक्तोऽपि दुर्ज्ञेयप्रमेयजात इति विस्पष्टार्थं पुनरुच्यते॥ प्रतिपदि त्रिपुरसुंदरी कला
ध्येया॥ द्वितीयायां कामेश्वरी कला॥ तृतीयायां भगमालिनी कला॥ चतुर्थ्यां नित्यक्लि
न्ना कला॥ पंचम्यां भेरुंडाख्या कला॥ षष्ठ्यां वह्निवासिनी कला॥ सप्तम्यां महाविद्ये
श्वरी कला॥ अष्टम्यां रौद्री कला॥ नवम्यां त्वरिता कला॥ दशम्यां कुलसुंदरी कला॥
एकादश्यां नीलपताकाख्या कला॥ द्वादश्यां विजया कला॥ त्रयोदश्यां सर्वमंगला कला॥
चतुर्दश्यां ज्वालाख्या कला॥ पंचदश्यां मालिन्याख्या कला॥ सर्वासु तिथिषु चिद्रूपाख्या
कला षोडशी उपास्या॥ प्रतिपदि या त्रिपुरसुंदरी कथिता सा चिद्रूपात्मिका न भवति॥

॥४७॥

चिद्रूपाया मूलविद्याभिन्नत्वेनानुष्ठानात्॥ मंत्रभेदश्च॥ स मंत्रः प्रतिपद्येवानुष्ठेयो न द्वि
तीयायामिति त्रिपुरसुंदरीनित्यायां नामसाम्यमवगंतव्यं॥ एता नित्या षोडशानित्यानां चित्शु
द्धचक्रे षोडशारंस्थाने॥ तत्र प्रागादिक्रमेण षोडशानित्यास्तु नक्रोणेषु परिवर्तंते॥ नदधस्थि
ते द्वादशारे संविल्कमले द्वादश सूर्यमंडलानि प्रादक्षिण्यक्रमेण परिवर्तंते॥ तेषां द्वादश
नां सूर्याणां द्वादशमासेष्वधिकारः॥ एतच्च सनत्कुमारसंहितायां श्लोकैः सप्तदशभिर्नि रू
पितं॥ न तु संक्षेपेणोच्यते॥ सूर्यचंद्रयोर्देवयान पितृयानाख्यरुद्रपिंगलानाडीमार्गेण
अहोरात्रयोः संचरणं॥ चंद्रस्तु वामनाडीमार्गेण संचरन् दिवसप्रतिसहस्रनाडीमार्गं अमृ
तेन सिंचति॥ सूर्यस्तु दक्षिणमार्गेण संचरन् तदुत्क्षिप्तानमृतबिंदूनुपाहरति॥ यदा चं
द्रसूर्ययोरुभयोराधारचक्रे समावेशस्तदा अमावास्यातिथिरुत्पद्यते॥ कृष्णपक्षतिथ
यस्तत उत्पद्यंते॥ अत एव कुंडलिनीशक्तिराधारकुंडे सूर्यकिरणसंपर्कात्तु विलीनचंद्रमं
डलमध्यगलत्सीयूषपरिपूरितेस्वपिति तस्य स्वापावस्थैव कृष्णपक्ष उच्यते॥ योगी यदा
समीहितचित्तः चंद्रं चंद्रस्थाने सूर्यं सूर्यस्थाने वायुना नीत्वोर्ध्वक्रमेत तदा चंद्रसूर्यौ नि

८६

रुद्रौ॥ अमृतसेवनोपाहरणयोरन्यत्कौतदानीं वायुनाप्रेरितेन स्वाधिष्ठानवह्निना शुष्कीभूते
अमृतकुंडे निराहारा कुंडलिनी सुप्तोत्थिता सती सर्पवत्फूत्कारं कुर्वती ग्रंथित्रयं भित्वा सहस्र
कमलमध्यवर्ति चंद्रमंडलं दृष्ट्वा ततस्माज्जलंतीपीयूषधारा आज्ञाचक्रोपरिस्थितं चंद्रमंडल
माप्लावयंती तद्गलिताभिरमृतधाराभिः सर्वदेहमाप्लावयति॥ अतश्च आज्ञाचक्रोपरिस्थि-
तस्य चंद्रमसः कलाः पंचदशानि स्याः ताः पंचदशांत दधस्थित विशुद्धिचक्रे माश्रित्य परि

वर्तंते॥ सहस्रदलकमलस्थितचंद्रमंडलं वैंदवस्थानं॥ तत्कला चिन्मयी आनंदरूपा आ

स्मेति गीयते सैव त्रिपुरसुंदरी॥ एवं शुक्लपक्ष एव कुंडलीबोधः कर्तुं शक्यते योगीश्वरैः
न तु कृष्णपक्ष इति रहस्यं॥ सर्वाः शुक्लपक्षतिथयः पौर्णमासीसंज्ञकाः॥ सर्वाः कृष्णपक्ष
तिथयस्त्वमावास्यायामंतर्भवंति एकैवामावास्या कृष्णपक्ष इति गीयते॥ अत एवाधार
स्थानमंधतामिस्त्रं॥ स्वाधिष्ठानं तु सूर्यकिरणसंपर्कात् मिश्रलोकः मणिपूरस्तु अग्नि
स्थानत्वे पि तत्र स्थितमंडले सूर्यकिरणप्रतिबिंबात् मिश्र एव लोकः॥ अनाहतं ज्योतिर्लो
कः एवमनाहतचक्रपर्यंतं ज्योतिस्तमोमिश्रको लोकः विशुद्धचक्रं चांद्रो लोकः॥

आज्ञाचक्रं तु चंद्रस्थानत्वात्सुधालोकः ॥ अनयोर्लोकयोः सूर्यकिरणसंपर्को ज्योत्स्ना
~~[illegible]~~ नास्ति ॥ सहस्रदलकमलं तु ज्योत्स्नामय एव लोकः ॥ तत्रस्थि
तचंद्रो निखिलकलायुक्तः चंद्रबिंबं श्रीचक्रं कलासादाख्या ॥ अतस्त्रिकोणमाधारं ॥ अष्ट
कोणं स्वाधिष्ठानं दशारं मणिपूरं द्वितीयदशारमनाहतं चतुर्दशारं विशुद्धिचक्रं शिवच
क्रचतुष्टयमाज्ञाचक्रं बिंदुस्थाने चतुरस्रं सहस्रदलकमलमिति सिद्धं ॥ आज्ञाचक्रग
तचंद्रे पंचदश कलाः षोडश्याः कलायाः प्रतिफलनं ॥ श्रीचक्ररूपचंद्रबिंब एकैव क
ला सा परमा कला मिलिता षोडशी कला ॥ पद्म ॥ षोडशी दोः कलाभानोर्द्विर्दशा द्वादशान
ले ॥ सा पंचाशत्कलाज्ञेया मातृकाचक्ररूपिणीति ॥ एताः पंचाशत्कलाः पंचाशद्वर्णात्मि
काः ॥ पंचदशाक्षरीमंत्रे अंतर्भूताः ॥ यथा ॥ आदिमेन ककारेण अंतिमाल्लकारः प्रत्याहृतः
तन्मध्यवर्तिनां वर्णानां ग्राहकः ॥ अयमेव लकारः रकारपूर्ववर्त्यकारेण प्रत्याहृतः पंचा
शद्वर्णग्राहकः ॥ ननु अनेनैव प्रत्याहारग्रहणेन पंचाशद्वर्णात्मकमातृकासंग्रहणे

४६

किमर्थं ककारलकारयोः प्रत्याहारग्रहणप्रयासः॥उच्यते॥ककारादिलकारांतानां कला
शब्दवाच्यत्वं गौणं॥व्यंजनानां स्वरान् प्रति अंगत्वात् कलानां स्वराणां प्राधान्यमिति गुणप्रधा
नभावप्रदर्शनार्थं प्रत्याहारद्वयाश्रयणं कृतं सनत्कादिभिरिति ध्येयं॥चत्वारोनुस्वारा
बिंदुलक्षकाः तेन बिंदुना तदुपरि प्रतीयमानो नादः संगृहीतः॥एवं नादबिंदुकलात्मकं श्री
चक्रं त्रिखंडमिति कथितं॥सादाख्या कला श्रीविद्यापरपर्या नादबिंदुकलातीता॥एताः
षोडश [illegible] भूताः तथाहि षोडश स्वराः ककारादयस्तांताः षोडश थादयः सांताः षोडश
त्रिखंडं षोडशानि त्यास्वंतर्भूतं॥हकार आकाशबीजं बिंदवाकाशे निलीनः लकारः अंत
स्थत्वे तद्भूते पिककारेण प्रत्याहारार्थं पुनर्गृहीतः॥क्षकारस्तु षकारककारसमुदायरूप
त्वात्॥ककारादयः सकारांताः द्विः षोडशानि त्यास्वंतर्भूताः स्वरसहिताः॥अकारेण प्रत्या
हृतः क्षकारः अक्षमालेति गीयते॥अतः क्षकारेण सर्वा मातृकाः संगृहीता भवंति॥अत
एवोक्तिमखंडे सकलह्रीमिति ककारलकारयोर्योगः कलाशब्दनिष्पत्तिः॥एवं मंत्रेण

सर्वा मातृकासंगृहीभवति॥ अतश्च षोडशानि त्यानां मंत्रगत षोडशावर्णरूपनित्यात्वं मंत्रगत
षोडशावर्णानां षोडशानित्यात्मकत्वं षोडशावर्णानां पंचाशद्वर्णात्मकत्वं पंचाशद्वर्णानां सूर्यचं
द्राग्निरूपेण त्रिखंडत्वमिति वाक्यचतुष्टयमनुसंधेयं॥ एवं चक्रमंत्रयोरपि यथाप्रका
रत्रयं श्रीबीजं त्रिवचक्रचतुष्टयात्मकं त्रिकोणबिंदुरूपेणां तर्भूतं॥ सकलेति वर्णत्रये
णासंगृहीतकलात्मिकामातृका अक्षमालात्मिकामातृका चउभयमपि यथा योगं चक्रे
अंतर्भूतं॥ तथाहि॥ अंतस्थाश्चत्वार ऊष्माणश्चत्वारः एवमष्टौ वर्णाः अष्टकोणात्मकाः॥
कादयोमावसाना वर्गपंचमान्विताः पदशारयुगे तर्भूताः वर्गपंचमास्तु अनुस्वाररूपेण
बिंदावंतर्भूताः॥ चतुर्दशारे चतुर्दशस्वरा अंतर्भूताः॥ अनुस्वारविसर्गयोर्बिंदावेवांत
र्भावइति मंत्रयंत्रयोरैक्यं चसुभगोदयानुसारेण कथितं॥ पूर्णोदयस्तु धानुसारेण तु सो
मसूर्यानलात्मकतया चक्रस्य त्रिखंडत्वं एवं मंत्रस्यापि त्रिखंडत्वं सुप्रसिद्धं॥ बैंदवः क
लाः षोडशा इंदुखंडे तर्भूताः स च खंडविंद्वात्मके पंचरखंडे अंतर्भूतः एतं भानोश्च तुर्विंशतिः

कलाखंडेंतर्भूताः सचखंडः यंत्रखंडेअंतर्भूतः॥एवमाग्नेयादशकलाःआग्नेयखंडेंतर्भू
ताः सचखंडः यंत्रेआग्नेयखंडेंतर्भवतीतिकलायंत्रमंत्राणामैक्यमनुसंधेयं॥सुभगोद
येनित्यानांस्वरूपमुक्तं॥दर्शाद्याःपौर्णिमांताश्च कलाःपंचदशैवतु॥षोडशीतुकलाज्ञे
यासच्चिदानंदरूपिणी॥अस्यार्थः॥दर्शाद्याःपौर्णिमांतास्तिथयश्चंद्रकलाःदर्शानामा
वास्यानंतरभाविनीप्रतिपत्कलातस्यांईषद्दर्शनोद्दर्शादर्शाआद्यायासांताःपूर्णिमाअंति
मायासांताः॥दर्शाद्दृष्टादर्शा तताविश्वरूपासुदर्शना॥आप्यायमानाप्यायमानोप्याप्यास्तृ
न्नतेरापूर्यमाणापूर्यमाणापूरयंतीपूर्णापौर्णमासी॥एतानिनामधेयानिश्रुतिबोधितानि
संगृहीतानिदर्शाद्याःपूर्णिमांताइत्यनेन॥एतासांस्वरूपंपुरस्तान्निवेदयिष्यते॥दर्शा
दीनांपंचदशानांयथाक्रमंत्रिपुरसुंदरीप्रभृतयःपंचदशनित्याःअधिदेवताःषोडश्या
श्चिद्रूपात्मिकायाःकलायाःसादाख्यतत्वरूपत्वाद्धिदेवतांतरंनास्तिस्वयमेवसर्वस्या
धिदेवतेतिध्येयं॥एतासामभिमानिनीदेवताकामदेवएकएवअधिष्ठानदेवताकामे

श्वरीएकैव अतश्च मूलविद्यागतपंचदशवर्णानां दर्शादयः षोडशकलानित्याकलाश्च विश्वकांत
रमित्यनुसंधेयं ॥ अत एव दर्शादिकलानां चित्रखंडत्वं स्पष्टं ॥ दर्शा दृष्टा दर्शता विश्वरूपा सुद
र्शना आग्नेयखंडः ॥ आप्यायमाना प्यायमाना आप्याया सूनृता इरा एष सौरखंडः ॥ आपूर्यमा
णा पूर्यमाणा पूरयंती पूर्णा पौर्णमासीति पंचाद्रः खंडस्तोत्री योनिरूपिणः ॥ एतासां कलानां
नित्यात्वेन प्रतिपाद्य प्रतिपदाद्युपासनातस्त्रकारः पूर्वमेव दिग्ग्वोग्ग्रमुदाहृतः ॥ दर्शाक
ला शिवतत्वात्मिका दृष्टा कला शक्तितत्वात्मिका ॥ दर्शता कला मायातत्वात्मिका ॥ विश्वरूपा
कला शुद्धविद्यात्मिका ॥ सुदर्शना जलतत्वात्मिका ॥ पंचतत्वात्मकं खंडं आग्नेयमित्यग्निर
थाधिदेवता ॥ कामेश्वरस्तु सर्वाधिदेवता कामेश्वरी सर्वत्राधिष्ठात्री स्यकं ॥ आप्यायमा
ना कला तेजस्तत्वात्मिका प्यायमाना कला वायुतत्वात्मिका प्याप्या कला मनस्तत्वात्मिक
सूनृता कला पृथ्वीतत्वात्मिका इरा कला आकाशतत्वात्मिका आपूर्यमाणा कला विद्यात
त्वात्मिका एवं सौरखंडो द्वितीयः ॥ तत्र सूर्योधिदेवता ॥ कामदेवस्तु सर्वत्राधिदेवता कामे

श्वरी सर्वचक्राधिष्ठात्री स्मृता ॥ आपूर्यमाणायाः कलायाश्चंद्ररूपतः स्थिताया अपि सोररवंदे
तेभ्राभवेः दर्शाकलाप्रभेदत्वात् दर्शापूर्यमाणयोरैक्यमित्यनुसंधेयं ॥ पूर्यमाणाकलामहेभ्य
रतत्वात्मिका ॥ पूरयंती कलोपरतत्वात्मिका ॥ पूर्णाकला आत्मतत्वात्मिका ॥ पौर्णमासी कला
सदाशिवतत्वात्मिका ॥ एतास्तु विशुद्धिचक्रे षोडशारे प्रागादिक्रमेण षोडशदिक्षु परिभ्रमंति ॥
तास्तु आज्ञाचक्रोपरिस्थितचंद्रमंडलस्य षोडशकला इति सुभगोदये यत्प्रपंचितं ॥ तत्तु

॥५९॥

चंद्रकलानामेव षोडशारे परिभ्रमणं ॥ षोडश्याः कलायाः सहस्रदलकमलएवावस्था ॥५३॥
नं ॥ तत्रावस्थितायाः प्रभापटली षोडशारे स्फुरतीत्येवं परमित्यनुसंधेयं ॥ अयमर्थः ॥
शिवः शक्तिः कामः क्षितिः शिवशब्देन शिवतत्वात्मिका दर्शाख्या कला त्रिपुरसुंदरीनाम
धेयाकथ्यते तया तत्स्वहतिभूतेः ककारो लक्ष्यते ॥ एवं शक्तिशब्देन शक्तितत्वात्मिकयाद
र्श्या कलया एकारो लक्ष्यते ॥ कामइत्यनेन कामदेवस्याद्यंतनया कलया ईकारो लक्ष्य
ते ॥ क्षितिरित्यनेन लकारः क्षितितत्वमिति शास्त्रांतरप्रसि[illegible]द्ध्या लकारो लक्ष्यते ॥ रवि
रित्यनेन सूर्यरवंजात्मनया रवेर्हकारो लक्ष्यते ॥ शीतकिरणश्चंद्रः सकारश्चंद्रबीजमिति शा

स्यांतरप्रसिद्धाच्छीतकिरणनकिरणशब्देनसकारोलक्ष्यते॥स्मरशब्देनकामराजप्रकृति
भूतः ककारोलक्ष्यते॥हंसः सूर्यः हकारोधिपतिरित्येकंशाहुः॥शक्र इंद्रः लकारइंद्रबीज
मितिप्रसिद्धाइंद्रशब्देनलकारोलक्ष्यते॥परश्चंद्रकलेतिचंद्रबीजंसकारोलक्ष्यते॥मार
बीजंकामराजमितितत्प्रकृतिभूतः ककारोलक्ष्यते॥हरिरिंद्रः लकारोलक्ष्यते॥एवंमंत्रग
तवर्णानांककारादीनांश्रियादिपदानिलक्षकाणि॥केचिल्लक्षितलक्षकाणीतिध्येयं॥एवं
पंचदशानित्यासमुदायात्मकस्यमंत्रस्यपंचदशतिथिष्वनुष्ठानेविहितं॥पृथक्त्वानुष्ठा
नंतुप्रतिदिनंपृथक्त्रियतं॥एतच्चातिरहस्यंगुरुमुखादेवावगंतव्यमितिविशिष्यानुजिघृ
क्षयाकथितं॥इममेवार्थंश्रुतिराह॥दर्शाद्याः पूर्णिमांताश्चकलाः पंचदशैवत्विति॥अ
त्रयद्वक्तव्यंतत्तुश्रुतिव्याख्यानावसरेतत्रैवप्रतिपादयिष्यामः॥तथाचतैत्तिरीय
यकशाखायांकाठकेश्रूयते॥इयवावसरघेत्यनुवाकः॥तत्रषोडशनित्यासमुदायस्यप
रिज्ञानेफलंप्रतिपादितंज्ञानमात्रफलप्रतिपादकत्वादनारभ्याधीतं॥अश्वमेधकांडानंत

॥५२॥

रं संज्ञानं विज्ञानमिति विधिप्रतिपादकयाख्यानां प्रकरणविच्छेद एव॥ एतस्यानुवाकस्य ब्राह्म
णं इयं वाव सरघेति॥ एवमुभयमंत्रब्राह्मणात्मकं वाख्यमनारभ्याधीतं ज्ञानैकफलकं वाख्याय
ते॥ इयं वाव सरघा॥ इयं च द्रुकेत्वासादरव्यासरघासरघावत्सरघा मधुस्यंदिनीति श्रीच
क्रात्मकत्वं चंद्रस्य परमात्मकत्व निरूपणेन॥ तस्याग्निरेव सारघं हिमकान्तस्यासरघाया
अग्निरेव अग्निस्थानमेवबैंदवं त्रिकोणं सारघं सरघोढ़ूतो मधुतस्यैव सिंधुरूपत्वान्नसा
रघस्य मधुन उपचयापचयप्रकारमाह॥ तस्या एता पूर्वापरपक्षयोरात्रयः॥ तस्याः
सरघायाः एताः संज्ञानानुवाके कथिताः॥ पूर्वापरपक्षयोः शुक्लकृष्णपक्षयोरात्रयः॥
तो मधुकृतः॥ तो रात्रयो मधु कुर्वती ति मधुकृतः॥ रात्रिष्वेव मधुनः संग्रह इति लोक
प्रसिद्धिः॥ रात्रावेव चंद्रा कलारूपायाः श्रीविद्याया अनुष्ठानं॥ न च दिवस इत्युपदे
शः॥ पूर्वपक्षरात्रयः दर्शादि पूर्णमास्यंताः पूर्वं निरूपिताः कृष्णपक्षरात्रीणां नामधे
यानि॥ सुता॥ सुन्वती॥ प्रसूता॥ सूयमाना॥ विहूयमाणा॥ पीती॥ प्रपा॥ संहा॥ स्वस्तिः तर्पयं

॥५२॥

ती। कांता। काम्या। कामजाता। आयुष्मती। कामदुघा। एताः कृष्णपक्षरात्रयस्तासां कृष्णप
क्षरात्रीणां आधारश्चंद्रएवामावास्यात्मकतयावस्थानात्॥ समयिनां तत्रस्य वहाराभा
वात् शुक्लपक्षरात्रिष्वेव चंद्रकलासंचारात्॥ तत्रैव कुंडलिनीप्रबोधात् स्वरूपमात्रोद्दशाए
वकृतः॥ शुक्लपक्षरात्रीणामिव कलानां तत्स्वरूपं पूर्वमेव निरूपितं॥ अतएव कुंडलिनीप्र
बोधो रात्रावेव न दिवा॥ दिवसानां मधुनोस्वावकत्वादित्याह॥ यान्यहानि ते मधुवृषाः॥ म
धुवर्षंतीति मधुवृषाः तएव तत्रयोगिनः कुंडलिनीं न प्रबोधयंति॥ अतः शुक्लपक्षकृष्ण
पक्षयोर्दिवसनामानि नोक्तानि॥ अप्रस्तुतत्वात्॥ तथापि वेदफलश्रवणानुद्देशमात्रे
णवक्ष्यते॥ शुक्लपक्षदिवसनामानि॥ संज्ञानं। प्रज्ञानं। जानत्। अभिजानत्। संकल्पमानं।
प्रकल्पमानं। उपकल्पमानं। क्लृप्तं। श्रेयः। वसीयः। आयत्। संभूतं। भूतं। इति शु
क्लपक्षदिवसनामानि॥ कृष्णपक्षदिवसनामानि तु॥ प्रस्तुतं। विष्टुतं। संस्तुतं। कल्याणं। वि
श्वरूपं। शुक्रं। अमृतं। तेजस्वी। तेजः। समिद्धं। अरुणं। भानुमत्। मरीचिमत्। अतितपत्।

॥५३॥

तपस्यत्॥ एतेषामुभयेषां शुक्लकृष्णपक्षाहोरात्राणां नामधेयनिवेदनस्य फलमाह॥ स यो
ह वा एता मधुकृतश्च मधुवृषाण्यश्च वेद। कुर्वन्ति हास्यैता अग्नौ मधुनास्येष्टापूर्तं धयन्ति।
एता मधुकृतो रात्रीः मधुवृषाणि दिवसान् पूर्वोक्तान् यो वेद अस्य चेतुः एताः अग्नौ वैदवस्था
ने मधु सुधां सिंधुं कुर्वन्ति अस्य इष्टापूर्तं वांछितार्थं पूर्तेन धयन्ति नीरस्कीं कुर्वन्ति॥ व्यतिरे
केनिष्टमाह॥ अथ यो न वेद हास्यैता अग्नौ मधु कुर्वन्ति धयन्ति नेष्टापूर्तं॥ व्याख्यातप्राय
मेतत्॥ अयमर्थः॥ चंद्रकलानुष्ठानं नाम मासकामं त्रयोरैक्यं मंत्रचक्रयोरैक्यं चक्र
नित्ययोरैक्यं नित्याप्रतिपदादिकलयोरैक्यमिति॥ समयमतमेतत्॥ एतदनुष्ठाने शुक्ल
पक्षकृष्णपक्षविवेकः दिवसरात्रिविवेकश्च उपयुज्यते॥ दर्शादिपूर्णिमान्तास्वचतुःकला
सु चतुष्षष्ट्यैक्यसंधानं नामावास्यायां॥ कृष्णपक्षत्रयोदश्यमावास्यापरदूषकं प्रागेव॥
अतश्चामावास्यायामिवकृष्णपक्षदिवसे अनुष्ठानमिति ध्येयं॥ एवं परिशेषस्या अमा
वास्यायामुपासनानिषेधः॥ न तु सर्वस्मिन्कृष्णपक्षे॥ अतश्च सर्वासु रात्रिष्वमावास्या

॥५३॥

व्यतिरिक्तोऽस्मदास्मनास्वर्वैपुष्टिश्वसेष्विति गुरूपदेशाद्वेयं ॥ अतउत्तरं ॥ यो ह वा अहोरात्राणां ना
मधेयानि वेद नाहोरात्रिष्वार्तिमार्छतीति ॥ संज्ञानं विज्ञानं दर्शा दृष्टेति एतावनुवाको पूर्वपक्ष
स्याहोरात्राणां नामधेयानि ॥ प्रस्तुतं विष्टुतं सुतासुन्वती ॥ एतावनुवाकावपरपक्षस्याहोरा
त्राणां नामधेयानि ॥ नाहोरात्रेष्वार्तिमार्छति ॥ एवं वेदेति वाक्यजातं पूर्वव्याख्यायैव
व्याकृतं ॥ इतः परं वक्ष्यमाणं मुहूर्तपक्षमासघटिकादीनां नामधेयजातं अत्रैवान्तर्भूत
मित्येतद्व्याख्यानेनैव व्याख्यातमित्यनुसंधेयं ॥ नतएवसंज्ञानुवाकः ॥ इदं वावसरघेत्य
नुवाकश्च ॥ व्याकृतएवेत्यवगंतव्यं ॥ पत्नुसा चित्रप्रकाशाके ॥ प्रजापतिर्देवानसृजतेत्य
नुवाके ॥ सघदाहेत्यारभ्य ॥ जनको ह वैदेहः संतेन ॥ निसात्मकत्वं सवितुः प्रतिपादितं ॥ त
त्प्रसादादारभ्य तत्त्वाम्निकायाश्चंद्रकलाविद्यायाः श्रीविद्यापरनामधेयायाः पंचदशाविद्यात्मि
कायाः प्रसादसमादितसामर्थ्यं सवितुर्नान्यथेति प्रतिपादयितुं ॥ गौण्या वृत्त्या हृक्ष्केतिः ॥ अ
न एव एष व नदितिगौणवृत्त्याश्रयणं प्रकटितं ॥ एतद्रूपकलापानंतर वाक्यं ॥ जनको ह वै

५२

॥५७॥

देहः॥अहोरात्रैः समाजगामेत्याम्नातं॥जनकउत्पादकः श्रीविद्यायामृषिः॥वैदेहः विदेह एव
वैदेहो मन्मथः॥अहोरात्रैः अहोरात्रात्मकैः पंचदशाक्षरीमंत्रवर्णैः द्वितीयादिपूर्णिमांतकलात्म
कैः समाजगाम तं मंत्रं आहृतवानित्यर्थः॥यस्तु मंत्रमाहरति स ऋषिरित्युच्यते॥अत एवारुणो
पनिषदि॥पुत्रो निर्ऋत्याः स वैदेहः॥निर्ऋत्या लक्ष्म्याः पुत्रो वैदेहो मन्मथः॥अचेता यश्च चेतनः॥
अनंगत्वादेव चेतोरहितः चेतनश्च सर्वभूतानां तर्यामित्वात्॥स तं मणिमविंदत्॥सोनंगः तं
प्रसिद्धं मणिं विद्यारत्नं अविंदत् लब्धवान् अपश्यदित्यर्थः॥असावनंगः अंधोप्यपश्य
दिति अंधो मणिमविंददिति वाक्यशेषाल्लभ्यते॥अत एव परचित्कलायां विद्यायां त्रिपु
रसुंदर्यां मन्मथो ऋषिरभवत्॥सोऽनंगुलिरावयत्॥सोनंगुः अनंगत्वादेवानंगुलिः आ
वयत् आसीव्यच्च॥सीवनानंतरं रुरुसमाह॥सोग्रीवः प्रत्यमुंचत्॥सोनंगः अनंगत्वादे
वाग्रीवः मणिसंपादनफलं प्रत्यमुंचत् मोचनमकरोत् ध्वनयानित्यर्थः॥विद्यारत्ने मणि
धारोपणस्य फलं धारणमेव न भवतीत्याह॥सोजिह्वो असश्चत॥सोनंगः अनंगत्वा

॥५७॥

दयाजिकः असंख्यतअनोचनं आस्वादितवानित्यर्थः ॥ एतदुक्तं भवति अनंगः पूर्वं विचार्य तं पंचदशवर्णात्मकं षोडशानित्यात्मकं नानावेदेषु नानास्मृतिषु नानापुराणेषु नानाविधा गमेषु विप्रकीर्णं दृष्टवान् ॥ तदनंतरं विप्रकीर्णमिमं मंत्रं एकीकृत्य सीयनं कृतवान् तदनंतरं विप्र कीर्णान् पंचदशवर्णान् त्रेधा विभज्य खंडत्रयं कृत्वा त्रिपुरसुंदर्यादि षोडशनित्यात्मत्वं तन्मंत्रं प्रतिपदादि तिथि षोडशात्मकं तत्रैवां तर्भाव्य पंचदशवर्णात्मकं त्रिखंडं कृत्वा तत्र सूर्यसोमा नलात्मकतया ब्रह्म विष्णु महेश्वरात्मकतया सत्वरजस्तमसां व्यवस्थितत्वतया जाग्रत्स्वप्नसु षुप्त्यवस्थात्रैयेन यास्त्व विस्थितित्र लेय हेतुभूततया निभ्रियस्य श्री विद्यात्मके चतुर्थे तत्रैव खंडे पंचदशकलानां अंतर्भावं निभ्रियस्य भुवनेश्वरी प्रभृतीनां योगिनी विद्यानां तत्त्वानां त्रिम स्य त्रिकस्यैकैकं ह्रींकारेणां तर्भाव मंगीकृत्य सर्वभूतात्मकं सर्वमंत्रात्मकं सर्वदात्म्यात्मकं त्रिगुणात्मकं त्रिखंडं त्रिगुणातीतं सादाख्यापरपर्यायं षड्विंशत्रिंशत्कं संपुटात्मकं तत्त्वे निभ्रियस्य वर्णपंचदशकेन मूलविद्यामसीव्यत् ॥ तदनंतरं स्वतंत्रं मंत्रराजं गीवांगाधःने ॥

चिरकालं ध्यानयोगेन पूजितवान् ॥ तदनंतरं चंद्रकलास्वादं स्ततवानिति समन्वयो ऋषिरस्य
मंत्रस्येत्यर्थः ॥ नेतंमृषिं विदित्वा नगरं प्राविशेत् ॥ एतमृषिमन्वर्थं विदित्वा नगरं न प्राविशेत
नगरं श्रीचक्रात्मकं ॥ ऋषिज्ञानपूर्वकं श्रीचक्रात्मकं नगरं न पूजयेत् ॥ बाह्यपूजां न कुर्यादि
ति निषेधविधिः ॥ बाह्यपूजायामेव ऋषिच्छंदः प्रभृति ज्ञानपूर्वकत्वं आंतरपूजायां तादृश्यानु
संधानात्मिकायां ऋष्यादिज्ञानं नास्त्येव ॥ उपयोगस्तु न तो दूरत एव ॥ अतो ये स्तुसिद्धिः ऋष्या
दिपर्युदासमुखेन श्रीचक्रस्य बाह्यपूजनं त्रैवर्णिकैर्न कर्तव्यमिति संपद्यते ॥ तदुक्तं सनत्कुमा

॥५५॥ नि ॥५५॥

रसंहितायां ॥ बाह्यपूजा न कर्तव्या कर्तव्या बाह्यजातिभिः ॥ सात्त्विकैर्धर्मदा नृणां मैहिकार्थैकसा
धनात् ॥ बाह्यपूजारताः कौलाः क्षपणाश्च कपालिकाः ॥ दिगंबराः पीतिहासाः वामकास्तंत्रवादिनः ॥
आंतराराधनपरा वैदिका ब्रह्मवादिनः ॥ जीवन्मुक्ताश्च रंस्ते ते त्रिषु लोकेषु सर्वदेति ॥ कौलाआध
रपूजारताः ॥ क्षपणकाः योषित्त्रिकोणपूजारताः ॥ कापालिकादिगंबराश्च उभयत्र निरताः ॥ पी
तिहासा भैरवयामल प्रामाण्यवादिनः ॥ वामकास्तंत्रवादिन इत्येकं पदं ॥ वामकेश्वरतंत्रप्रामा
ण्यवादिनः केवलचक्रपूजकाः वेदबाह्या इत्यर्थः ॥ आंतराराधनपराः ॥ आंतरपूजारता ब्रह्मवादि

नः शुभागमनत्वयादिनः शुभागमपंचकं पूर्वमेवोक्तं ॥ आंतरपूजाप्रकारः पूर्वमेवोक्तः वक्ष्यते च ॥ य
दि प्रविशेत् ॥ असंज्ञाये संज्ञायोक्तिः यदि वेदः प्रमाणमिति यत् ॥ प्रविशेदेवेत्यर्थः ॥ मिथो वरित्वा प्रवि
शेत् ॥ मिथो मिथः इत्यर्थः ॥ रहस्ये एकांते वरित्वा अवगस्य ॥ वृगति प्रभक्षणयोः ॥ प्रविशेत् अंतः
पूजां कुर्यादित्यर्थः ॥ यद्वा ॥ मिथो मिथुनीभूतौ शिवौ उभयोर्मेलनमवगस्य प्रविशेत् अनुसंदधी
तेति ॥ पूर्वव्याख्यानेपि कात्स्न्यानुसंधाने महायांतरं न कर्तव्यं ॥ एकांतविद्याफलतीरूपदेशः ॥
तत्कथमित्यशांस्यदृष्टा तेन द्रढयति ॥ तत्संभवस्य भ्रांतं ॥ संभवो मन्मथश्चित्तजा नत्यान् ॥ तस्य भ्रा
तं महास्यं सहायांतरं तिरस्कृत्य एकाकी चैवं रहस्ये स्त्रीपुरुषसंयोजनरूपे ॥ अतो मन्मथोपदिष्ट
मंत्रानुष्ठानवत्तां तथैव तदनुष्ठानमिति गोप्यायं विधिरिति तात्पर्यं ॥ द्वितीयव्याख्याने मन्मथो मि
थुनमवगस्य तस्मिन्मिथुने यथा प्रविशति ॥ एवं द्विवचनात् शिवसंपुटनमवगस्य साधकेन प्रवेष्टव्य
मिति शेषः ॥ अतश्च पुत्रो निकेस्याद्वैदेह इति ॥ जनको ह वैदेह इति च ॥ श्रुतिद्वयस्य वैदेहयोरु
भयोरेकत्र स्वभिज्ञाविषयत्वात् ॥ यदाह स्यादिवास्यकथंबकं प्रतिपदादि तिथिरूपचंद्रकलात्मि
कायाः श्रीविद्यायाः प्रतिपादने हारास विनुतस्त्रसादजन्यं महास्यं नान्यथैवं परमिति सर्वमनवद्यं ॥ ३२ ॥

४८

॥५६॥

स्मरं योनिं लक्ष्मीं त्रितयमिदमादौ तव मनोर्निधायैके नित्ये निरवधिमहाभोगरसिकाः ॥ भजंति त्वां
चिंतामणिगुणनिबद्धाक्षवलयाः शिवाग्नौ जुह्वंतः सुरभिघृतधाराहुतिशतैः ॥ १९ ॥ स्मरं कामराजं
योनिं भुवनेश्वरीं लक्ष्मीं श्रीबीजं त्रयमिदमादौ तव मनोः मंत्रस्य निधाय संयोज्य एके चिरलाः
समयिनः नित्ये आद्यंतरहिते निरवधिमहाभोगरसिकाः अपरिच्छिन्नो नित्यानुभवरसज्ञाः प
रमयोगीश्वरा इति यावत् भजंति सेवंते त्वां भगवतीं सहस्रदलकमलाद् अवरोप्य हृत्कमले सं
स्थाप्य ताहग्विधां चिंतामणिगुणनिबद्धाक्षवलयाः चिंतामणीनां गुणना आम्रेडनेन समूह इ
ति यावत् तेन निबद्धो रचितः अक्षवलयः अक्षमालिका येषां ते ॥ यद्वा चिंतामणय एव गुणनि
बद्धाक्षाः सूत्ररचिताक्षाः पद्मबीजानि तेषां वलयः मालिका येषां ते तथोक्ताः ॥ शिवाग्नौ शिव
शक्तित्रिकोणमिति यावत् तत्र संश्रितो ऽग्निः शिवाग्निः त्रिकोणे बैंदवस्थाने स्वाधिष्ठानाग्निं अ
वधूय तत्र निःक्षिप्य पाशांकुशाभ्यां निरुध्य भुवनेश्वर्या अवगुंठ्य अग्नेर्ज्ञानकर्मादि षोढान्यासं
स्कारास्तत्र क्रियंते स शिवाग्निरिति रहस्यमिति ॥ अयमाम्नायः ॥ त्रिकोणे बैंदवस्थाने स्वाधिष्ठा
नाग्निं निक्षिप्येति ॥ यद्यपि बैंदवस्थानं चतुष्कोणं तथापि पुरश्चरणात्मक्रियायां सबिंदुकमले त्रि

॥५६॥

२१

कोर्णेमारोप्यसहस्रदलकमलान्तर्बैंदवस्थांकामेश्वरीमारोप्यपुरश्चरणंकार्यमितिसमयमतरह
स्यमितिसाचार्याणामाम्नायइति॥जुह्वतःसंतर्पयंतःसुरभिघृतधाराहुतिशतैःसुरभिःकामगवीत
स्याःघृतेमाज्यंतस्यधारास्ताभिःआहुतयःहविःप्रक्षेपाःतासांशतानिसहस्राणि॥अत्रेत्थंपदयोज
ना॥हेनिसतवमनोःआदौस्मरंयोनिंलक्ष्मींद्वंद्वमत्रयंनिधायनिरवधिमहाभोगरसिकाःएकेत्वां
तामणिगुणनिबद्धाक्षवलयाःशिवाग्नौत्वांसुरभिघृतधाराहुतिशतैर्जुह्वंतोभजंति॥अत्रेत्थंत
त्वं॥समयिनांमंत्रस्यपुरश्चरणंनास्तिजपोपिनास्तिबाह्यहोमोपिनास्तिबाह्यपूजाविधयोनसंत्येव॥
हृत्कमलएवसर्वंयावदनुष्ठेयं॥एतच्चजपोजल्पःशिल्पइत्यादिव्याख्यानावसरेकिंचिदुक्तंअवशि
ष्टंकृत्स्नंतत्वान्ताचक्रस्थमित्यादिश्लोकषट्कव्याख्यानावसरेनिपुणतरमुपपादयिष्यामः॥तत्वा
न्ताचक्रेमित्यादिश्लोकषट्केनसामयिकंमतंनिरूपयिष्यनसमभेदंकौलमततदुपयोगितयानि
रूपयति॥कौलंद्विविधं॥पूर्वकौलमुत्तरकौलंचेति॥एतद्द्वितयंक्रमेणश्लोकद्वयेनाह॥३३॥ ॥
शरीरंत्वंशंभोःशशिमिहिरवक्षोरुहयुगंतवात्मानंमन्येभगवतिनवात्मानमनघं॥अतःशे
षःशेषीत्ययमुभयसाधारणतयास्थितःसंबंधोवांसमरसपरानंदपरयोः॥३४॥शरीरंदेहस्त्वं

५५

॥५७॥

भगवतीमहाभैरवीशंभोरानंदभैरवस्य शशिमिहिरवक्षोरुहयुगं शशी चंद्रः मिहिरः सूर्यः तावेव वक्षोरुहौ कुचौ तयोः युगं युग्मं यस्य तत् तव भवत्याः महाभैरव्याः आत्मानं देहं मन्ये जानामि भगवति भगः अस्या अस्तीति भगवती तस्याः संबुद्धिः ॥ उत्पत्तिं च विनाशं च भूतानामगतिं गतिं ॥ वेत्ति विद्यामविद्यां च स वाच्यो भगवानिति स्मरणात् ॥ उत्पत्त्यादिवेदनं भगः तद्वती भगवती ॥ यद्वा इंदुकलाविद्यायाः नवयोन्यात्मकत्वात् तत् नवयोनिमति भगवति प्राशस्त्ये मतुप् ॥ नवयोनिभिः प्रशस्तेत्यर्थः ॥ नवात्मानं मानंदभैरवं नवव्यूहात्मकत्वादानंदभैरवस्य ॥ नवव्यूहात्मकत्वमुपरिष्टाद्वक्ष्यते ॥ अनघं निर्दोषं अतः अस्माद्धेतोः यतः कारणात् परानंदपरयोः ऐक्यं तस्मादित्यर्थः ॥ शेषः गुणभूतः अप्रधानं शेषी प्रधानं इत्ययमेवं प्रकारः उभयसाधारणतया उभयोर्भैरवभैरव्योः साधारणमस्या साधारण्यात् स्थितः संबंधः शेषशेषीभावरूपः वां युवयोः समरसपरानंदपरयोः समरसे सामरस्ययुक्ते परानंद आनंदभैरवः परा आनंदभैरवी कृपा विमृष्टिः कला समरसे च ते परानंदपरे च तयोः ॥ अथैवं पदयोजना ॥ हे भगवति शंभोस्तव शशिमिहिरवक्षोरुहयुगं शरीरं भवसीति शेषः ॥ आनंदभैरवस्य कालव्यूहांतःपातित्वात् सूर्यचंद्रयोर्वक्षोरुहत्वा

रोपणं मुक्तं॥ यद्वायमन्वयः॥ हे भगवति त्वां त्रिमिहिरवक्षोरुहयुगं त्वारीरं त्वां भो स्त्वमेव॥ सूर्यचंद्रस्त
नौ देव्यास्तावेव नयने स्मृते॥ उभौ ताटंकयुगलमिसेषा वैदिकी श्रुतिरिति॥ अनेन भगवत्याः शंभुश्र
तिरोषत्वमुक्तं॥ हे भगवति तव स्तानमनघं नवास्तानं मन्ये अतः शोषः शोषीति अयं संबोधः॥ स्व
मरसपरानंदपरयोः शंभुमयसाधारणतया स्थितः॥ अत्रेदमनुसंधेयं॥ महाभैरवस्य नवात्मे
ति संज्ञा नवव्यूहात्मकत्वात्॥ नवव्यूहाः॥ कालव्यूहः कुलव्यूहो नामव्यूहस्तथैव च॥ ज्ञानव्यू
हस्तथा बिंदुव्यूहस्योत्तदनंतरं॥ कलाव्यूहस्तथा जीवव्यूहस्यादिति ते नव॥ अस्यार्थः॥ काल
व्यूहो नाम निमेषादिकल्पांतावच्छिन्नकालसमुदायः सूर्यचंद्रयोरपि कालावच्छेदकतया काल
व्यूहांतर्भाव उक्तः॥ कुलव्यूहो नाम नीलादिरूपव्यूहः॥ नामव्यूहः संज्ञास्कंधः॥ ज्ञानव्यूहः विज्ञा
नस्कंधः॥ भोगव्यूह इति नामांतरमस्ति॥ स च द्विविधः॥ संभोगविसंभोगभेदात्॥ संभोगो वि
कल्पः विसंभोगो निर्विकल्पः॥ चित्तव्यूहो नाम अहंकारपंचस्कंधाः॥ अहंकारपंचकं अहंका
रचित्तबुद्धिमहन्मनांसि॥ नादव्यूहो नाम रागद्वेषकृतिप्रयत्नस्कंधः॥ अनेन मातृकायाः परा
पश्यंती मध्यमा वैखरी ति चत्वारि रूपाणि॥ परा नाम सा तत्रोहरूपा अंतरे अंतःकरणे अहनवि

५६

क

॥५८॥

तर्केण सहितं रूपं यस्याः सा सांतरोहरूपा युक्तावस्थायामेव ज्ञातव्येति अभिसंधिः॥ यथोक्तं कामकलाविलासायां॥ या सांतरोहरूपा परममहेशी परा नाम पश्यंती नाम एषैव स्पष्टोच्यते॥ यथोक्तं तत्रैव सस्पष्टा पश्यंत्याख्या त्रिमात्रकाचैव कथिता यातना॥ त्रिमात्रका त्रिखंड युक्ता मातृका सा च कथिता वक्तव्या तात्रिखंडा सकचैकैश्च त्रिखंडा सकमातृकाया इति रहस्यं॥ एतच्चैव पूर्वं बहुधा प्रपंचितं॥ स्पष्टा युक्तावस्थायां अति सूक्ष्मतया प्रतीतेत्यभिसंधिः॥ मध्यमा नाम परा पश्यंत्योः उच्चानुच्चावस्थात्मिका॥ सा द्विविधा॥ वामादि व्यष्टिरूपा सूक्ष्मा व्यष्टिरूपा स्थूला समष्टिरूपा चेति॥ वामादि समष्टिरूपा सूक्ष्मा व्यष्टिरूपा स्थूला॥ वामाद्याः शक्तयः॥ वामा ज्येष्ठा रौद्री अंबिका एताश्चतस्रः श्रीचक्रांतर्गता धोमुखचतुर्यन्यात्मकाः॥ इच्छा ज्ञान क्रिया शांता परा चेति पंचशक्तयः श्रीचक्रांतर्गतोर्ध्वमुखशक्तियोन्यात्मिकाः एताभिः शक्तिभिः भगवस्थान वाचकत्वमुच्यते॥ यथोक्तं तत्रैव॥ एका परा तदन्या वामादि व्यष्टिमात्र सूक्ष्मा सा तेन न वाच्या मातोनाता सा मध्यमाभिधाता भवां द्विविधा हि मध्यमा सा सूक्ष्मा स्थूला कृतिः शि रा सूक्ष्मा॥ नवनादमयी स्थूला नववर्गात्मा तु भूतलिप्याख्या॥ आद्या कारणमन्या कार्यं चन

॥५८॥

योर्यतस्ततो हेतोः॥ सैवेयं॥ न हि भेदस्तादात्म्यं हेतुहेतुमद्भाव इति॥ अस्यार्थः॥ एका परेति॥
सत्त्वरजस्तमोगुणसाम्यरूपा॥ तदन्या पश्यंती अन्यतरगुणवैषम्यरूपेत्यर्थः॥ मध्यमा वामादि
व्यष्टिरूपा स्थूलात्मिका॥ वामाद्यः शक्तयः बैंदवस्थानस्थोभयत्र संपुटे नाव स्थिताः॥ अत एव
व्यूहशब्दवाच्याः सत्ये॥ न वा मत्त्वा बैन्दव चक्रि यंते॥ समष्टिरूपा स्तु परा या मंतर्भूताः तेन कारणेन
मातामातृका नयाम्नाजाता॥ सा मध्यमाभिधा ताभ्या नाम भ्यां द्विविधा हि सा मध्यमा सूक्ष्मा स्थू
लाक्षति श्चेति द्वैविध्यं॥ सूक्ष्मस्वरूपमाह॥ स्थिरेति॥ स्थैर्या व स्थायां युक्ता व स्थायामेवावभा
स्या नघनाद मयीति॥ नवनादा अकचटतपयशाक्षाः एते परस्परं भिन्नजातीयाः॥ स्वरकवर्ग
चवर्गटवर्गपवर्गयवर्गशवर्गक्षवर्गाणां परस्परं भिन्नत्वेन प्रतीयमानत्वात् पनत्रमाणमाह॥
मृतलिप्याख्येति मिथ्यालिपिर्द्वेया॥ मिथ्यारूपाया लिपेरारव्यापकत्वं॥ दर्पणप्रतिबिंबस्य मुख्य
ज्ञापकत्वमिव यत्र न विरुध्यते॥ आद्या कारणमन्येति॥ आद्या सूक्ष्मरूपा मध्यमा कारणं॥ स्थूल
रूपाया मध्यमाया नव वर्गात्मिकायाः अनयोः कारणयोः यतस्ततो हेतोः सैवेयं सेयं सूक्ष्मै
वेयं स्थूला अतः सूक्ष्मस्थूलयोरेव्यभेदविमर्शदशायामपि न कोपि हेतुरस्तीति॥ नास्यर्थो

॥५९॥

कं यतस्मात्तो हेतोरिति॥ न देवप्रतिपादयन्ति॥ न हि भेदइति॥ हेतुहेतुमत्तादात्म्यमभिप्रमित्यर्थं
यः सर्वत्र तादात्म्यं हेतुहेतुमद्व्यतिरेकेण नास्तीत्यर्थः॥ अतश्च मध्यमास्तिकायाश्चिच्छक्तेर्नवा
समतास्थिता रागेच्छाकृतिप्रयत्नानां कारणत्वेनागमेषु प्रसिद्धाः मायाशुद्धविद्यामहेश्वरस
दाशिवाः रागादीनां तत्त्वभूताः संगृहीताः तैः परापरंपती मध्यमावैश्वर्यः अधिष्ठानभूताः
संगृहीताः इत्यवगंतव्यं॥ बिंदुव्यूहो नाम षडक्षसंघः॥ कालव्यूहो नाम पंचानां कलानां वर्ण
त्तिकानां संघः॥ जीवव्यूहो नाम भोक्तृस्कंधः॥ एवं नवानां व्यूहानां भोक्तृभोग्यभोगरूपेण त्रै
विध्यं॥ आत्मव्यूहस्य भोक्तृत्वेपि भोग्यभोगतादात्म्यात्त्रैविध्यं॥ एवं भोग्यव्यूहस्य भोग्यव्यू
हस्याप्यूह्यं॥ अयमाशयः॥ आत्मव्यूहस्य भोक्तृत्वं ज्ञानव्यूहस्य भोगत्वं कालव्यूहादीनां भो
ग्यत्वमेवैस्यावार्याणां त्रैविध्यमभिप्रेतमिति॥ सर्वेषां व्यूहानां जीवव्यूहस्य सर्वत्रात्मत्वाद्
भ्यं॥ कालव्यूहस्यावच्छेदत्वादैक्यं॥ कुलनामव्यूहयोर्निरूपकत्वादैक्यं॥ ज्ञानव्यूहस्य बिंदुव्यू
हेतादात्म्यादैक्यं॥ नादकलयोरैक्यान्नवव्यूहात्मकत्वादैक्यं॥ व्यूहात्मकत्वं परमेश्वरस्य सि
द्धमेव॥ अतो नवविधैक्यं भैरवी भैरवयोः शालव्यमिति कौलमतरहस्यं॥ अत एव कौलाः पर

॥५९॥

मेश्वरं न वा स्मेति व्यवहरंति ॥ यथाहुः कौलाः ॥ नवव्यूहात्मको देवः परानंदः परात्मकः ॥ नवात्मा भैर
वो देवो भुक्तिमुक्तिप्रदायकः ॥ परानंदा पराशक्तिश्चिद्रूपा नंदभैरवी ॥ नयोर्यदा सामरस्यं जगदुत्प
तेनदेति ॥ द्विमात्रमुक्तं ॥ अथ द्विष्टं तदाधारे मूल इत्यादौ निरूप्यते ॥ अयं भावः ॥ आनंदभैरवमह
भैरव्योः परानंदपरासंज्ञयोः तादात्म्यसिद्धेन वात्मकत्वाद्वयोः समाना अतः शेषशेषीभाव आपेक्ष
कः ॥ यदा सृष्टिस्थितिलयेषु आनंदभैरवस्य परानंदसंज्ञकस्य परचित्स्वरूपाया श्च महाभैरव्याः
प्रयत्नेन उपपद्यते तदा भैरवी प्राधान्यात् प्रधान प्रकृति शब्दवाच्या महाभैरवीति तस्याः प्रधा
नेत्वं शेषीत्वं आनंदभैरवस्य अप्रधानत्वं गुणभावः शेषत्वं यदा सर्वोपसंहारे प्रकृतेस्तन्मात्राव
स्थिता भैरवी तदा स्वात्मन्यंतर्भावात् भैरवस्य शेषित्वं ॥ भैरव्याः शेषत्वमिति ॥ ३४ ॥ मनस्त्वं व्यो
मत्वं मरुदसि मरुत्सारथिरसि त्वमापस्त्वं भूमिस्त्वयि परिणतायां न हि परं ॥ त्वमेव स्वात्मानं परि
णमयितुं विश्ववपुषा चिदानंदाकारं शिवयुवतिभावेन बिभृषे ॥ ३५ ॥ मनः मनस्तत्त्वं त्वमेव व्योम
काशतत्त्वं विशुद्धिचक्रस्थितं त्वमेव मरुत् वायुतत्त्वं अनाहतनामकं संविद्वकोणगं नमसि त्वमसि
स्यर्थे अव्ययं मरुत्सारथिर्वायुसखः अग्निस्तत्त्वं स्वाधिष्ठानगतं असीति पूर्ववदव्ययं त्वं आपः अ

५५

स्तत्वं मणिपूरांतर्गतं त्वं भूमिः भूमितत्वं मूलाधारगतं एवं रूपेण त्वयि परिणतायां परिणतिं तादात्म्यं
गतायां नहि परं इतः परं नहि किंचिदस्तीत्यर्थः ॥ त्वमेव स्वात्मानं स्वरूपं परिणमयितुं परिणामवंतं
कर्तुं विश्ववपुषा प्रपंचरूपेण चिदानंदाकारं चिच्छक्तेरानंदभैरवस्य च आकारं शिवयुवतिर
पत्नि ॥ युवतिशब्दः सर्वलोकिनर्थादिस्य क इति ङीप् ॥ तस्याः संबुद्धिः ॥ भावेन चित्तेन बिभृषे ॥ य
द्वा ॥ चिदानंदाकारं चिदाकारं आनंदाकारं च ब्रह्मस्वरूपं शिवतत्वं शिवयुवतिभावेन शिवस्य युव
तिर्जायात स्याभावस्तत्वं ॥ अत्रेत्थं पदयोजना ॥ हे भगवति मनस्त्वं व्योम त्वं मरुदसि मरुत्सारथिर
सि त्वमापस्त्वं भूमिः त्वयि परिणतायां परं नहि त्वमेव स्वात्मानं विश्ववपुषा परिणमयितुं शिवयु
वतिभावेन चिदानंदाकारं बिभृषे ॥ अयमर्थः ॥ मनस्त्वमित्यादि त्वं भूमिरित्यंतेन पंचभूतात्मकः
कार्यरूपः परिणामो विकार उक्तः इत्यनेन निर्विकारात्मकः कारणरूपेणावस्थितिविशेषः ब्रह्मण्याः
परिणाम इत्युक्तं ॥ नहि परमित्यनेन अपरिणामिन्याः परिणामो नास्ति अनवस्थापत्तेरिति हि शे
षार्थः ॥ तथा चोक्तं चतुःशत्यां ॥ शृणु देवि महाज्ञानं सर्वज्ञानोत्तमं प्रिये ॥ येन विज्ञातमात्रेण भवा
ब्धौ न निमज्जति ॥ त्रिपुरा परमा शक्तिराद्या जाता महेश्वरी ॥ स्थूलसूक्ष्मविभागेन त्रैलोक्योत्पत्ति

॥६०॥

मातृका॥ कवलीकृतनिःशेषतत्वग्रामस्वरूपिणी॥ यस्यां परिणता यां तु न किंचित्परिशिष्यते॥ कव
लीकृतनिःशेषतत्वग्रामस्वरूपिणी॥ अस्यार्थः॥ कवलीकृते आत्मन्यारोपितः कारणात्मनया वस्तुनि
तः यथा मृदि घटः द्रवति निःशेषं यथा भवति तथा तत्वानां पंच तत्वानां ग्रामः समूहः कवलीकृतनिःशेषतत्व
ग्रामः स एव स्वरूपं यस्याः सा॥ कार्याणि कारणे उपसंहृत्य स्वयं कारणात्मना व्यवस्थितेत्यर्थः॥ सत्कार्य
वादिनां मते कारणे कार्यस्यापि शक्तिरूपेण विद्यमानत्वादिति॥ एतदुक्तं भवति॥ उत्तरकौलमते प्रथ
नमेवजगत्कर्तृ प्रधानत्वादेव शेषभावो नास्ति शिवस्याभावात्॥ तस्य परिणतिः पंचतत्वात्मिका मनस्त
त्वादिरूपेण प्रधानात्मिका शक्तिः परिणता अतो मनः प्रभृतीनां शक्तिपरिणामः तस्या नास्वरूपपरि
णामः॥ एवं प्रपंचे कार्यरूपं स्वस्यामारोप्य कारणरूपेणावस्थिता साधारकुंडे कुंडलिनी स्वपितीयते॥
इतः परं यद्वक्तव्यमस्ति तदपि तवाधारे मूलं द्रव्यादि श्लोकव्याख्यानावसरे निपुणतरमुपपादयिष्या
मः॥ ३५॥ तवाज्ञाचक्रस्थं तपनशशिकोटिद्युतिधरं परं शंभुं वंदे परिमिलितपार्श्वं परचिता॥ यमाराध्यन्भक्त्या रविशशिशुचीनामविषये निरालोकेऽलोके निवसति हि भालोकभुवने॥ ३६॥ तवत्वदीये
आज्ञाचक्रे स्थितं तपनशशिकोटिद्युतिधरं तपनः सूर्यः शशी चंद्रः तयोः कोट्यः अगणितकोटिसंख्या

५९

॥६३॥

काद्यर्थः॥तासां द्युतिः तस्या धरतीति धरः परं शंभुं परमिति संज्ञा शंभोः परिमिलित पार्श्वे परि
मिलितौ पार्श्वौ दक्षिणोत्तरौ यस्य तं परचिता परा चासौ चिच्च परचित् परत्वाद्भिन्नः संज्ञायां त्रसि
द्ध परचित्संवलितं परशिवं आराध्यन् साधयन् भक्त्या भजन अग्नीन्दुरविरश्मिशुचीनां सूर्यचंद्र
वह्नीनाम विषये अगोचरे अत एव निरालोके आलोकरहिते जनरहिते एकांते लोके निवसति त्वंतस्या
ज्योत्स्नाप्येति शेषः॥हित्वसि द्धौ भालोकभुवने ज्योत्स्नामये लोके सहस्रदलकमले॥अत्रैव पदयो
जना॥हे भगवति ते बोधाचक्रस्थ नयनत्रयाविकोटिद्युतिधरं परं शंभुं परचितापरिमिलितं पार्श्वे यं
द॥ यं भक्त्या आराध्यन् रविशशाग्निशुचीनां अविषये निरालोके लोके भालोकभुवने निवसति॥अ
त्रेदमनुसंधेयं॥तवाज्ञाचक्रस्थमिति तव शब्देन साधकस्य भ्रूमध्यांतर्गतश्रीचक्रांतर्गतशिव
चक्रे चतुष्टयं कथ्यते॥ननु द्विदलं पद्मं तवेति पदानन्वयादिति॥एवमुत्तरत्राप्यूह्यं॥अत्र स्वाधि
ष्ठानाग्रे अग्निमंडलं अनाहतचक्राग्रे सूर्यमंडलं आज्ञाचक्राग्रे चंद्रमंडलमिति पूर्वमेव प्रतिपादितं
अतश्चाग्निसूर्यचंद्राणां किरणा मयूखाः षट्पंचाशत्त्रिशतसंख्याकाः आधारप्रभृति आज्ञाचक्रपर्यं
तमेव विचरंति एतदपि पूर्वमेव सम्यङ्निरूपितं॥आज्ञाचक्रे स्थितचंद्रात् अन्यत एव सहस्रदलकम

॥६३॥

लस्थितश्चंद्रः श्रीचक्रात्मकोनिसकलइत्यपि पूर्वमेवसम्यङ्निरूपितं ॥ ३६ ॥ विशुद्धौ नेशुद्धस्फटि
कविशदं व्योमजनकं शिवं सेवे देवीमपि शिवसमानव्यवसितां ॥ ययोः कांत्यायांत्याः शशिकिरणसारू
प्यसरणे विधूतांतर्ध्वांता विलसति चकोरीव जगती ॥ ३७ ॥ विशुद्धौ विशुद्धे चक्रे नभवस्याः शुद्धस्फटि
कविशदं चःत्सरहितस्फटिकसदृशं अतिनिर्मलं व्योमजनकं व्योम्नः आकाशतत्त्वस्यजनकमुत्पादकं
आत्मनआकाशः संभूत इतिश्रुतेः ॥ आज्ञाचक्रे आत्मतत्त्वादुत्पन्नं आकाशतत्त्वमित्यर्थः ॥ नेत्रात्मशब्दो
मनः पर्यायवचनः शिवं शिवतत्त्वं सेवे उपासे देवीं भगवतीं अपिशब्दः समुच्चये शिवसमानव्यव
सितां शिवेन समानं व्यवसितं व्यवसायः प्रयत्नः यस्यास्तां स्वयमपि शिवशब्दवाच्येत्यर्थः ॥ ययोः
शिवयोः कांत्याः प्रभायाः यांत्याः सरंत्याः शशिकिरणसारूप्यसरणेः चंद्रकिरणसादृश्यमार्गेण
विधूतांतर्ध्वांता विधूतमंतर्ध्वांतमज्ञानं यस्याः सा विलसति प्रकाशते चकोरीव चकोरविहगीव ज
गती त्रिलोकी ॥ अत्रैवं पदयोजना ॥ हे भगवति ते विशुद्धौ शुद्धस्फटिकविशदं व्योमजनकं शिवं शि
वसमानव्यवसितां देवीमपि ययोर्यांत्याः शशिकिरणसारूप्यसरणेः कांत्याः सकाशाच्च जगती वि
धूतांतर्ध्वांता चकोरीव विलसति ॥ अयमर्थः ॥ यथा ज्योत्स्नापानेन चकोरी संतुष्टांतरंगा एवं शिवयोः

६०

॥६२॥

ज्योत्स्नासदृशप्रभया विधूतां नष्टीनः संतुष्टां तरंगः साधकलोक इति॥ अत्रेदमनुसंधेयं॥ विशुद्धिच
क्रे पूजायां सूर्यचंद्रनिरोधात् षोडशारगतत्रिपुरसुंदरीप्रभृतीनां षोडशकलानां ज्योत्स्नात्वारोपणात् तच्च
क्रे स्थितयोः शिवयोरेव प्रभया ज्योत्स्नाकार्यमिति॥२७॥ समुन्मीलत्संवित्कमलमकरंदैकरसिकं भ
जे हंसद्वंद्वं किमपि महतां मानसचरं॥ यदालापादष्टादशगुणितविद्यापरिणतिर्यदादत्ते दोषाद्गुणम
खिलमद्भ्यः पय इव॥२८॥ समुन्मीलत् विकसत् संविदेव ज्ञानमेव कमलं तत्र मकरंदः पुष्परसः स
चासावेकश्चेत्यत्रैकशब्दस्य न पूर्वनिपातः विशेषणं विशेष्येण बहुलमिति परनिपातः॥ यद्वा॥ एकश्चा
सौ रसिकश्चेत्येकरसिकः मकरंदेन एकरसिक इति पश्चात्समासः तथा चोक्तं॥ परमानंदस्वरूपयोः शि
वयोः हंसत्वारोपणं संविदः कमलत्वारोपणे निमित्तं॥ अतः संविदः कमलत्वे सिद्धे एकदेशरूपेण म
करंदेन वर्ण्यमाणत्वेकदेशेन हंसस्यारोप्यत्वे अत एव मकरंदैकशब्दस्य तृतीयासमासः भजे सेवे॥
हंसद्वंद्वं किमप्यनिर्वाच्यं इदं तया निर्देष्टुमशक्यं षड्विंशतत्वं शिवशक्तिसंपुटितं महतां योगीश्वरा
णां मानसचरं मानसशब्देन मनसि मानसत्वमानसत्वमारोप्यते न मानससरसि हंसानां निस्तया
सात्‌ यदालापात् यस्य हंसद्वंद्वस्य आलापात् अष्टादशगुणितविद्यापरिणतिः अष्टादशापि या आ

॥६२॥

लापरूपेणपरिणताइत्यर्थः॥यत् हंसद्वंद्वं आदत्ते गृह्णाति दोषात् ल्यब्लोपे पंचमी॥दोषमवधूय गुणं
गुणशब्दो दोषाभावस्याप्युपलक्षकः॥गुणवद्दोषाभावस्यापि ग्राह्यत्वात्॥अखिलं समस्तं अद्भ्यः उदके
भ्यः पयः इव दुग्धमिव॥अत्रेत्थं पदयोजना॥हे भगवति तव समुन्मीलत्संवित्कमलमकरंदैकरसिकं म
हतां मानसचरं किमपि हंसद्वंद्वं भजे॥यदालापादष्टादशगुणितविद्यापरिणतिः यद्दोषादखिलं गुण
मद्भ्यः पय इवादत्ते॥अत्रेदमनुसंधेयं॥संवित्कमलमनाहतचक्रनामकमिति पूर्वमेवोक्तं॥उपास
काः परमहंसमिथुनं संवित्कमले उपासत इति समयैकदेशिमतं॥अत एव महतां मानसचरमित्यु
क्तं॥भगवत्पादमतं तु शिखिज्वालारूपः परमेश्वरः शिखिज्योत्स्नारूपा संवलितः अनाहतचक्रे दी स्य
पांकुरवत्स्वान्निभानीति॥यथोक्तं भगवत्पादैः सुभगोदयव्याख्याने॥शिखिज्वालायस्मिन्समय इह सै
षात्र समयात्तयोः संभेदो बोदिन्यानुहृदयो जैकनिलय इति इदमेवास्माकमप्यभिमतं॥३८॥तवस्वा
धिष्ठाने हुतवहमधिष्ठाय निरतं तमीडे संवर्तं जननि महतीं तां च समयां॥यदालोके लोकान्दहति मह
ति क्रोधकलिले दयार्द्रा या दृष्टिः शिशिरमुपचारं रचयति॥३९॥तव भगवत्याः स्वाधिष्ठाने स्वाधिष्ठानच
चक्रे हुतवहं अग्निं तत्त्वं अधिष्ठाय समाश्रित्य निरतं अनवरतं तं प्रसिद्धं ईडे स्तुवे॥संवर्तं संवर्तनाम

कमग्निं जननि हे मातः महतीं महच्छब्दवाच्यां तां संवर्ताग्निरूपामित्यर्थः॥ समयां समयाख्यां यदालोके
यदालोके दर्शने लोकान्नकूरादीन्दहति महति त्रयं उक्रोधकलिते कोपसंयुक्ते दयार्द्रा कृपाविशिष्टा या दृ
ष्टिः आलोकः शिशिरं शीतलं उपचारं रचयति॥ अत्रैवं प्रयोजनं॥ हे जननि तव स्वाधिष्ठाने हुतवहं
संवर्तमधिष्ठाय निरतं तमीडे समयां नाम महतीं चईडे महति क्रोधकलिते यदालोके लोकान्दहति सति
यादयार्द्रा दृष्टिः शिशिरमुपचारं रचयति सा दृष्टिस्त्वदीयेति शेषः॥ अत्रेदमनुसंधेयं॥ स्वाधिष्ठानम
ग्नितत्वस्योत्पत्तिस्थानं तत्र उत्पन्नं संवर्ताग्निं तया आज्ञा(?)प्य तत्रैव महासंवर्ताग्निज्वालाकारशक्तिरूप
तयावस्थितां शक्तिं संभाव्य तत्तत्पयोरालोके न जगन्ति दग्धानि तानि तानि जगंति पुनः प्रसन्नायाभ
तया वस्थितां शक्तिं... (line as written) गव स्याएव कृपारसपूरिता दृष्टिः मणिपूरचक्रं प्रतिपादितां शिशिरोपचारं रचयतीति स्तुतिमात्रेन
किंतु वस्तुन इति॥ ३९॥ तडित्वंतं शक्त्या तिमिरपरिपंथिस्फुरणया स्फुरन्नानारत्नाभरणपरिणद्धेंद्र
धनुषं॥ तव श्यामं मेघं कमपि मणिपूरैकशरणं निषेवे वर्षंतं हरमिहिरतप्तं त्रिभुवनं॥ ४०॥ तडि
त्वंतं तडित्सौदामिनी सा अस्यास्तीति तं शक्त्या तडिद्रूपया तिमिरपरिपंथिस्फुरणया तिमिरस्यम
णिपूरगतस्य॥ मणिपूरचक्रं नाम स्वलोकइत्यकं चक्रं शास्त्रे॥ परिपंथि विरोधि स्फुरणं यस्याः सा अनेन

स्थितिरसौदामिनीत्वंभगवत्याः सूचितं इदमपिमेघस्य प्रावृषेण्यत्व सूचकंमवेविद्योषणं स्फुरन्नाना
भरणपरिणद्धेंद्रधनुषं स्फुरंति चतानि नानाविधानि रत्नानि तैर्निर्मितानि आभरणानि भूषणानि तैः
परिणद्धं निर्मितं इंद्रधनुर्यस्य तं वासंज्ञायामितिनकन्॥ नानाविधरत्नकांतिसंवलिता स्थिरसौदामि
नीइंद्रचापाभ्रांतिं जनयतीति॥ प्रावृषेण्यत्वे हेत्वंतरं॥ यथोक्तंसिद्धगुटिकायां॥ मणिपूरैकवसतिः प्रा
वृषेण्यः सदाशिवः॥ अंबुदात्मतयाभाति स्थिरसौदामिनीश्रियेति॥ तवभगवत्याः श्यामं श्यामवर्णं
मेघं मेघात्मनास्थितं पशुपतिं कमपि इदंतयानिर्देष्टुमशक्यं मणिपूरैकशरणं मणिभिरितिमणि
पूरकमितिरहस्यं निषेवे नितरां सेवे वर्षंतं मिहिरतप्तं हरएवमिहिरः सूर्यः महासंवर्ताग्निरिति
यावत् तेनतप्तं दग्धं त्रिभुवनं॥ अत्रैर्थं पद्योजना॥ हेभगवति तव मणिपूरैकशरणं तिमिरपरिपंथि
स्फुरणया शक्त्या तडित्वंतं स्फुरन्नानारत्नाभरणपरिणद्धेंद्रधनुषं श्यामं हरमिहिरतप्तं त्रिभुवनं व
र्षंतं कमपि मेघं निषेवे॥ अत्रेदमनुसंधेयं मणिपूरस्थाने जलतत्त्वमुत्पन्नमिति शास्त्रप्रतिपादितं
तत्प्रकारः सूर्यकिरणाग्निसन्निभाः मेघत्वमापन्नाः जलरूपेणेति मणिपूरस्य आधारस्था
४४ मणिपूरमेवएकं शरणं गृहं यस्य तं मणिशब्देन मणितनुरुच्यते मणितनुस्वरूपत्वात् भगवत्यास्ताथा
पूर्यते येन पूरणं ६

धिष्ठानयोर्मध्ये निवेशः अनाहतोपरिस्थितसूर्यकिरणाः स्वाधिष्ठानाग्निना संचलिताः संतामणि
पूरं प्रविश्य जलतत्त्वमापन्नाः तेन जलेन स्वाधिष्ठानाग्निदग्धं जगदाप्लावयंती त्यागमरहस्यं॥ अत्र
स्फुरन्नानाभरणपरिणद्धं द्वयं धनुषमिति मौर्वीरहितं धनुरक्कुरागमविदः तेषां स्मृयते अरुणोपनिष
दि॥ तदिदं धनुरस्यं॥ अभ्रवर्षणे पुचक्षते एतदेव त्रांभोवा हस्यस्य स्य॥ एतद्धुद्रस्य धनुः॥ अस्यार्थः
इंद्रस्य मेघात्मकस्य धनुरस्यं ज्यया मौर्व्या रहितं अवदिः इत्यादीनि श्रुतिस्थपदानि सुभगोदयव्याख्या
नेव्याख्यातानि॥ अरुणोपनिषदियोपां पुष्पमित्यनुवाके योपामित्यारभ्य इमे वै लोका अप्सु प्रति
ष्ठिताद्वयं तेन उदका च्चंद्रोत्पत्तिः सूर्योत्पत्ति रसुत्पत्तिश्च दिवसानां चंद्रकलात्मकानां तेदंत्रानां
नक्षत्राणां चोत्पत्तिः प्रतिपादिता तदनंतरं संमतिरेन स्रग्यप्युक्ता नदेषाभ्यनुक्ता॥ अपां द्वं स्य
मुद्रयसद्रं सूर्ये भुक्ते समाहितं॥ अपां द्वं रसस्य योरसस्तं वो गृह्णाम्युत्तममिति॥ स्वोयमर्थः
अपां रसं चंद्रं उद्द्वयं सन् योगीश्वराः आप्नुवन्तीत्यर्थः॥ सूर्ये सूर्यमंडले भुक्ते मम तं समाहितं
सम्यक्समंतात्स रितं चंद्रमंडलगलत्पीयूषधाराभिरेव सूर्यस्य निर्वाह इत्यर्थः॥ अपां रसस्य
पुष्परूपस्य च ... योरसः वैदक्षात... तनिसकलात्मकः तं निसकलात्मकं रसं वः यु

॥६०॥

॥६०॥

अभ्यः सकाशात् आप इति उदकानामभिमुखं मणिपूरे उदकमुत्पन्नमिति॥ ता आपः स्वाधिष्ठानाग्ने
रुत्पादिकाः आज्ञाचक्रस्थितस्य चंद्रस्योत्पादिकाः अनाहतचक्रस्थितस्य सूर्यस्याप्युत्पादिकाः अ
तत्कलं ते वोगर फाप्युत्तममिति॥ तं उक्तमं चंद्रं सहस्रकमलस्थितं तं यः सकाशात् जो नामीत्यर्थः॥ अस्मि
न्नेवानुवाके योऽप्सु नावं प्रतिष्ठितां वेद प्रत्येव तिष्ठतीति श्रूयते॥ अप्सु उदकतत्त्वात्मके मणिपूरे प्रति
ष्ठितां नावं श्रीचक्रात्मिकां॥ तथा च श्रुत्यंतरं॥ सुत्रामाणं पृथिवीं द्यामनेहसं सुशर्माणमदितिं सुप्रणी
तिं दैवीं नावं स्वरित्रामनागसमस्रवंतीमारुहेमा स्वस्तये॥ अस्या ऋचोऽर्थः॥ पूर्वं अभिषवे सुनो
तीति सुत्रामा अग्निः अग्नितत्त्वं स्वाधिष्ठानमित्यर्थः पृथिवीं मूलाधारगतां द्यां गगनं विशुद्धिस्थितं
अनेहसं कालं मनस्तत्त्वं आज्ञाचक्रस्थं सुशर्माणं वायुतत्त्वं अदितिं आदित्यात्मकं जलतत्त्वं सुप्रणीतिं
सुमार्गे मोक्षे प्रणीतिं प्रकर्षेण नयतीं दैवीं देव्या इमां चक्रविद्यामित्यर्थः नावं नौकां संसारसागरसमु
त्तारणोपायभूतां स्वरित्रां सुष्ठु दृढानि अरित्राणि लांगलानि यस्यास्तां दृढारित्रां निश्चलामिति याव
त् अस्रवंतीं स्वयं दृढां आरुहेम तत्र चरणाभ्यां यामः ते देव निरंतरास्तदुपासनारताः स्यामेत्यर्थः॥ स्वस्
तये अस्य ... ॥ अथ विशिष्यं श्रूयते ज्ञानं स्वभगोदयव्याख्यानावसरे निपुणतरमु

६३

पपादितमस्माभिः॥८०॥तवाधारेमूलेसहसमययालास्यपरयानवात्मानंमन्येनवरसमहातांडवन
टं॥उभाभ्यामेताभ्यामुदयविधिमुद्दिश्यदययासनाथाभ्यांजज्ञेजनकजननीमज्जगदिदं॥८१॥तवभ
वत्याआधारेआधारचक्रेमूलेमूलाधारइत्यर्थः॥सहसा॰समययासमयसंज्ञयालास्यपरयाला
स्येनस्वेपरंतास्वर्येयस्यास्तयास्त्रीकर्तृकंनृत्यंलास्यमित्युच्यते॥नवात्मानमानंदभैरवंमन्येजानामि
नवरसमहातांडवनटंनवभिःशृंगारादिभीरसैर्महदुद्धतंतांडवंपुंकर्तृकंनृत्यंतांडवमित्युच्यते॥तत्र
॥६५॥ नटंअभिनेतारंउभाभ्यांआनंदभैरवीमहाभैरवाभ्यांएताभ्यांजगतउदयविधिमुत्पत्तिमुद्दिश्य॥ ॥६५॥
कुलेइत्सतेआह॥दययेतिदग्धस्यलोकस्यपुनरुत्पादनेनिमित्तेदयातयासनाथाभ्यांमिलिताभ्यांज
नेउत्पन्नंजनकजननीमत्मातापितृमत्जगत्प्रपंचःइदंपूर्वोक्तंलास्यनाट्यसंविधानप्रतिपादनात्
प्रकृतिपुरुषयोर्दर्शनेजगदुत्पत्तिःलास्यनृत्यावसानेमेवजगत्संहृतिरितिकौलसिद्धांतः॥अत्रेत्थंप
दयोजना॥हेभगवतितवमूलाधारेलास्यपरयासमययासहनवरसमहातांडवनटंनवात्मानंमन्ये॥
उदयविधिमुद्दिश्यएताभ्यांदययासनाथाभ्यांइदंजननीजनकमज्जज्ञे॥अयंभावःआधारस्वाधि
ष्ठानयोस्तामिस्त्रलोकत्वात्तत्रकौलानामनधिकारात्समययाराधनाभावेपिस्वमतानुसारेणसह

स्वदलकमले निषेव्येव भगवती आधारस्वाधिष्ठानयोर्निषेव्येति महाभैरवी समयापदेनोच्यत इति॥अ
त्रेदमनुसंधेयं॥आधारचक्रं त्रिकोणं आधारे बिंदुस्तिष्ठतीति च तावत्स्वसिद्धं॥अत्र कौलमते त्रिकोणमेव
बिंदुस्थानं स एव बिंदुस्तत्राराध्यः अत एव कौलास्त्रिकोणे निरस्तं बिंदुं समर्चयंति॥तत्र त्रिकोणं द्विवि
धं चक्रांतर्गतनवयोनिमध्यवर्तियोनिः सुंदर्यास्तरुण्याः प्रत्यक्षयोनिश्च॥श्रीचक्रगतनवयोनिम
ध्यगतयोनिं भजंतो उभयत्र च श्रीपीठादौ लिखितां पूर्वकौलाः पूजयंति॥तरुण्याः प्रत्यक्षयोनिमुत्तर
कौलाः पूजयंति॥उभयोर्योन्योर्द्वयं बाह्यमेव नांतरं अतस्तेषां मूलाधारचक्रमेव पूज्यं तत्रैव स्थिता कुंडलि
नी शक्तिः कौलिनी स्यूयते सैवोपास्या त्रिकोणपूजकानामिति रहस्यं॥एवं कुंडलिनी शक्तिर्बिंदुरूपिणी
निद्राणैव संपूज्या सर्वदा निद्रास्वाभाव्यात् सा पूजितापि सती कुंडली प्रबोधो यदा स्यात्तदा तत्क्षण एव मु
क्तिः कौलानां॥अत एव क्षणमुक्तयः कौला इति व्यवहारः॥तत्र सुरामांसमधुमद्यादिद्रव्यैः समाराध
नं वामाचारप्रवृत्तास्तत्प्रत्यक्षत्रिकोणे बिंदुस्थानमनर्थं छत्रं कृत्वा संपूजयंति॥अधोमुखं त्रिकोणं
अधोमुखमेव छत्रं पूजयंति॥दिगंबरक्षपणकादयस्तु स्त्रियमुत्तानां कृत्वा ऊर्ध्वत्रिकोणं पूजयंतीति रह
स्यं॥तत्र बहुवक्तव्यमस्ति तत्तु अवैदिकमार्गत्वात् स्मरणार्हमपि न भवति तथापि निषिद्धत्वेन समयमा

६४

तमार्गप्रदर्शनोपयोगितयादिश्याप्युक्तमित्यलमतिविस्तरेण॥ अथ समयमतं निरूप्यते॥ त्रिकोणादि
चक्रषट्कं आधारादिषट्कात्मना परिणतमिति प्रागेव प्रतिपादितं॥ तत्र श्रीचक्रे त्रिकोणे बैंदवस्थानमि
ति तावत्सुप्रसिद्धं तत्र त्रिकोणे। त्र्यैकोणनिर्माणे त्रिकोणाद्यैव बिंदुस्थानं भवति तच्चतुष्कोणमेव तत्
पुसहस्रदलकमलांतर्गतं चंद्रमंडलमिति बहुधा प्रपंचितं॥ तच्च चतुष्कोणमध्ये बैंदवस्थानं सुधा
सिंधुः समुद्रः तद्बहुधा प्रपंचितं॥ यच्च बिंदुस्थानबाह्यपूजा तरुणी त्रिकोणपूजा चेति तद्दूरत एव निर

॥६६॥ स्तमिति ध्येयं॥ अत एव समयिनो सहस्रदलकमले समयायाः समयस्य चरंभोः पूजा॥ समया नाम ॥६६॥

रंभुना साम्यं पंचविधं यातीति समया रंभोरपि देव्या सह पंचविधं साम्यं यातीति समयः ततं अत उ
भयोः समप्राधान्येनैव साम्यं विद्यते तत्पंचधा साम्यं तु अधिष्ठानसाम्यमनुष्ठानसाम्यमवस्थासाम्यं
रूपसाम्यं नामसाम्यं चेति पंचविधं॥ समययोः प्रधानयोरेव शिवयोः पथानवाधार द्दस्वधिष्ठान
साम्यमुक्तं उपयोराधारचक्रस्याधिष्ठानरूपत्वात्॥ अनुष्ठानसाम्यं॥ जनक जननी मज्जगदिदमित्य
नेन प्रतिपादितं उत्पादकक्रियायां उभयोर्व्याप्रियमाणत्वात्॥ अवस्थासाम्यं लास्यतांडवरूपाभ्यां
प्रतिपादितं लास्यतांडवयोर्नृत्यतांडवयोर्नृत्यरूपेणैकत्वमुक्तं प्राक्॥ रूपसाम्यं तु आरुण्यमुभयोः

तंत्रांतरसिद्धं ॥ जपाकुसुमसंकाशौ मधुघूर्णितलोचनौ ॥ जगतः पितरौ वंदे भैरवीभैरवात्मकावि
ति ॥ यद्वा ॥ नवात्मानमिति रूपसाम्यं नामसाम्यं च प्रतिपादितमिति ध्येयं ॥ एवमेवेतरत्राप्यूह्यं ॥ य
था ॥ तडित्वंतमित्यादौ तडित्वान् तडित्वतीति नामरूपसाम्ये यद्यपि स्थिरसौदामिनीरूपायास्तडि
द्रूपत्वान् तद्वत्वं नास्ति तथापि सौदामिन्याः स्थिरत्वमिति सर्वदा तडिद्युक्तत्वमिति तडित्वतीत्युक्ति
र्युक्तेत्यनुसंधेयं ॥ मणिपूरे मणिपूरमधिष्ठानमित्यधिष्ठानसाम्यं मणिपूरैकनिलयमित्यनेन न
प्रतिपादितमनुष्ठानसाम्यं ॥ स्फुरन्नानारत्नाभरणपरिणद्धेंद्रधनुषमित्यनेन प्रतिपादितं शावषेण्य
त्योदवस्थासाम्यं प्रतिपादितमिति ध्येयं ॥ तव स्वाधिष्ठानइत्यादिश्लोके स्वाधिष्ठानेत्यनेन अधिष्ठा
नसाम्यमुक्तं ॥ महतीमित्यनेन महासंवर्त्तात्मकरूपनामसाम्ये प्रतिपादिते स्वाधिष्ठानगताग्निसं
श्रयणमवस्थासाम्यं लोकान्दहतीत्यनुष्ठानसाम्यं प्रतिपादितं ॥ अनाहतचक्रे अनाहतमधिष्ठा
नमिति अधिष्ठानसाम्यमुक्तं ॥ कृतभुक्तपिकानुरूपे तयो रूपसाम्यं ॥ नामसाम्यं च निर्वातदीपत्वो
त्या अवस्थासाम्यं ॥ [illegible] मनध्यानसाम्यमिति रहस्यं ॥ विशुद्धिचक्रे विशुद्धिचक्रमधि

६५

शिवं सेवरस्यनेन नामसाम्यं ॥ शिवकिरणसारूप्यमित्यनेन अवस्थासाम्यमिति तैवाग्नाच ग्नाचक्र
मित्यनेनाधिष्ठानसाम्यमुक्तं तपनशशिकोटिद्युतिधरमित्यनेन रूपसाम्यमुक्तं ॥ परं शंभुमित्यनेन ना
मसाम्यं प्रतिपादितं ॥ यमाराध्यन्नित्यनेनावस्थासाम्यमुक्तं ॥ मुक्तिप्रदत्वमनुष्ठानसाम्यमिति
साम्यपंचकं विज्ञेयं ॥ एतदतिरहस्यं शिष्यानुजिघृक्षयात्र कार्शितं ॥ अतः समयपूजकाः समयिनस्तेषां
षडूर्ध्वपूजा न नियता अपितु सहस्रदलकमलपूजा ॥ सहस्रदलकमलपूजानामे सहस्रदलकमल
स्य बैंदवस्थानत्वेन तन्मध्यगतं च द्रमं उलं चतुरस्रात्मना तन्मध्यबिंदु पंचविंशतितत्वातीत षट्त्रिंशा
त्मकं शिवशक्तिमेलनरूपसादाख्यात्मनानुसंधानं अत एव समयमते बाह्याराधनं दूरत एव निर
स्तं षोडशोपचाररूपपूजांगकलापश्चैतनोपि दूरत एव ॥ तथाहि आधारादिषट्चक्राणां त्रिकोणादिष
ड्कैस्येन तादात्म्यं बिंदुस्थानस्य चतुरस्रस्य सहस्रदलकमलत्वेन तादात्म्यं बिंदुशिवयोस्तादात्म्यं
एवं च देहशिवयोस्तादात्म्यमिति तादात्म्यत्रयं चक्रमंत्रयोरैक्यं पूर्वमेवोक्तमिति तेन सह चतुर्विधैक्यं
समयिनां समयाराधनमिति महद्रहस्यं ॥ अत्र किंचिदुच्यते ॥ समयिनां चतुर्विधैक्यानुसंधानमेव
भगवत्याः समाराधनमित्येतत्सर्वसंमतं ॥ केचित्तु षोडशैक्यमाहुः यथा ॥ नादबिंदुकलातीतं भा

गवतत्त्वं सर्वागम रहस्यं॥ तत्र नादः परापश्यंती मध्यमा वैखरी भेदेन चतुर्विध इति प्रागेवोक्तं॥ प
रा त्रिकोणात्मिका॥ पश्यंती अष्टकोणचक्र रूपिणी॥ मध्यमा मिश्राकार रूपिणी वैखरी चतुर्दशार रू
पिणी॥ शिवचक्राणामत्रैवांतर्भावः प्रतिपादित इति चतुश्चक्रात्मकं श्रीचक्रं नादशब्द वाच्यं॥ बिंदुनी
म षट्चक्राणि मूलाधार स्वाधिष्ठान मणिपूरानाहत विशुद्ध्याज्ञात्मकानि बिंदुशब्दवाच्यानि पूर्वमेवो
क्तानि॥ कलाश्चितौषड्वाशादित्यादिश्लोके प्रतिपादिताः षष्ठ्युत्तर त्रिशतात्मिकाः॥ एवं नाद बिंदुक
लातीता भगवती सहस्रदलकमलं बिंदुतीतं बेदवस्थानात्मकं सुधासिंधुपरपर्यायं सरघाशब
वाच्यं॥ नादातीतत्वं तु त्रिपुरसुंदर्यादिना ब[illegible]यं दर्शादष्टादर्शनित्याद्यपरपर्याया कएईलह्रीमि
त्यादिमंत्रवर्णनामकपंचाशद्वर्णात्मक षष्ठ्युत्तरत्रिशत संख्यापरिगणित महाकलात्मक पंचदशकला
तीतसादाख्या श्री विद्यापरपर्याया चित्कलाशब्दवाच्या ब्रह्मविद्यापरपर्याया भगवतीति नादबिंदु
कलातीतं भागव तं तत्त्वमिति तत्त्वविद्रहस्यं॥ अत्र बिंदुकलानां परस्परैक्यानुसंधानं षोढा भव
तीति षोढा ऐक्य माहुः॥ एवं भगवती षड्विधैक्येन संभाव्य पूजयित्वा सादाख्यायां विलीनो भव
ति॥ तदनंतरं षड्विधैक्यानुसंधान महिम्ना गुरुकटाक्षसंजात महावेधमहिम्ना भगवतीस्फटितमूला

६५

धारस्वाधिष्ठानास्मकं च कण्ठयं भित्वा मणिपूरे प्रत्यक्षं प्रतिभाति॥ महावेधप्रकारः पूर्वमभ्यासद
शायां गुर्वं कृपरतं त्रां महाविद्यां गुरुमुखादेवस्वीकृत्य संदर्शितदेवतापूर्वं मूलमंत्रस्य शुद्धजपं गु
रूपदिश्य मोर्गे ण कुर्वन् अभ्युयुक्तः शुक्लपक्षे महानवमी शब्दाभिधेयायाम् प्यां निशि समये गु
रोः पादोपसंग्र हणं कर्तव्यं तन्महिम्ना गुरोस्तदानीं कर्तव्यहस्तमस्तकसंयोगे पुनर्मंत्रोपदेश
षड्‌क्रमपूजाप्रकारोपदेशषड्विधैक्यानुसंधानोपदेशश्च स्यात् महावेधः शैवः सादाख्यायाः प्रका
शरूपो जायत इति गुरुरहस्यं॥ एवं महावेधे जाते भवनी मणिपूरे प्रत्यक्षा भवति सा समाराध्या
अर्घ्यपाद्यादिभूषणप्रतिपादनपर्यंतं पूजाकलापं मणिपूरे निर्वर्त्य अनाहतमंदिरं भगवतीनी
त्वा धूपादिनैवेद्यहस्तप्रक्षालनांतं कर्मकलापं तत्रैव समाप्य विशुद्धौ भगवतीं सिंहासनासी
नां सरविभिः संलापात् संभाषणं कुर्वीणां शुद्धस्फटिकसदृशैर्मणिभिः संपूजयेत्॥ शुद्धस्फटि
कसदृशा मणयो नमो क्तिकादयः किंतु तदीयषोडशदलगतषोडशचंद्रकला इति रहस्यं॥ एवं
संपूज्य आज्ञाचक्रं नीत्वा देवीं कामेश्वरीं नीराजनाविधिभिरनेकैः संप्रीणयेत्॥ अनए वोक्तं
कर्णावतंसस्तु नो मदीयायां॥ आज्ञासकद्विदलपद्मगते तदानीं विद्युन्निभे रविशशिप्रभुतोरूम

टाभेगंडस्थलशांतिफल्लकरदीपजालकर्णावतंसकलिकेकमलायताक्षीति॥एवमाज्ञाचक्रेनीरा
जनविधिं कृत्वासंप्रीणयेत्॥तदनंतरं प्रतिति विद्युल्लतेवसहस्रदलकमलमनुप्रविश्यसुधाब्धौपंच
कल्पवृक्षांतरस्थारत्नछायायांमणिद्वीपेसरघामध्येसदाशिवेनसार्द्धं विहरमाणावर्ततेनदातिरस्क
रिणीप्रसार्यसमीपमंदिरेस्वयंनिवसेत्॥यावद्भगवतीपुनर्निर्गतामूलाधारकुंडंप्रविशतितावच
त्पर्यंतंस्थानव्यमितिसमयमतरहस्यं॥अत्रशांकरभगवत्पादानांचतुर्विधेक्यानुसंधानानंत
रंमणिपूरेप्रत्यक्षायाभगवत्याःस्वरूपंकणक्वाचीदामेत्यादिध्यानप्रतिपादितंचतुर्भुजंधनुर्बाण
पाशांकुशायुक्तहस्तंतन्मतानुसारिणांमिषितथैवप्रतिभातिभगवती॥अस्माकंतुषड्विधैक्यानु
संधानानंतरंमूलाधारद्विकंभित्वामणिपूरेप्रसन्नाभगवतीदशभुजाधनुर्बाणपाशांकुशावर
दाभयपुस्तकाक्षमालावीणाहस्तामन्मतैकदेशिनांपाशांकुशपुंड्रेक्षुचापपुष्पबाणजपमालि
लिकापुस्तकाभयवरदकराकरद्वयवक्षस्थलस्थापितवीणाभयमस्माकंसंमतमेवतदुक्तंवर्णाव
तंसभक्तौमर्दीयायां॥भवानिश्रीहस्तैर्वहसिफणिपाशांसृणिमथोधनुः...

॥६९॥

समयिनां प्रसक्तं परिहरमाणास्ते भगवतीं समयिनां सहस्रदलकमलपर्यंतं आंतरपूजाकर्त
व्या सहस्रदलकमले तु तिरस्करिणीप्रसारणपर्यंतं दर्शनमेव समाराधनं ॥ यदुक्तं सुभगोदये ॥ सू
र्यमंडलमध्यस्थां देवीं त्रिपुरसुंदरीं ॥ पाशांकुशधनुर्बाणहस्तां ध्यायेत्स साधकः ॥ त्रैलोक्यं मोह
यामास नरनारीगुणैर्युतमिति ॥ चर्चास्तोत्रेपि ॥ ये चिंतयंत्यरुणमंडलमध्यवर्तिरूपं तवांब न
वयावकपंकरम्यं ॥ तेषां सदैव कुसुमायुधबाणभिन्नैर्वक्षस्थला मृगदृशो वशगा भवंतीति ॥
अत्र समयिनां बाह्यपूजानिषेधात् सूर्यमंडलांतर्गतत्वेन पूजनं निषिद्धमाशंक्य ॥ तन्न ॥ ब्रह्मांडस्थि
तपिंडांडस्थितयोः सूर्ययोरैक्यात् सूर्यस्य चंद्रकलामृतनिष्यंदवशात् उज्जीवनं अपां रसमु
द्भवसन्निविष्टस्या प्रतिपादितमिति नित्या प्रतिपादितं ॥ अतश्चंद्रकलाविद्यायाः सूर्यमंडलसंप
र्कात्तेजस्तिरोधानं स्यादिति केचन संगिरंते तन्न दुष्यपास्तं वेदितव्यं ॥ अत एव पिंडांडब्रह्मांडय
द्वयोरैक्याच्चंद्रमंडलांतर्गतत्वेन चंद्रकलाविद्यायाः पूजनं युज्यते ॥ यत्तु पूर्वोक्तं चंद्रबिंबगतत्वे
न देव्याः पूजननिषेधकवचनं यत्तु आंतरचंद्रस्य आज्ञाचक्रोपरि स्थितस्य सहस्रकमलांत
र्गतचंद्रकलामृतनिष्यंदैरुज्जीवनमिति तत्र तस्याः पूजानिषेधो नास्तीति अत एव पिंडांड

॥६९॥

ब्रह्मांडचंद्रयोरैक्यात् ब्रह्मांडस्थितचंद्रमंडलेपिपूजानिर्बंधोनास्तीत्येवंपरं॥एवंहृदयकमल

एवसमाराधिताभगवती ऐहिकानिफलानिसर्वाणिददातिचत्रिन्यादिमुक्ताध्याता सारस्वतंप्र

दातियावकरसमुनाध्यानावशीकरणंददाति॥मुखंबिंदुंकृत्वेत्यादिनाध्यातातादृशंफलंददा

ति॥हृदयकमलएवहोमादिकंतर्पणादिकंकार्यंऐहिकफलसाधनमिति॥स्मरंयोनिंलक्ष्मी

मित्यादिश्लोकव्याख्यानावसरेनिपुणतरमुपपादितं॥अतःसमयिनामैहिकामुष्मिकफल

साधनोपायआंतरपूजेतिसमयमततत्त्वं॥अत्रभगवत्यादेराधारादिकमलक्रमविज्ञाय आ

ज्ञाचक्रादिक्रमेणअवरोहक्रमेणपूजाप्रकारःकथितः॥अयमाशयः॥आत्मनआकाशःसंभू

तःआकाशाद्वायुःवायोरग्निःअग्नेरापःअद्भ्यःपृथिवीतिश्रुतौतत्क्रमनवलोक्यअवरोहक्रम

उक्तः॥अतएवस्वाधिष्ठानानंतरभाविनोमणिपूरस्यतदधःप्रदेशेनिरूपणंयुज्यतेआधार

स्वाधिष्ठानानंतरंमणिपूरकावस्थानमितिसर्वयोगशास्त्रसिद्धमपिसंवर्ताग्निदग्धस्यजग

तःउज्जीवनानंतरंउत्पत्तिवत्क्रमिस्यवगंतव्यं॥एतच्चशुकसंहितायां॥शृणुदेविप्रवक्ष्यामीत्या

रभ्यएकनवतिश्लोकैःश्रीचक्रस्यषट्कोणाप्रस्तुतइदानींसप्रवक्ष्यामीत्यारभ्यसार्द्धत्रयश्लो

६५

॥७०॥

कैः सप्रपंचं प्रतिपादितं तत्तत एवावधार्यं॥ नन्वत्तुर्ध्वमूलमवाक्शाखं वृक्षं यो वेद संप्रतीति श्रु
तेः देहरूपवृक्षस्य शिर एव मूलं करचरणादयः शाखाः एतच्च षट्कमलानां कदलीकुसुमोपमा
नां अधोमुखानामवरोहक्रमेण कमलान्युत्तानानीति तत्र पूजासु करोति॥ तदानुगुण्येन भगव
त्पादैरस्त्वकमिति वा मं॥ तादात्म्यध्यानव्यतिरेकेण पूजाया असंभवात्॥ संभवे वा श्रीचक्रगत
त्रिकोणादिषट्कोणामधोमुखत्वाभावाच्छ्रीचक्रगतमूलाधारस्थितामेव देवीं प्रबोधयेदिति न
त्रैव प्रबोधनियमात्॥ मूलाधारादिक्रमेणैव पूजा समर्पितानां कल्पादीनां कार्येति परमगुरुमु
खादवगतं रहस्यं॥ वामकेश्वरमहातंत्रेऽप्यात्मपूजायां विशेष उक्तः॥ पाशांकुशौ तदीयौ तु राग
द्वेषात्मकौ स्मृतौ॥ शब्दस्पर्शादयो बाणा मनस्तस्याभवद्धनुः॥ करणेंद्रियचक्रस्थां देवीं सवि
त्स्वरूपिणीं॥ विश्वाहंकारपुष्पेण पूजयेत्सर्वसिद्धिभागिति॥ अयमुपासनाविधिः क्रियात्म
कोनादरणीयः॥ ८१॥ एवं समयमतं सप्रपंचं समयायाभगवत्याः किरीटप्रभृतिपादां
तं वर्णयति॥ गतैर्माणिक्यत्वं गगनमणिभिः सांद्रघटितं किरीटं ते हैमं हिमगिरिसुते कीर्तय
ति यः॥ स नीडेयच्छायाच्छुरणशबलं चंद्रशकलं धनुः शौनासीरं किमिति न निबध्नाति धिषणां॥ ८२॥

॥७०॥

गतैः प्राप्तैः माणिक्यत्वं रत्नभावं गगनमणिभिः द्वादशादित्यैः तेषां अत्यंतं सन्निकृष्टस्येवार्थं भू
षणगगनमणित्वं युज्यते॥ सांद्रघटितं सांद्रं नीरंध्रं यथा भवति तथा घटितं रचितं किरीटं मुकुटं हैमं
हेम्नो विकारं हिमगिरिसुते पार्वति कीर्तयति वर्णयति यः कवींद्रः सकवींद्रः नीडे यच्छायास्फुरण
वत्वं नीडं गेहं तत्र रचितं नीडे यं रत्नजातं तस्य छायात्तयास्फुरणेन व्यापनेन शाबलं शबलं चं
द्रशकलं चंद्रखंडं धनुः कोदंडं सौनासीरं सुनासीर इंद्रः तस्य संबंधि सौनासीरं किमिति न निब
ध्नाति धिषणां बुद्धिं॥ अन्वयेथ पदयोजना॥ हे हिमगिरिसुते माणिक्यत्वं गतैः गगनमणिभिः सांद्र
घटितं हैमं किरीटं यः कवींद्रः कीर्तयति स कवींद्रः नीडे यच्छायास्फुरणशाबलं चंद्रशकलं सौना
सीरं धनुरिति धिषणां किं न बध्नाति॥ अयं भावः॥ किरीटवर्णनां कर्तुमुद्युज्जानः कवीश्वरः तत्र
स्थितं चंद्रशकलं सौनासीरं धनुरिति धिषणां किं न बध्नाति तत्र स्थितचंद्रे रखां नानारत्नमणिकां
तिस्फुरितां दृष्ट्वा इंद्रचापत्वेन कथं ना शंके तेअवश्यं तस्य तर्को जायत इति॥ अत्र उत्प्रेक्षालंकारः
चंद्रशकलस्य इंद्रचापत्वेनोत्प्रेक्षणात्॥ यद्वा अपह्नुत्यालंकारः॥ इदमिंदुशकलं न भवति अपि
त्विंद्रचाप इति॥ अपह्नवस्य प्रतीभानात्॥ यद्वा संदेहालंकारः अयमिंद्रचापः किं उत चंद्रशकल

६८

॥७३॥

इति संदेहोऽथवा नान॥ यद्यतिशयोक्तिरलंकारः इंदुशकस्येंद्रचापत्वेनाध्यवसानात् स्वधिषणां इंद्र
किमिति न निबध्नातीति सामान्योक्तिरेतेषां मध्ये एकस्य बाधान्यमितरस्योपसंज्ञेनेमिति विनिग
मकप्रमाणाभावात् संदेहः संकरः उत्प्रेक्षातिशयोक्त्योः स्पष्टे अपन्हुत्यस्तु तल्लिंगाभावादपि किमि
ति धिषणां न निबध्नाति सपन्हवोल्लेखस्य शक्यत्वात् संदेहस्तु चंद्रशकले दृष्टे इंद्रचापस्य स्प
ष्टोत्रुटत्वा दुल्लेखवयित्रुं शक्यएवेति संदेहसंकर एवेज्यायान्॥ ७२॥ धुनोतु ध्वांतं नस्तुलितदलि
तेंदीवरवनं घनस्निग्धंश्लक्ष्णं चिकुरनिकुरुंबं तव शिवे॥ यदीयं सौरभ्यं सहजमुपलब्धुं सुम
नसो वसंत्यस्मिन्मन्ये बलमथनवाटीविटपिनां॥ ७३॥ धुनोतु अपनुदतु ध्वांतं तमः तत्तिमिरं
नः अस्माकं तुलितदलितेंदीवरवनं तुलितं सदृशीकृतं दलितं भिन्नं विकसितमित्यर्थः॥ इंदी
वराणां नीलोत्पलानां वनं यस्य तत् घनस्निग्धंश्लक्ष्णं घनं सांद्रं अविरलं स्निग्धं स्नेहयुक्त
मिव स्निग्धं श्लक्ष्णं मृदु एवमेषां विशेषणानां समासः चिकुरनिकुरुंबं चिकुराणां केशानां नि
कुरुंबं समूहः केशपाशो धम्मिल्ल इत्यर्थः॥ तव हे शिवे भगवति यदीयं यस्य धम्मिल्लस्य संबं
धि सौरभ्यं परिमलं सहजं स्वभावसिद्धं उपलब्धुं समाक्रष्टुं सुमनसः पुष्पाण्यपि वसंति आसन्न

॥७३॥

अस्मिन्धम्मिल्लमन्येऽहं वल्लमथनवाटीविटपिनां वल्लमथनो बलारिरिंद्रः वबयोरभेदोपचारः

अनुप्रासार्थमंगीकृतं तस्य वाटी उद्यानं तत्र विटपिनः कल्पवृक्षाः तेषां॥ अत्रेत्थं पद्ययोजना॥ हे द्रावेन्नु

लितदलितेंदीवरवनं घनस्निग्धं श्लक्ष्णं तत्र चिकुरनिकुरंबेन ध्वांतं धुनोति॥ यदीयं सहजसौंदर्यं

उपलभ्य अस्मिन् वल्लमथनवाटीविटपिनां सुमनसः वसंतीति मन्ये॥ अत्रोत्प्रेक्षालंकारः॥ केशपा

शादिवासनार्थमेव धृतानां कल्पवृक्षकुसुमानां अन्यथात्वेनोत्प्रेक्षणात्॥ तल्लक्षणं॥ संभावनम

थोत्प्रेक्षा प्रकृतस्य परेण यदिति॥ ८३॥ ततोऽनुक्षेमं नस्तव वदनसौंदर्यलहरीपरीवाहस्रोतःसरणि

रिव सीमंतसरणिः॥ वहंती सिंदूरं प्रबलकबरीभारतिमिरद्विषां वृंदैर्वंदीकृतमिव नवीनार्ककि

रणं॥ ८४॥ ततोऽनु विस्तारयतु दिशतु इत्यर्थः क्षेमं योगक्षेमात्मकं शुभं नोऽस्माकं तव वदनसौंदर्यल

हरीवाहस्रोतःसरणिरिव मार्ग इव स्थिता सीमंतसरणिः सीमंते धम्मिल्लमध्यप्रदेशे सरणिः स

रण्याकारा कारिता रेखा वहंती धारयंती सिंदूरं सिंदूरपरागं प्रबलकबरीभारतिमिरद्विषां प्रब

लोः केशपाशात्मना लब्धजन्मतया प्रबलो स्तोचे तेक बरीभार एव केशपाशनिचय एव तिमिराणि

तान्येव द्विषः शत्रवः तेषां वृंदैः समूहैः वंदीकृतं वंदीग्रहणावरुद्धं वेति संभावनायां कवप्रौढोक्ति

परी

60

स्थले स्यंदन इव शब्दस्य संभावनैवार्थः॥ अत्रैन्ये सादृश्यमतिं विवेकः निविनार्ककिरणं नवीनं स्र

॥७२॥

स्थले स्थंचरा ब्दस्य संभावनैवार्थः॥ अत्रेन्ये सादृश्यमतिं विवेकः निविनार्ककिरणं नवीनत्र
नः कालीनः अर्कः सूर्यस्तस्य किरणस्तं॥ अत्रेत्थं पदयोजना॥ हे भगवत्ति वदनसौंदर्यैलहरीपरि
वाहस्रोतः सरणीरिव स्थितातव सीमंतसरणिः प्रबलकबरीभारतिमिरद्विषां वृंदैर्बंदीकृतन
वीनार्ककिरणमिव सिंदूरं वहंती नः क्षेमं तनोतु॥ अत्रोत्प्रेक्षालंकारः सीमंतसरणेः स्रोतःस
रणित्वेनोत्प्रेक्षणात्॥ न चायमुपमालंकारः स्वतः सिद्धमनुपजीव्य कविप्रौढोक्तिमेवोपजी
व्योत्थानात्॥ न च संभावनापरस्येवशब्दस्य समासाविधानाभावादुपमैवेचैंति वाच्यं॥ इवे
नसहेति सामान्येनोभयार्थस्येवशब्दस्य ग्रहणादुभयत्रापि समासोस्तीति ध्येयं॥ उत्तरा
र्धेप्युत्प्रेक्षालंकारः सिंदूरस्य सूर्यकिरणात्मनासंभावनात्॥ कबरीभारस्य तिमिरत्वारोप
णात्रूपकालंकारोपि वर्तते॥ एवमनयोरंगागीभावेन संकरः॥ संभावनाप्रतिरूपकस्यापि
मिश्रत्वात्॥ तुलितदलितेंदीवरवनमित्यत्र उपमालंकारः अनयोः संसृष्टिः तिलतंडुलवत्
संसृष्टयोरुत्संसृष्टिः क्षीरनीरवत्संबंधः संकरः॥ ॥ ४६॥ अरालैः स्वाभाव्यादलिकुलसश्री
भिरलकैः परीतं ते वक्त्रं परिहसति पंकेरुहरुचिं॥ दरस्मेरे यस्मिन्दशनरुचिकिंजल्करुचिरे सुगं

॥७२॥

ते

अरालैः कुटिलैः स्वाभाव्यात् स्वभावतः अलिकलभस
घौमाद्यंति स्मरदहनचक्षुर्मधुलिहः ॥ ७८ ॥ अरालैः कुटिलैः स्वाभाव्यात् स्वभावतः अलिकलभस
श्रीभिः अलिकलभैः भ्रमरपोतैः सश्रीभिः समानशोभैः समासांतविधेरनित्यत्वात्कप्रत्ययाभा
वः ॥ अलकैश्चूर्णकुंतलैः परीतं परिवृतं परीतं आप्तं तेन वक्त्रं वदनं परिहसति उपहसतीति तच्छील
वतीस्यर्थः ॥ पंकेरुहरुचिं पंकेरुहस्य रुचिं सौभाग्यं दरत्स्मेरे दरमीषत्स्मेरो विकासो यस्य तस्मिन्
दशानरुचिकिंजल्के रुचिरे दशानां दंतानां रुचिरे व किंजल्काः केसरास्तैः रुचिरे सुभगे सुगंधौ प
मरगंधौ माद्यंति नंदंति स्मरदहनचक्षुर्मधुलिहः स्मरदहनस्य स्मरारेरीश्वरस्य चक्षुंष्येव भ्रमरा
जितमन्मथस्यापि वदनसौंदर्यदर्शनं मादहेतुरिति किमुत वक्तव्यमन्तसौंदर्यस्य रूपमिति भावः ॥
अत्रैवं पदयोजना ॥ हे भगवति स्वाभाव्यादरालैः अलिकलभसश्रीभिः अलकैः परीतं ते वक्त्रं पंके
रुहरुचिं परिहसति ॥ दरस्मेरे दशानरुचिकिंजल्करुचिरे सुगंधौ यस्मिन् स्मरदहनचक्षुर्मधु
लिहः माद्यंति ॥ अत्रोपमालंकारः ॥ पंकेरुहरुचिं परिहसतीत्यनेन वक्त्रस्य कमलसादृश्यप्र
तीतेः ॥ अलिकलभसश्रीभिरित्युपमालंकारः ॥ अनयोरंगांगीभावेन संकरः दशानरुचिकिंज
ल्करुचिरे इत्यत्र रूपकं दशानरुचीनां किंजल्कत्वेनारोपणात् ॥ स्मरदहनचक्षुर्मधुलिह इत्यत्र

स्क

69

॥७३॥

रूपकं चक्षुषां मधुलिड्वेनारोपणात्॥ अनेन रंगांगीभावेन संकरः संकरद्वयस्य संसृष्टिः॥८५॥
ललाटं लावण्यद्युतिविमलमाभाति तव यद्द्वं द्वितीयं यन्मन्ये मुकुटघटितं चंद्रराकलं॥ विपर्या
सन्यासादुभयमपि संभूय च मिथः सुधालेपस्यूतिः परिणमति राकाहिमकरः॥८६॥ ललाटं नि
टिलं लावण्यद्युतिविमलं लावण्यं। धावल्यमिति[?] द्युतिः ज्योत्स्ना तया विमलं स्निग्धमाभाति ओ
समंताद्भाति तव यत् द्वितीयं तत् मन्ये शंके मुकुटघटितं किरीटसंकीलितं चंद्रराकलं चंद्रार्द्धं वि
उं विपर्यासन्यासात् ललाटं अयाकोणं[?] चंद्रराकलं ललाटस्योपरि ऊर्ध्वभंगं वर्तते॥ उभयोर्विप
र्यासन्यासः॥ भंग चतुष्क संमेलनं तस्मात् उभयमपि ललाटचंद्रराकले संभूय मिलित्वा॥
कार अति राय वा ची॥ मिथः अन्योन्यं सुधालेपस्यूतिः सुधाया अमृतस्य लेपः विलेपनं स्यूतिः
सीवनं यस्य सः अमृतरससांद्र इत्यर्थः॥ परिणमति नाटरूपं भजति तदाकाराकारितं इत्यर्थः॥
राकाहिमकरः राकायां पूर्णिमायां हिमकरश्चंद्रः॥ अत्रेत्थं पर्योजना॥ हे भगवति तव यत् ल
लाटं लावण्यद्युतिविमलं आभाति तत् मुकुटघटितं चंद्रराकलं मन्ये॥ यद्यस्मादुभयं विपर्यास
न्यासात् मिथः संभूय च सुधालेपस्यूतिः राकाहिमकरः परिणमति पूर्णिमायां पूर्णता चंद्रस्य

को

॥७३॥

कथं भवानी किरीटे अर्द्धदेहविश्लथया चंद्रः परिदृश्यत इति पूर्णिमाचंद्रं निमित्तीकृत्य ललाटमु
त्प्रेक्ष्यते ॥ अत्रोत्प्रेक्षालंकारः ॥ ललाटस्यार्द्धचंद्राकारेणोत्प्रेक्षणात् ॥ यद्वा द्वितीयरतिशयो
क्तिरलंकारः राकाहिमकरस्य ललाटकिरीटघटितचंद्ररेखाद्वितीयनिर्माणसंभवेऽपि संबं
धकथनात् ॥ अत्र कविकल्पितवस्तुचंद्रसौंदर्ययोरभेदाध्यवसायः ॥ उत्प्रेक्षातिशयोक्त्योः
तद्द्वयस्यायमर्थः ॥ अध्यवसाये विषयीभूते अध्यवसानक्रियारूपस्य प्राधान्ये यत्र उत्प्रेक्षोत्था
नं यदा अध्यवसाये विषयभूते अध्यवसितस्यैव प्राधान्यं प्रतीयते तदा अतिशयोक्तेरुत्थानं ॥
अध्यवसायो नाम निश्चयज्ञानं तच्च कविप्रौक्तिसिद्धं न वास्तवं ॥ उत्प्रेक्षायास्तु अध्यवसानक्रि
याप्राधान्यस्य द्योतकाः एवमन्ये शंके ध्रुवमित्यादयः स्वरूपोत्प्रेक्षाद्योतकाः ॥ हेतूत्प्रेक्षायां हेतु
रेव ॥ फलोत्प्रेक्षायां फलमेव द्योतकं ॥ अत एव स्वरूपोत्प्रेक्षायामिवाद्यभावे हेतुफलयोरसंभवात्
अतिशयोक्त्युत्प्रेक्षयोर्भेदाभावात्सैवोत्प्रेक्षा अतिशयोक्त्यावंतर्भवतीति दिक् ॥ ७ ॥ भुवो
भुग्ने किंचिद्भुवनभयभंगव्यसनिनि त्वदीये नेत्राभ्यां मधुकररुचिभ्यां धृतगुणं ॥ धनुर्मन्ये स

व्येतरकरगृहीतं रतिपतेः प्रकोष्ठे मुष्टौ च स्थगयति निगूढांतरं मुमे ॥ ८७ ॥ भ्रुवौ भ्रुकुटी भुग्ने आ
वाकुंभंगतया वल्लयिते किं चित्ते नासंतं भुवनभयभंगव्यसनिनि भुवनानां जगतां भयस्य उप
द्रवस्य भंगे नाशकरणे व्यसनं तदेव प्रवणता अस्यास्ति निभुवनभयभंगव्यसनिनी तस्याः सं
बुद्धिः त्वदीये भवत्संबंधिनि नेत्राभ्यां अक्षिभ्यां मधुकररुचिभ्यां मधुकराणां भ्रमराणामिव रु
चिः शोभा ययोस्ताभ्यां मधुकराकाराकारिताभ्यामित्यर्थः ॥ ध्वतगुणं ध्वतः संपादितः गुणो ज्या
॥७४॥ वल्ली यस्य तत् धनुः श्वापं मन्ये सव्येतरगृहीतं सव्यो दक्षिणादितरः वामः स चासौ इतरश्चेतन
गृहीतं सव्येतरशब्देनैकेनैवेह सर्वदा ध्वतं न तु बाणप्रयोगार्थमिति सूचितं ॥ रतिपतेर्मन्मथ ॥७४॥
स्य प्रकोष्ठे मणिबंधे मुष्टौ अंगुलीनां ग्रंथौ अयं मुष्टिशब्दः अनुशासनवशात् स्त्रीलिंगो विप्र
योगबाहुल्यात्पुल्लिंगता मापन्नो गंडूषशब्दवत् यथा उदरं परिमाति मुष्टिनेति नैषधे प्रयोगः
स्थगयति स्थगनं छादनं कुर्वति सति निगूढांतरं निगूढं अंतरं मोवींदंडयस्य तत् ॥ उमे पार्व
ति ॥ अथ वेथं पदयोजना ॥ हे उमे भुवनभयभंगव्यसनिनि त्वदीये किंचिद्भुग्ने भ्रुवौ मधुकरर
चिभ्यां नेत्राभ्यां ध्वतगुणं रतिपतेः सव्येतरगृहीतं प्रकोष्ठे मुष्टौ च स्थगयति सति निगूढांतरं

धनुर्मन्ये॥ अत्र भ्रूबोधनुरिति रूपकं भ्रुवोर्धन्वरूपेण निरूपणात्॥ अत एव द्विवचनैकवचनयोः
सामानाधिकरण्यं भ्रूबोधनुरिति॥ अयं भावः॥ विशेषणं चतुर्विधं॥ व्यावर्तकं विशेषणमुपरंज
कं विशेषणमुपलक्षणं विशेषणमुपादानं विशेषणं चेति॥ अत्र व्यावर्तकं विशेषणं नीलोत्पल
मित्यादि॥ तत्र नैल्यस्य भेदव्यावर्तकत्वात्॥ उपरंजकं विशेषणं द्विविधं॥ उपरंजकस्य आरोप
विशेषगोचरत्वेन आरोप्यमाणगोचरत्वेनेति॥ तत्रारोपविषयगोचरत्वे मुखं चंद्र इत्यादि तत्र
मुखस्य चंद्रत्वेनोपरंजनं अत एव लिंगभेदेपि विशेषणविशेष्यभावः सिद्ध एव॥ स्तद्वत्कुचौ
भवन्निति नैषधे॥ तत्र सद्वृत्ति कलशाएकः द्वौ कुचौ उभयो विशेषणविशेष्यभावः॥ आरोप्य
माणविशेषणं तु तिरस्करिण्यो जलदा भवंति। यत्रारोप्यमाणं तिरस्करिणीत्वं आरोपविषय
मेघास्थितं॥ एतच्च पूर्वमेव निरूपितं॥ उपलक्षणविशेषणं॥ काकवद्देवदत्तगृहं पृथक्स्थि
ते हि धर्मिण्युपलक्षणानि स्फुपलक्षणविदः॥ काकत्वादि जात्या विशिष्टस्य वोपलक्ष्यत्वाद्विशे
षणतो भेद [illegible]

मुखचंद्रः कलत्रास्तनौ भ्रुवौ धनुरित्यादिस्थलेषु चंद्रस्त्राकलापुपरंजकविशेषणानि आश्रि
तलिंगसंख्यान्येव मुखादिकं तु स्तनादिकं विशेषयतीति न स्तनादेर्न मुखादेर्लिंगसंख्याव्यभि
जं तेन नियतलिंगत्वया विशेष्यनिघ्नत्वाभावादित्तरश्यो विशेषणाभ्यां व्यावृत्तिः मन्ये शब्दप्रयो
गात् संभावनोत्थानादुत्प्रेक्षालंकारोपि॥ अनयोः संसृष्टिः अपथक्स्थितयोरलंकारयोरंगा
गीभावे अनुपसर्जनं स्थितयोस्तु संकर इत्यलंकाररहस्यं॥ अतिशयोक्तिरपि भ्रूमध्यनासि
कामध्ययोर्मुष्टिचित्रकोष्ठस्थगितत्वेनाध्यवसानात् अत्र नासिकायाः सव्येतरकरत्वेनारोप
॥७५॥ णप्रतीते रूपकालंकारध्वनिः॥ यद्वा॥ सव्येतरकरत्वेन नासिकाया अध्यवसानप्रतीतेरतिश
योक्तिः अनयोः संदेहः संकरः॥ ८०॥ अहः सूते सव्यं तव नयनमर्कात्मकतया त्रियामां वामं
ते सृजति रजनीनायकमयं॥ तृतीया ते दृष्टिर्दरदलितहेमांबुजरुचिः समाधत्ते संध्यां दिव
सनिशयोरंतरचरीं॥ ८१॥ अहः दिवसं सूते जनयति सव्यं दक्षं तव नयनं नेत्रं अर्कात्मक
तया सूर्यात्मकतया त्रियामां रात्रिं वामं सव्येतरं ते तव सृजति सूते रजनीनायकमयं चंद्रा
त्मकं तृतीया निटिलस्थिता ते दृष्टिश्चक्षुर्दरदलितहेमांबुजरुचिः दरदलितमीषद्विकसितं

हेमांबुजेनस्येवरुचिर्यस्याः सा समाधत्ते सम्यग् आधत्ते करोति दिवसनिशायोरहोरात्रयोः अंतरचरीं मध्यवर्तिनीं सायंप्रातरात्मकसंध्याकालद्वितयस्याग्निहोत्रसाधनत्वादिति भावः॥ अत्रैवं पदयोजनं॥ हेभगवति ते सव्यं नयनं अर्कात्मकतया अहः सूते वामं नयनं रजनीनायकमयं सत् त्रियामां सृजति हे भगवति ते तृतीया दृष्टिः दरदलितहेमांबुजरुचिर्दिवसनिशायोरंतरचरीं संध्यां समाधत्ते अत्र सूर्यचंद्राग्न्यात्मकनयनत्रयेण अवयवरूपेण भगवत्या अवयववैशेषेण दिवसनिशासंध्यासमेककालत्रयोपलक्षितपक्षर्तुमासयुगकल्पादिकालोत्पत्तिकलनात् भगवत्याः कालावच्छेदत्वं दूरतएवापास्तमिति ध्वन्यते॥ इदमुत्तमं काव्यं मध्यमकाव्यताप्रतीतिरपि अर्कात्मकतया जरनीनायकमयमिति वाच्यमानत्वात् दरदलितहेमांबुजरुचिरिसनेनाग्नेनेत्रत्वं ध्वन्यते॥ अयमनुरणनात्मकः मध्यमोत्तमकाव्यप्रयोजकध्वन्योः संसृष्टिः संसृज्यमानव्यंग्यद्वयं प्रधानध्वनिनां गांगीभावेन संकीर्यतइति दिक्॥ ४८॥ विशालाकल्याणी स्फुटरुचिरयोध्याकुवलयैः कृपाधाराधाराकमपि मधुराभोगवतिकम्॥ अवंती दृष्टिस्ते बहुनगरविस्तारविजया ध्रुवं तत्तन्नामव्यवहरणयोग्या विजयते॥ ४९॥ विशाला विपुला कल्याणी मंगलात्मिका स्फुटरुचिः स्फुटकांतिः अयोध्या योद्धुमशक्या कुवलयैरिंदीवरैः कृपाधाराणां

ला

ला

७४

करुणाप्रवाहाणां॥आधारभूता॥आधारशब्दस्य - - - - घटंतत्वात् विरोध्यनिष्ठत्वेन रूपकत्वं॥कि
मपिमधुरा॥अव्यक्तमधुरा॥आभोगवतिका॥आभोग अंतः परिणाहः दैर्घ्यमितियावत्॥अवंती रक्षि
का॥दृष्टिर्नयनं तेन यद्बहुनगरविस्तारविजया बहूनां नगराणां विस्तारेण सामस्त्येन विजया स्फुर
ती॥एवं निश्चयं तत्तन्नामव्यवहारयोग्यानि तानि च नामानि तत्तन्नामानि विशाला कल्याणी
अयोध्या धारा मधुरा भोगवती अवंती विजये सप्त नगरनामानि तैर्व्यवहरणं व्यवहारः तत्र यो
ग्या विजयते सर्वोत्कर्षेण वर्तते॥अत्रेदं परयोजना॥हे भगवति ते दृष्टिः विशाला कल्याणी सु
रुचिः कुवलयैरयोध्या रूपाधाराधारा किमपि मधुरा आभोगवतिका अवंती बहुनगरविस्ता
रविजया तत्तन्नामव्यवहरणयोग्या एवं विजयते॥अत्रेदमनुसंधेयं॥विशालाप्रभृतयो वि
जयांताः अष्ट नगर्यः अष्टदृष्टयश्च॥विशाला नाम दृष्टिः अंतर्विकासरूपा॥कल्याणी दृष्टिर्विस्मि
ता॥अयोध्या दृष्टिः स्मेरकनीनिका॥आधारा दृष्टिरलसा मधुरा दृष्टिर्वलिता॥भोगवती दृष्टिः
[illegible]॥अवंती दृष्टिर्मुग्धा॥विजया दृष्टिः भ्रांतकानीनिका केकरा रम्या एता अष्टदृष्टयः सर्वयो
षित्समानाः॥भगवत्यां तु विशेषः॥एतादृष्ट्या यथाक्रमं संक्षोभाकर्षणद्रावणोन्मादवश्याघटन

॥७६॥

॥७६॥

विद्वेषणमारणक्रियासुसंभिन्नाः॥ एतदुक्तंभवति॥ यत्रप्रदेशेऽस्थित्वा अंतर्विकासरूपया विशाल
रव्ययादृष्ट्या जनसंक्षोभमकरोत् सदेशोविशालानगरी॥ यत्रदेशेस्थित्वा केकरयादृष्ट्या विजयाख्य
यात्रस्तुमारणमकरोत् सदेशोविजयानगरी॥ एवंमध्यवर्तिनीनां षण्णांपुरांनामधेयान्यूह्यानि॥ य
थोक्तंभगवत्पादैः विशालाद्याभगवत्पादद्दृष्टिविशेषाः संक्षोभादिकर्मसाधनभूताः अंतर्विकास
रूपाश्चेतिसर्वमनवद्यमिति॥ एतदेवस्पष्टीकृतंतद्व्याख्याकारैस्तत्रतत्रततएवावधार्यं॥४९॥ क
वीनांसंदर्भस्तबकमकरंदैकरसिकंकटाक्षव्याक्षेपभ्रमरकलभौकर्णयुगलं॥ अमुंचंतौदृष्ट्वा त
वनवरसास्वादतरलावसूयासंसर्गादलिकनयनंकिंचिदरुणं॥५०॥ कवीनांकवीश्वराणांसंद
र्भस्तबकमकरंदैकरसिकंसंदर्भः काव्यसंदर्भःसएवस्तबकः पुष्पगुच्छः तत्रमकरंदएकंमुख्यंर
सिकंकाव्यामृतास्वादैकरसिकमित्यर्थः॥ कटाक्षव्याक्षेपभ्रमरकलभौकटाक्षावेवव्याक्षेपोव्या
जः ययोस्तौचतौभ्रमरकलभाविति समासः॥ भ्रमरकलभौद्विरेफडिंभौ॥ अत्रयद्यपिकलभशब्दो
दोडिंभवचनस्तथापिमातंगकविप्रयोगप्राचुर्यवशात्विशेषणसामान्यलक्षणाभ्रमरकलभावि
विति॥ कर्णयुगलंकर्णयोःश्रवणयोर्युगलं अमुंचंतौरसास्वादलंपटतयाअसृजंतौदृष्ट्वान्तीय

64

नयनस्य ऊर्ध्वस्थितत्वात् तव नवरसास्वादतरलौ नवरसाः शृंगारादयः नवत्वसंख्यायुक्तो रसा
युक्ता रसा नवरसाः शाकपार्थिवादित्वादुत्तरलोपी समासः अन्यादृिगोरिति ङीपि कृते नवरसी ति
स्यात्॥ नवरसानामास्वादे भोगे तरलौ लंपटौ असूयासंसर्गात् असूयया ईर्षया संसर्गः तस्मात्
अलिकनयनं निटिलनेत्रं किं विदूरणं किं चित्कोपादि वारणं॥ अत्रैथं पदयोजना॥ हे भगवति के
वीनां संदर्भस्तबकमकरंदैकरसिके कर्णयुगलं कटाक्षव्याक्षेपभ्रमरकलभौ नवरसास्वादतर

॥१८८॥ लौ अमुं चेतो दृष्ट्वा असूयासंसर्गात् तव अलिकनयनं किं विदूरणं॥ अयमर्थः ॥ नयनत्रय ॥१८७॥
मध्ये द्वयो रसपाने सिद्धे एकस्य नयनस्यासूयायुज्यते॥ आकर्णनेत्रा भगवतीति वस्तुध्व
निः॥ अत्रातिशयोक्तिरलंकारः॥ श्रवणयोः काव्यामृतास्वादसंबंधाभावेपि संबंध कथनात्
भ्रमरकलभावि स्वत्रअपन्हुत्यालंकारः॥ यद्वा रूपकं॥ कटाक्ष आक्षेपः कटाक्षात्मतया च स्थिति
रिति व्याख्येयं अतिशयोक्त्यंतरमपि॥ भ्रमरकलभयोर्मकरंदास्वादासंबंधेपि संबंध कथनात्
कविकृतवस्तुकृतसौंदर्ययोरभेदाध्यवसायात् अतिशयोक्तेरनुग्रामाण्यनुप्राणकभावः सर्वे
षां॥ अपन्हवस्तु अंगांगीभावेन संकीर्ण इति॥५०॥ शिवे शृंगाराद्रीं तदितरजने कुत्सनपरास

षोरो गंगायां गिरिशचरिते विस्मयवती॥ हराहिभ्यो भीता सरसिरुहसौभाग्यजननी सखीषु
स्मेरा ते मयि जननि दृष्टिः सकरुणा॥५१॥ शिवे सद्रा शिवे शृंगारार्द्रा शृंगारेण शृंगाररसेनार्द्रा अ
पुन्ना तदितरजने तस्मात्सदाशिवात् इतरजनस्तद्विषये कुत्सनपरा बीभत्सरसाविष्टा अत्र कुत्स
नं बीभत्सरसास्वादजन्मान्तःकरणमुकुलीभावः कार्यकारणयोरभेदेन रससत्वेनोपरिचितः से
रोषा रौद्ररसाविष्टा क्रोधस्थायीभावस्य रसत्वोपचारात् गंगायां सपत्न्यामिति॥ गिरिशाच
रिते त्रिपुरविजयादौ विस्मयवती अद्भुतरसाविष्टा गिरिशानयन इति पाठे तृतीयनयनेनैव मन्म
थदहनेन तादृशानयनमेव दृष्टा नीसा अद्भुतदर्शनमिसद्भुतमिति ध्येयं॥ हराहिभ्यः हरस्य परमेश्वर
स्य अहिभ्यः सर्पेभ्यः भीता भयरसाविष्टा सरसिरुहसौभाग्यजननी सरसिरुहाणां सौभाग्यं र
क्तिमा तस्य जननी उत्पादिका कोकनदकांतिरक्तवर्णा वीररसाविष्टेत्यर्थः॥ अत्रानुभावेन नयनर
क्तिमा वीररसो ध्वनितः सखीषु वयस्यासु स्मेरास्तरलकनीनिका॥ अत्राप्यनुभावेन हास्यरसो
दृश्यते तव मम यि मद्विषये जननि हिमातः दृष्टिः सकरुणा करुणारसाविष्टा॥ अत्रेत्थं पदयोजना॥
हे जननि तव दृष्टिः शिवे शृंगारार्द्रा तदितरजने कुत्सनपरा गंगायां सरोषा गिरिशाचरिते विस्मयव

७६

॥७८॥

तीहराहिभ्योभीतासरसिरुहसौभाग्यजननीसखीपुंस्मेरामयिसकरुणा॥ अत्रपरमेश्वरवि
रुद्धानामेकत्रनयनेसमावेशकथनात्‌विरोधालंकारः॥ अवस्थाभेदेनपरिहारात्तस्यविरोध
स्यआभासत्वं॥ तल्लक्षणंविरोधाभासोविरोधइतिक्रियाजनकाएवरसाइतिअष्टौरसानवम
तिशांतस्यनिर्विकारत्वान्नशांतंमेनिरेरसमितिशांतस्यरसत्वाभावात्‌अष्टावेवरसाःसंगृही
ताः॥५७॥ गतेकर्णाभ्यर्णंगरुतइवपक्ष्माणिदधतीपुरांभेत्तुश्चित्तप्रशमरसविद्रावणफले॥ इ
मेनेत्रेगोत्राधरपतिकुलोत्तंसकलिकेतवाकर्णाकृष्टस्मरशरविलासंकलयतः॥५८॥ गतेप्रा
प्तेकर्णाभ्यर्णंकर्णयोःसमीपंगरुतइतिकंकपत्राणिपक्ष्माणिवदधतीपुराणांभेत्तुर्भेदकस्यचि
त्तप्रशमरसविद्रावणफलेचित्तेअंतःकरणेप्रशमरसःशांतरसःनैस्पृह्यमित्यर्थः॥ तस्यवि
द्रावणंविनाशंशृंगाररसोत्पादनमितियावत्‌तदेवफलंप्रयोजनेययोस्तेप्रशमरसविद्रा
वणफले॥ अत्रफलशब्देनाध्यवसितेनअयोमयीबाणाग्रसूचीकथ्यते॥ इमेइदयांबुजेप
दृश्यमानेनयनेनेत्रेगोत्राधरपतिकुलोत्तंसकलिकेगोत्राभूमिःधरतीतिधरःपर्वतःगो
त्रायाधरोगोत्राधरःअन्यथागोत्रांधरतीतिविग्रहेकर्मणिण्यणिप्राप्तेगोत्राधरइतिस्यात्‌॥

॥७८॥

अनेनैवाभिप्रायेण शक्तिधर इत्यत्र शक्तेर्धरः शक्तिधर इत्युक्तं क्षीरस्वामिना॥ गोत्राधरपतिर्हि
मवान् तस्य कुलोत्तंसकलिका कोरकस्तस्याः संबुद्धिः तव भवत्याः कर्णाकृष्टस्मरशरविलासं क
र्णपर्यंतमाकृष्टयोः स्मरशरयोर्मन्मथबाणयोर्विलासं सौभाग्यं कलयतः कुरुतः॥ ले इष परसे
पदं द्विवचनांतं॥ अत्रैवं पदयोजना॥ हे गोत्राधरपतिकुलोत्तंसकलिके तव इमे नेत्रे कर्णाभ्य
र्णं गते पक्ष्माणि गरुत इव दधती पुरां भेत्तुश्चित्तप्रशमरसविद्रावणफले आकर्णाकृष्टस्म
रशरविलासं कलयतः॥ अयमर्थः॥ पंचबाणस्य स्त्रीणां कटाक्षः षष्ठो बाणः पंचबाण इति
प्रसिद्धिप्राचुर्याभिप्रायेण॥ कटाक्षात्मकबाणो बाणपंचकतुल्य इति न षड्बाणव्यवहारः॥
अत्र निदर्शनालंकारः॥ स्मरशरविलाससदृशविलासप्रतिभानात् प्रतिबिंबाक्षेपात्॥५२॥
विभक्तत्रैवर्ण्यं व्यतिकरितलीलांजनतया विभाति त्वन्नेत्रत्रितयमिदमीशानदयिते॥ पुनः स्र
ष्टुं देवान् द्रुहिणहरिरुद्रानुपरतान् रजः सत्त्वं बिभ्रत्तम इति गुणानां त्रयमिव॥५३॥ विभक्तत्रैवर्ण्य
विभक्तं परस्परासंकीर्णं त्रैवर्ण्यं त्रयो वर्णाः सितासितरक्ताः स्वार्थे ष्यञ् यस्येति बहुव्रीहिः॥ मह
भाग्यपुरुषाणां नयने रक्तरेखाः संति नयनगोलकं श्वेतं यद्यपि कनीनिका नीला॥ तृतीयन

७६

यनेकनीनिकायां नेत्र्याभावद्द्माह ॥ व्यतिकरितलीलांजनतये ति लीलांजनतया व्यतिकरि
तं संवलितं लीलार्थं विलासार्थं धृतमंजनेयस्य तत्तु तस्य भावस्तत्ता तयान्तीयनयनेगोल
स्यमध्ये स्यमंगीकृत्योक्तं विभाति विराजते त्वन्नेत्रत्रितयं तवनेत्राणां त्रितयं इदं परिदृश्यमानं दृशा
नद्यिते ईशानस्य महादेवस्य दयिताप्रेयसी तस्याः संबुद्धिः पुनः स्रष्टुं गत ब्रह्मांडानंतरमस्मि
न् ब्रह्मांडे भूयो निर्मातुं देवान् देवनेधर्मयुक्तान् द्रुहिणहरिरुद्रान् ब्रह्मविष्णुमहेश्वरान् उपरता

नाम निलीनान् रजः रजोगुणः सत्वं सत्वगुणः विभ्रत् दधत् तमस्तमोगुणः इत्येवं सत्वरजस्त

॥७९॥

मः संज्ञकानां त्रयं त्रितयमिव ॥ अत्रेत्थं पदयोजना ॥ हे ईशानदयिते इदं त्वन्नेत्रत्रितयं व्यतिक
रितलीलांजनतया विभक्तत्रैवर्ण्यं उपरतान् द्रुहिणहरिरुद्रान् देवान् पुनः स्रष्टुं रजः सत्वं तम
इति गुणानां त्रितयमिव भाति ॥ अत्र सत्वगुणः श्वेतवर्णः रजोगुणोरुणवर्णः तमोगुणो नीलव
र्ण इति कविप्रसिद्धिः ॥ तम इति निपातेनाभिहिते कर्मणि न कर्मविभक्तिः परिगणनस्याप्राप्तिक
त्वादिति निपातेतिशब्देनाभिधानात् रजः सत्वं तमः शब्दाः प्रथमांताः ॥ षष्ठाद्धितीयांताः निपा
ताभिधानस्याप्रापिकत्वात् ॥ यथोक्तं वाक्यनैसैस्यजेदिति ॥ अत्रोत्प्रेक्षालंकारः ॥ नयनगतस्यमध्ये

तरक्तग्रहणे नहिंसा स्तेयान्यथाकामपैशून्यपरुषानृतं ॥ संभिन्नवादं व्यापादमभिध्यां दृग्विपर्ययं ॥
पापं कर्मेति दशधा कायवाङ्मनसैस्त्यजेदिति ॥ नयनगतश्वेतरक्तनीलरेखात्रितयस्य सत्वरज
स्तमोगुणत्वेनोत्प्रेक्षणात् ॥ अत्र भगवत्सा नयनांचलदर्शनादेव सर्पादिसृष्टिस्थितिलयादि इति महान
तिशयो ध्वन्यत इति अलंकारेण वस्तुध्वनिः ॥ × अत्रोत्प्रेक्षालंकारः × २।५३ ॥ पवित्रीकर्तुं नः पशु
पतिपराधीनहृदये दयामित्रैर्नेत्रैररुणधवलश्यामरुचिभिः ॥ नदः शोणो गंगा तपनतनयेति
ध्रुवममुं त्रयाणां तीर्थानामुपनयसि संभेदमनघे ॥ ५३ ॥ न देवत्रैवर्ण्यं पुनरुत्प्रेक्ष्यते ॥ पवित्री
कर्तुं पवित्रान् कर्तुं अभूततद्भावे संपद्यकर्तरि च्वि ॥ नः अस्मान् पशुपतिपराधीनहृदये हराय
त्तचित्ते दयामित्रैर्दयार्द्रैर्नेत्रैः अरुणधवलश्यामरुचिभिः प्रत्येकमिति शेषः ॥ नदः पुंप्रवाहः शो
णः हिरण्यबाहुः स तु रक्तवर्णः गंगा भागीरथी श्वेतवर्णा तपनतनया कालिंदी नीलवर्णा इति क
विप्रसिद्धिः ॥ इत्येवं ध्रुवं सत्यं अमुं परिदृश्यमानं त्रयाणां तीर्थानां जलावतारणां संभेदं नदनदी
संगमं उपनयसि संपादयसि अनघे अघापनोदके ॥ अत्रेत्थं पदयोजना ॥ हे पशुपतिपराधीन
हृदये दयामित्रैररुणधवलश्यामरुचिभिर्नेत्रैः शोणो नदः गंगा तपनतनयेति त्रयाणां तीर्थानां

अमुं संभेदं नः पवित्रीकर्तुमुपनयसि स्फुटं भक्तवत्सलत्वादित्याद् इति भावः ॥ अत्रोत्प्रेक्षालंकारः ॥
स्वभावगतस्य नयनगतरेखात्रितयस्य सितासितरक्तवर्णात्मकस्य गंगायमुनाशोणसंगम
त्वेनोत्प्रेक्षणात् ॥५४॥ निमेषोन्मेषाभ्यां प्रलयमुदयं याति जगती तवेत्याहुः संतो धरणिधरराज
न्यतनये ॥ त्वदुन्मेषाज्जातं जगदिदमशेषं प्रलयतः परित्रातुं शंके परिहृतनिमेषास्तव दृशः ॥५५॥
निमेषो नाम नयनपक्ष्मणां मुकुलीभावः उन्मेषो नाम नयनपक्ष्मविकासः ताभ्यां यथाक्रमं प्र
लयं संहारं उदयमुद्भवं याति प्राप्नोति जगती जगत् तव भवत्याः इति एवमाहुः ब्रुवते ॥ ब्रुवः पंचा
नामित्यादिना आहादेशः संतः सत्पुरुषा व्यासादयः दृष्टिसृष्टिवादिमते तेन व्यतिरेकेण तेयाभा
वात् निमेषोन्मेषाभ्यामिसुक्ती राजनीतिध्येयं धरणिधरराजन्यतनये हिमाचलपुत्रिके त्व
दुन्मेषात् तव पक्ष्मस्पंदात् जातं जगत् भुवनमिदं परिदृश्यमानमशेषं कृत्स्नं प्रलयतः महासंहा
रात् परित्रातुं रक्षितुं शंके मन्ये परिहृतनिमेषाः तिरस्कृताक्षिस्पंदास्तव दृशः नयनानि ॥ अत्रे
यं पद्ययोजना ॥ हे धरणिधरराजन्यतनये तव निमेषोन्मेषाभ्यां जगती प्रलयमुदयं यातीति सं
त आहुः अतः त्वदुन्मेषाज्जातमशेषं जगत् प्रलयतः परित्रातुं तव दृशः परिहृतनिमेषा इति शं

॥८०॥

काअत्रोत्प्रेक्षालंकारः॥ देवतानामनिमेषत्वं स्वभावसिद्धं तच्च जगत्संरक्षणार्थमिति फलत्वेनो
त्प्रेक्षणात् फलोत्प्रेक्षा अत्र निमेषोन्मेषव्यापारतो जगदुत्पत्तिलयाविति देव्या महिमा अवाङ्मनस
गोचर इति वस्तु ध्वन्यते अलंकारेण वस्तुध्वनिः॥५५॥ तवापर्णे कर्णेजपनयनपैशुन्यचकिता
निलीयन्ते तोये नियतमनिमेषाः शफरिकाः। इयं च श्रीर्बद्धच्छदपुटकपाटं कुवलयं जहाति प्रत्यूषे
निशि च विघटय्य प्रविशति॥५६॥ तव भवसाः अपर्णे पार्वति कर्णेजपेन यनपैशुन्यचकिता लोक
र्णेजप कर्णसमीपसंचारिते च तेन नयनेन कृताभ्यां प्रकरिष्यमाणं पैशुन्यं पिशुनभावः मर्मोद्घाट
नं तस्माच्चकिताः निलीयन्ते आकारगोपनेन स्थिता इत्यर्थः तोये उदके नियतं निश्चितं अनिमे
षाः निमेषरहिताः शफरिकाः मीनयोषितः इयं च परिहस्यमानानेन आगता श्रीर्लक्ष्मीः बद्धछ
दपुटकपाटं बद्धं संकलितं छदपुट एव कपाटं यस्य तत् कपाटघटितगृहमिव वर्तत इत्यर्थः कुव
लयं इन्दीवरं जहाति त्यजति प्रत्यूषे उषःकाले निशि रात्रौ च विघटय्य समुद्घाट्य प्रविशति संवि
शति॥ अत्रेयं पदयोजना॥ हे अपर्णे कर्णेजपनयनपैशुन्यचकिताः शफरिका अनिमेषास्तोये नि
लीयन्ते नियतं॥ किंच इयं श्रीर्बद्धच्छदपुटकपाटं कुवलयं प्रत्यूषे जहाति निशि तु विघटय्य प्रवि

रीति॥ अयमर्थः॥ लोके नेत्रसमं वस्तु शफरिकाइंदीवराणीति एतद्द्वितयसमं नेत्रमिति वस्तु
त्रसिद्धं उभयोः साम्यं॥ अत्र कविरुत्प्रेक्षते॥ नेत्रसौभाग्यं शफरिकासु इंदीवरेषु वर्तते नेत्तसौभा
ग्यमपहर्तुकामं नेत्रद्वयं तत्रयं भूयं करोतीति॥ अत्र पूर्वार्द्धे उत्प्रेक्षालंकारः॥ शफरिकाणां जल
धिवासे निमेषत्वं वस्तुस्वभावसिद्धं तदन्यथात्वेनोत्प्रेक्षणात्॥ द्वितीयार्द्धे अतिशयोक्तिः नेत्र
लक्ष्म्या नेत्रं विहाय इंदीवरेषु भक्तम्यतिशयात् रात्रौ तत्प्रक्षणार्थं तत्र दर्शनं वर्तितं दिवा तद्द्वित
दिवा मुकुलीभावश्च एतद्द्वयस्य लक्ष्मीकृतासंबंधे संबंधनिबंधनाइंदीवरस्य रात्रौ विकासः स्वभावसिद्धः
उभयोरनुसृष्टिः॥ अनुसृष्टिलक्षणं पूर्वमेवोक्तं॥ अत्र इंदीवरस्य रात्रौ विकासः नेत्रद्वयस्य
दिवा विकासः अतश्च दिवालक्ष्मीर्नेत्रे वसति रात्रौ कुवलयेएवं लक्ष्मीनेक्तं दिवमुभयत्रैव व
सतिनान्यत्रेति शफरीप्रभृतीनां आलोके नेत्रोपमवस्तूनां भगवतीनेत्रतुल्यतानास्तीति
शफरीणामुदकमध्यविलीनत्वमेव युक्तमिति शब्दलिंगध्वनिरिति अलंकारेणालंकार
ध्वनिः॥८३॥ दराद्दाघीयस्यादरदलितनीलोत्पलरवात्स्वीयां संदीनं स्नपय कृपया मामपि

॥८३॥

॥८३॥

पिन्द्रिये ॥ अनेनायं धन्यो भवति न चेतेहानिरियता यनेवा हर्म्येवा समकरनिपातो हिमकरः ॥ ५७ ॥
दृग्गा करा क्षदृष्ट्या द्राघीयस्या दीर्घतरया दरदलितनीलोत्पल रुचा दरदलितमीषद्विकसितं नी
लोत्पलमिंदीवरं तस्येव रुचिर्मरीचिर्यस्यास्तया दवीयांसं दूरवर्तिनं दूरस्थात्वस्य स्थूलदूरेत्या
दिना सूत्रेण लोपः पूर्ववर्णस्य गुणे कृते अवादेशे कृते सिद्धं रूपं दवीयानिति ईयसुन्प्रत्यये तेः दी
नं दरिद्रं स्नपय स्नपनं कुरु रूपयाद्यामा मपि इतरजन साधारण्य मपि शब्दार्थः ॥ द्विचेमंग
लात्मिके अनेन एतावन्मात्रस्नपनेनापि अयंजनः अहमिति अर्थः धन्यो भवति कृतार्थो भवति
न चैतेन यहानिर्दैव्यनाशः इयता साधारण दर्शनमात्रेण वनेवा अरण्ये वा हर्म्ये वा प्रसादे वा स
मकरनिपातः समं तुल्यं यथा भवति तथा कराणां किरणानां निपातनं च आयनेपस्य सनथोक्तः
हिमकरः शीतकरः ॥ अत्रेत्थं पदयोजना ॥ हे द्विचेन यद्राघीयस्या दरदलितनीलोत्पल रुचा
दृशा दवीयांसं दीनं रूपयामा मपि स्नपय अयं जनः अनेन धन्यो भवति इयता ते हानिर्नभ
वति ॥ तथाहि हिमकरः वनेवा हर्म्येवा समकरनिपातो हि स्वच्छानः करणानां सर्व साधारण्यं
स्वभाव सिद्धमिति भावः ॥ अर्थान्तरन्यासोलंकारः ॥ सामान्येन विशेषण समर्थनात् ॥ सर्वसा

स

॥८२॥

धारण्यदर्शनेन सर्वोल्लासहेतुरिति नात्मीयतादर्शनापेक्षास्तीति ध्वनिः॥५७॥अरालं ते पाली
युगलमगराजन्यतनये न केषामाधत्ते कुसुमशरकोदंडकुतुकं॥तिरश्चीनो यत्र श्रवण
पथमुल्लंघ्य विलसन्नपांगव्यासंगो दिशति शरसंधानधिषणां॥५८॥अरालं कुटिलं ते पाली
युगलं कर्णयुगलेन यन्नयुगलयोर्मध्यं अगराजन्यतनये नगेंद्रतनये न केषामाधत्ते स
र्वेषां करोत्येव कुसुमशरकोदंडकुतुकं मन्मथचापसौभाग्यं तिरश्चीनस्तीर्यक्प्रसारितः
यत्र पालीयुगले श्रवणपथमुल्लंघ्य कर्णांतिकं प्राप्य विलसन्स्फुरन् अपांगव्यासंगः अ
पांगस्य कटाक्षस्य व्यासंगः दैर्घ्यं दिशति करोति शरसंधानधिषणां शरसंधानस्य बाण
संयोजनस्य धिषणां बुद्धिं तद्भ्रांतिं संधितशरधिषणामिति यावत्॥अत्रेत्थं पदयोजना॥
हे अगराजन्यतनये ते पालीयुगलं अरालं कुसुमशरकोदंडकुतुकं केषां नाधत्ते॥यद्यस्मा
यत्र तिरश्चीनः विलसन् अपांगव्यासंगः श्रवणपथमुल्लंघ्य शरसंधानधिषणां दिश
ति॥अत्र भ्रांतिमदलंकारः॥अपांगे संधितशरभ्रांतेरुत्थानात्॥पालीयुगले कुसुमश
रबुद्धिर्निश्चयात्मिका संशयपूर्विकेति संदेहालंकार एव अनयोरंगांगीभावेन संकरः॥५८॥

॥८२॥

स्फुरद्दंडाभोगप्रतिफलिततत्ताटंकयुगलं चतुश्चक्रं मन्ये तव मुखमिदं मन्मथरथं ॥ यमारुह्य द्रु
ह्यत्यवनिरथमर्केंदुचरणं महावीरो मारः प्रमथपतये सज्जितवते ॥५९॥ स्फुरंतौ चतौ गंडाभो
गौ गंडस्थले दर्पणवन्निर्मलाविति शेषः ॥ अत्र प्रतिफलितं प्रतिबिंबितं ताटंकयुगलं यस्य
स तं चतुश्चक्रं मन्ये त्वं केतवभववस्या मुखं आस्यं इदं हृदयकमले परिदृश्यमानं मन्मथरथं
मदनस्यंदनं यं रथमारुह्य अधिष्ठाय द्रुह्यति अपराध्यति विध्यतीति यावत् अवनिरथं भूमि
रथं अर्केंदुचरणं अर्केंदू सूर्यचंद्रौ तावेव चरणौ यस्य सः तं महावीरः चतुश्चक्ररथारोहणम
हिम्ना अप्रतिहतप्रतापः मारः कंदर्पः प्रमथपतये त्रिपुरांतकाय सज्जितवते सज्जं कुर्वते स
न्नाहं कुर्वते द्रुह्यतीत्यर्थः ॥ अत्रेत्थं पदयोजना ॥ हे भगवति तवेदं मुखं स्फुरद्दंडाभोगप्रतिफलितता
टंकयुगलं चतुश्चक्रं मन्मथरथं मन्ये यमारुह्य मारो महावीरः सन् अवनिरथमर्केंदुचर
णं सज्जितवते प्रमथपतये द्रुह्यति ॥ कुपद्रुहेर्षासूयार्थानां प्रति कोप इति चतुर्थी ॥ अत्र पूर्वा
र्द्धे उत्प्रेक्षालंकारः ॥ भगवत्या मुखस्य रथत्वेनोत्प्रेक्षणात् ॥ द्वितीयार्द्धे आरोहणस्य महावीरत्वे
संपादनकथनात् ॥ पदार्थहेतुकं काव्यलिंगालंकारः ॥ परमेश्वरस्य मन्मथेन सार्द्धं युद्धसंबं

धेपि संबंधकथनादतिशयोक्तिः॥ काव्यलिंगातिशयोक्त्योरंगांगीभावेन संकरः॥ उत्प्रेक्षा
यास्तु काव्यलिंगं प्रत्यनुग्राहकतैव न संसृष्टिः नापि संकर इति ध्येयं॥ अपथ्या कुस्थिसा उप
कारकमनुग्राहकं अपथकुस्थि साप्रयोजकमनुसरवनं॥ पथकुस्थि साप्रयोजकमंगं॥ ए
तद्विलक्षणं संसृष्टिमिसालंकारिकमतरहस्यं॥ एतच्च पूर्वमुक्तमपि स्पष्टार्थं पुनः प्रयोज
नमिति॥५४॥ सरस्वत्याः सूक्तीरमृतलहरीकौशलहरीः पिबंत्याः शर्वाणि श्रवणचुलुकाभ्या
मविरलं॥ चमत्कारश्लाघाचलितशिरसः कुंडलगणोल्लणत्कारैस्तारैः प्रतिवचनमाचष्ट ॥८३॥
इव ते॥८५॥ सरस्वत्या भारत्याः सूक्तीर्मधुरवचांसि अमृतलहरीकौशलहरीः अमृतलह ॥८३॥
र्या अमृततोत्सेकस्य कौशलं सौभाग्यं हरंतीति ताः लहर्यः लहरी शब्द औणादिको रिप्रत्य
यांतः कृदिकारादक्तिनो वा ङीषिति ङीष्॥ पिबंत्याः शर्वाणि शर्वस्य पत्नि श्रवणचुलुकाभ्यां
चुलुकं प्रसृस्वर्थं श्रवणे श्रोत्रे एव चुलुके ताभ्यामविरलं यथा भवति तथा सावधानेन स्वर्थः
चमत्कारश्लाघाचलितशिरसः चमदिति स्मयमाश्चर्यानुकरणवाची॥ कारशब्दः स्वरूपप
चमत्कारश्लाघाचलितशिरसः चमत्कारः सविस्मयातो शिरसोद्धु
परः॥ पद्य॥ सुखदुःखाद्भुतानंदैर्हर्षोत्थैश्चित्तविक्रिया॥ चमत्कारः सविस्मयात्कोऽपि शिरसोद्धु

नो

सनादिष्वलंतं ।। चमत्कारश्लाघासु आश्चर्यानुकरणसंदेहहेतुभुचलितं शिरो यस्यास्तस्याः कुंड
लगणः कर्णाभरणसमूहः झणत्कारैस्तारैः प्रतिवचनं प्रति शब्दं अनुमोदवचनमाचष्ट इव कं
पयतीव ।। अत्रेयं पदयोजना ।। हे शौरिणि ते भ्रमतलहरीकौशललहरीः सत्कीः श्रवणे तु लुका
यां अविरलं पिबंत्याः चमत्कारश्लाघाचलितशिरसः सरस्वत्याः कुंडलगणः तारैः झणत्का
रैः प्रतिवचनमाचष्ट इव ।। अत्रोत्तरार्धे उत्प्रेक्षालंकारः ।। झणत्काराणां प्रतिवचनत्वेन संभाव
नात् ।। पूर्वार्धे अतिशयोक्तिरलंकारः ।। सरस्वत्याः शिरःकंपनसंबंधाभावेपि संबंधोक्तेः ।। असं
बंधे संबंधकथनात् उभयोरंगांगीभावेन संकरः ।। ८८ ।। असौ नासावंशास्तुहिनगिरिवंशध्व
जपटि त्वदीयो नेदीयः फलतु फलमस्माकमुचितं ।। वहन् संतं मुक्ताः शिवशिरकरनिश्वासगलि
तं समृद्धाय त्वासां बहिरपि समुक्तामणिधरः ।। ८९ ।। असौ परिदृश्यमानः नासावंशः वंशाद
ः रूपकमेतत् तुहिनगिरिवंशध्वजपटि तुहिनगिरेर्हिमाचलस्य वंशस्यान्वयस्य ध्वजप
टिपताके त्वदीयः भवदीयः नेदीयः सन्निकृष्टतरं फलतु फलमिष्टार्थं अस्माकं मत्संबंधिनां
[illegible] ।। यथेप्सितं वहति धारयति अंतरभ्यंतरे मुक्तामु

८२

कामणीः ॥ शिशिरकरश्चंद्रस्तस्य निश्वासो नाम नाडीमार्गवायुस्तेन गलितं स्रस्तं समग्राभि
ख्येन यस्मात्कारणात् तासां मुक्तानां बहिरपि बाह्यप्रदेशेऽपि नासिकाया अग्रभागेऽपि स
र्वः ॥ स नासिकाकाराकारितो वंशः धंतुः मुक्तामणिधरः मुक्तामणिं धत्ते यान् ॥ मुक्तामणिमदा
दिति सम्यक्पाठः ॥ अत्रैवार्थे पदयोजना ॥ हे तुहिनगिरिवंशध्वजपटि त्वदीयो असौ नासावंशः
अस्माकमुचितं नेदीयः फलं फलतु ॥ सः मुक्ता अंतर्वहति यस्मात्कारणात् तासां समग्रा
शिशिरकरनिश्वासगलितं बहिरपि मुक्तामणिधरः ॥ अत्र नासिकायां वंशत्वारोपणाद्रूप

कं वंशत्वसाधकप्रतिपादकमुत्तरार्द्धं ॥ वंशगर्भमौक्तिकाद्भवंतीति लोकशास्त्रमर्या
दा ॥ अतो नासिकावंशदंडेऽपि अभ्यंतरे मौक्तिकोद्भूतानि वर्तंते ॥ नोचेन्नासावंशदंड
स्य मुक्तामणिधरत्वं कथं संघटेत सर्वोपस्या वंशदंडाकारो नासिकायाः समर्थितं इति ना
रूपकमेव सम्यक् ॥६१॥ प्रकृत्यारक्तायास्तव सुदति दंतच्छदरुचेः प्रवक्ष्ये सादृश्यं जनय
तु फलं विद्रुमलता ॥ न बिंबं तद्बिंबप्रतिफलनरागादरुणितं तुलामध्यारोढुं कथमिव विल
ज्जेत कलया ॥६२॥ प्रकृत्या स्वभावेन आरक्ताया आताम्रायाः तव भवत्याः सुदति शोभना दंता

॥८४॥

पस्पास्तास्याः संबुद्धिः दंतच्छदरुचेः दंतच्छदयोरोष्ठयोरुचेः सौभाग्यस्य प्रवक्ष्ये प्रकर्षेण कथ
येसादृश्यंसदृशाभावः सादृश्यंजनयतुउत्पादयतुआशंसायांलोट्॥विद्रुमस्यफलंपदिस्या
त्तदासदृशावस्तुस्वाभावोनतुविद्रुममात्रेसदृशमितिफलेपक्वफलंपीनवर्णाभ्यांलताभ्यांउत्प
न्नंफलमितिरक्तैरक्तवर्णलतोत्पन्नफलस्यरक्तिमाकिंमुवक्तव्यमितितदेवसादृश्यमितिना
त्पर्यं॥विद्रुमलताप्रवाललतिकानबिंबंबिंबफलंतद्बिंबप्रतिफलनेरागात्तयोर्दंतच्छदयोः
बिंबस्यप्रतिफलनेप्रतिबिंबनेतेनरागःरक्तिमातस्मात्बिंबफलमितिव्यवहारः॥अधरबिं
बप्रतिबिंबप्रसादासादितः॥अन्यथातत्रबिंबव्यवहारोनस्यात्॥यथास्फटिकादेजपाकुसुमा
देःप्रतिबिंबवशादेवस्फटिकादीनांरक्तताएवंबिंबफलस्यापीतितद्बिंबप्रतिफलनरागादरु
णितेनतुलामध्यारोढुंतुलायांसाम्यकथायांस्थातुंकथमिवईप्रवेतिवाक्यालंकारे॥विलज्जेतेन
लज्जेनेकलयालेशेन॥अत्रेष्टंपदयोजना॥हेसुदतितवप्रकृष्टस्यारक्तायादंतच्छदरुचेःसादृश्यंप्र
वक्ष्येविद्रुमलताफलंजनयितुपुनस्तद्बिंबप्रतिफलनेलाभादरुणितंफलंप्राप्तितुलारोढुंकथ
मिवनविलज्जेतेलज्जाधातुरात्मनेपदे॥अत्रोत्प्रेक्षायोक्तिरलंकारः॥यद्यर्थोक्तौकल्पनातो॥द्वि

लीयाऽर्द्धं असंबंधे संबंध निबंधना अतिशयोक्तिः ॥ बिंबप्रतिफलनासंबंधेपि संबंधकथने
नाभेदकथना दुभयोः संसृष्टिः ॥ ८२ ॥ स्मितज्योत्स्नाजालं तव वदन चंद्रस्य पिबतां चकोराणा
मासीदतिरसतया चंचुजडिमा ॥ अतस्ते सीतांशोरमृतलहरी मम्लरुचयः पिबंति स्वच्छंदं
निशानिशि भृशं कांजिकधिया ॥ ८३ ॥ स्मितज्योत्स्नाजालं स्मितमीषद्धसितमेव ज्योत्स्ना तस्या

अमृतलहरी ॥८५॥

जालं वितानं ते वदनचंद्रस्य वदनमेव चंद्रस्तस्य पिबतामास्वादयतां चकोराणां पक्षिविशे
षाणां आसीत् अतिरसतया अतिमाधुर्यात् चंचुजडिमा जिह्वाजाड्यं अतः कारणात् ते च को
राः शीतांशोः चंद्रस्य अमृतस्य सुधायाः उल्लेक ज्योत्स्ना अमृतमित्यर्थः ॥ अम्लरुचयः अ

॥८५॥ लहरी

म्ले अम्लरसे रुचिर्येषां ते अम्लरुचयः पिबंति भक्षयंति स्वच्छंदं यथेच्छं निशानिशिप्रति
निशं ज्योत्स्नास्थितिरोषः भरं अस्यर्थं कांजिकधिया आरनालभ्रांत्या ॥ अत्रेत्थं पद्योजना ॥
हे भगवति तव वदनचंद्रस्य स्मितज्योत्स्नाजालं पिबतां चकोराणां अतिरसतया चंचुजडि
मा आसीत् ज्ञातः अतस्ते अम्लरुचयः शीतांशोरमृतलहरीं कांजिकधिया स्वच्छंदं निशा
निशि भृशं पिबंति ॥ अत्र जिह्वाजाड्यनिबंधनाम्लपिपासु शयोक्तिरलंकारः ॥ चंचुजडिम

निबंधनज्योत्स्नापानात्संबंधेपि तत्संबंधकथनादतिमधुरस्वस्यपानप्रसक्तजिह्वाजाड्यनि
बंधनाम्लप्रियासुभिक्ष्यकोरैरभेदोध्यवसानस्यप्रतीतेः॥६३॥अविश्रांतंपत्युर्गुणगणक
थाम्रेडनजपा जपापुष्पछायातवजननिजिह्वाजयतिसा॥यदग्रासीनायाःस्फटिकदृषदछ
छविमयीसरस्वत्यामूर्तिःपरिणमतिमाणिक्यवपुषा॥६४॥अविश्रांतंअनारतंपत्युःसदा
शिवस्यगुणगणकथाम्रेडनजपागुणानांत्रिपुरजयादीनांकथायांयत्तात्तस्यआम्रेडनंद्विस्त्रिरुक्तिः या
नदेवजपोयस्याःसाअनन्यमनस्केत्यर्थः॥जपापुष्पछायाजपाख्यपुष्पंतस्यछायेवछाया
कांतिर्यस्याःसातवजननिमातःजिह्वारसनाजयतिस्फुरतितच्छब्दोवर्तिष्यमाणाप्रसिद्धिंपरा
मृशति॥यदग्रासीनायाःयस्याजिह्वायाअग्रेआसीनायानिषण्णायास्फटिकदृषदछछविम
यीस्फटिकदृषदःस्फटिकोपलस्येवअछाछविःकांतिःतयाप्रचुराप्राचुर्येमयट्॥स्फटिकध
वलेत्यर्थः॥सरस्वत्याभारत्याःमूर्तिःस्वरूपंपरिणमतिविकारमापद्यतेमाणिक्यवपुषापद्मरा
गवपुषा॥अथपदयोजना॥हेजननितवसाजिह्वाअविश्रांतंपत्युर्गुणगणकथाम्रेडनज
पाजपापुष्पछायाजयतियदग्रासीनायाःसरस्वत्याःस्फटिकदृषदछछविमयीमूर्तिःमाणि

॥८६॥

स्य वपुषा परिणमति ॥ जिह्वाया रक्तत्वमात्रं न भवति तदस्यानां रक्तीकरणे रक्तिम्नः शक्ति
रपि अनए वजयतीति प्रयुक्तं अत्र तद्गुणालंकारः ॥ तद्गुणः स्वगुणत्यागादुत्कृष्टान्यगुणाहृति
रिति लक्षणात् देवीवदनांभोजे सर्वदा सरस्वती मूर्ता वसती सागमरहस्यं ॥ ६४ ॥ रणे जित्वा
दैत्यानुपहृतशिरस्त्रैः कवचिभिर्निवृत्तैश्चंडांशत्रिपुरहरनिर्माल्यविमुखैः ॥ विशाखेंद्रो
पेंद्रैः शशिविशदकर्पूरशकला विलीयंते मातस्तव वदनतांबूलशकलाः ॥ ६५ ॥ रणयुद्धे जि
त्वा पराजितान् कृत्वा दैत्यान् दितेः पुत्रान् उपहृतशिरस्त्रैः उपहृतानि निवर्तितानि शिरस्त्राणि
शिरोरक्षकानि यैस्तैः स्वामिकार्यनिर्वर्तनानंतरं सेवकानां राजसंमुखे प्रणामवेलायां उष्णी
षशिरस्त्रादिकं निवेद्य प्रणामः कर्तव्य इति परिपाटीमाश्रित्याह ॥ उपहृतशिरस्त्रैरिति क
वचिभिर्वर्मयुक्तैः निवृत्तैः युद्धान्निवृत्तैः चंडांशत्रिपुरहरनिर्माल्यविमुखैः चंडांशश्चंड
भागः चंडो नाम प्रमथस्तस्य भागः स एव त्रिपुरहरस्य निर्माल्यं स्वीकृतावशिष्टं गंधतां
बूलादि तत्र विमुखैः ॥ हरनिर्माल्यं परिस्पृश्य मित्यादिस्मृतयः ॥ चंडांशरूप हरनिर्माल्य
विशेषपराङ्मुखत्वं गंतव्यमिति ॥ विशाखेंद्रोपेंद्रैः विशाखः सेनानीः स्कंदः इंद्रस्य वज्रमुख्य

॥८६॥

मिश्रस्येगणनाईंद्रोमहेंद्रःउपेंद्रोविष्णुस्तैः शशिविशदकर्पूरखंडकलाः चंद्रवद्विशदाःकर्पू
रखंडकलाः घनसारखंडाः येषां ते विलिप्यंते विलेपनं क्रियंते मातः हे जननि तववदनतांबूल
कवलाः ॥ अत्रैवंपदयोजना ॥ हे मातः रणे दैत्यान् जित्वा उपहृतशिरस्त्रैः कैश्चिद्भिर्निर्यत्नैरर्थं
आज्ञात्रिपुरहरनिर्माल्यविमुखैर्विरिंचिस्कंदोपेंद्रैः शशिविशदकर्पूरखंडकलास्तववदनतांबूल
कवलाः विलिप्यंते ॥ अयमर्थः ॥ विरिंचिस्कंदोपेंद्राः दैत्यान् संहृत्य भगवत्याः कुमारं पुरस्कृ
त्यपादवंदनार्थमागत्य शिरस्त्राण्युपकार्यपादोपसंग्रहणमकुर्वन् तदनंतरं च सत्वा भग
वती ईषत्खादिततांबूलकवलोत्सृष्टकर्पूरखंडकलविलेपनपर्यंतं कारितवती सुक्तो ॥ एत
दत्रोनुग्रहो भगवत्याः कुमारे स्वामिन्येव इंद्रादिष्वपि कश्चित् इत्यभिप्रायः ॥ ६५ ॥ विपंच्या
गायंत्या विविधमवदानं पशुपतेस्त्वयारब्धे वक्तुं चलितशिरसा साधुवचने ॥ तदीयैर्माधु
र्यैरपलपिततंत्रीकलरवां निजां वीणां वाणी निचुलयति चोलेन निभृतं ॥ ६६ ॥ विपंच्या
[illegible] त्रिपुरविजयप्रयागध्वंसहालाहलधार

॥८७॥

उपक्रांते मधुरवचसेति वक्तुं निगदितुं चलितशिरसा अंतःसंतोषवशात् स्वयं शिरःकंपव
त्या साधुवचनैः मधुरवचनैस्तदीयैस्तस्य वचनस्य संबंधिभिः माधुर्यैर्माधुर्यगुणैः अपलपि
ततंत्रीकलकरवां अपलपिता अपहसिताः तंत्रीकलरवा यस्याः सा तां निजां स्वकीयां वीणां
विपंचीवाणीभारती निचुलयति निचुलवतीं करोति निचुलः कूर्पासविशेषः चोलः कूर्पा
सविशेषः वीणाकूर्पासः चोलेन निचुलवतीं करोतीति सामान्यविशेषभावेन न पौनरुक्त्यं
केचित्तु भोजमतावलंबिन आहुः॥ चुलिधातुस्तिरोधानवाचकः इति नितरां चुलयति आच्छाद
यतीत्यर्थः॥ अत्रेत्थं पदयोजना॥ हे भगवति पशुपतेर्विविधमवदातं विपंच्या गायंत्या त्वया
वक्तुं चलितशिरसा साधुवचनैरारब्धे सति तदीयैर्माधुर्यैरपलपिततंत्रीकलरवां निजां वी
णां वीणाचोलेन निभृतं निचुलयति॥ अत्रातिशयोक्तिरलंकारः॥ वीणाया निचुलनासंबंधे
पि संबंधकथनात् पराजितो यो वैणिकः स स्ववीणां चोलेन निचुलयति तेन सभाभेदाध्यवसा
नम्रनीतेः॥८६॥ कराग्रेण स्पृष्टं तुहिनगिरिणा वत्सलतया गिरीशेनोदस्तं मुहुरधरपानाकु
लतया॥ करग्राह्यं शंभोर्मुखमुकुरवृंतं गिरिसुते कथंकारं ब्रूमस्तव चिबुकमौपम्यरहितं॥८७॥ प

॥८७॥

कराग्रेण अग्रकरेण स्पृष्टं तु हिनगिरिणा हिमाद्रिणा जनकेन वत्सलतया वात्सल्येन पित्रादी
नां पुत्रादिषु प्रीतिर्वात्सल्य शब्देनोच्यते॥ यथोक्तं सर्वोत्तमेश्वरेण॥ पुत्रादौ वात्सल्यं पयादौ त्र
मत्रिष्यादावनुग्रहः अनुजादौ भक्तिरिति अत्रादि शब्देन गौणपुत्र गौणपत्नी गौणत्रिष्य गौ
णानुजा गृह्यंत इति॥ गौणपुत्रः पुत्रत्वेन कल्पित संबंधः न तु क्रीतादिः तस्य पुत्रत्वात् गौणप
त्नी भुजिष्या गौणत्रिष्यः त्रिष्यत्वेन कल्पित संबंध एव न तु स्वीकृत ग्रहण मात्रः गौणानुजो
नुजत्वेन कल्पित संबंधः न तु क्षेत्रजादिः गिरिशेन शंभुना उद्दस्त मुन्नमितं मुकुरस्यार्थं अध
रपानोकुलतया अधरपान व्यग्रतया अतिक्रमेण स्यर्थः॥ करग्राह्य करेण गृहीतुं योग्यं मुख
वलोकन चुंबन व्यग्रतया मुखमुकुरयं तं मुखमेव मुकुरो दर्पणस्तस्य वृंतं तदाधारदंडः गि
रिशैलसुते हे हिमाद्रितनये कथं कारं कथं कृत्वा ब्रूमः वर्णयामः विभाषा कथमिति लिङर्थे सं
प्रधारणायां लेट्॥ तव भगवत्याश्चिबुकं अधराधः कलिकां औपम्यरहितमुपमातीतं॥ उप
मारा हि स्यं तु कमलकलिका दर्पण वृंतादयादि त्रिखरवत्रिलादीन शंभु हिमगिरिकरोपलालि
त जनित सौभाग्यातिशयेन भगवती चिबुकस्य तुलना नास्ति॥ अत्रेत्थं पदयोजना॥ हे हिम

नी
॥८८॥

गिरिसुते तुहिनगिरिणा वत्सलतया करांग्रेण स्पृष्टं गिरिशेन अधरपानाकुलतया मुहुरुद
स्तं शंभोः करग्राह्यं औपम्यरहितं तव मुखमुकुरं वृत्तं कथं कारं ब्रूम इति॥ अत्रानन्वयालंकारो
व्यज्यते॥ सर्वोपमानतिषेधेने स्वस्वयमेव सदृशमित्यनन्वयालंकारस्त्र तीतेः॥८७॥ भुजा
श्लेषान्निसं पुरदमयितुः कंटकवतीतव ग्रीवा धत्ते मुखकमलनालश्रियमियं॥ स्वतः श्वे
ताकालागुरुबहुलजंबालमलिमरणालीलोलिसं वहति यदधो हारलतिका॥८८॥ भुजाश्ले
षान्नित्याभ्यामालिंगनान्नित्यं संततं पुरदमयितुः पुरांतकस्य कंटकवती सरोमांचा तव ग्रीवा कं
ठनाला धत्ते दधाति मुखकमलनालश्रियं मुखमेव कमलं तस्य नालश्रियं दंडसौभाग्यं इयंग्री
वा स्वतः श्वेता स्वभावतः स्वच्छा कालागुरुबहुलजंबालमलिना कालो नीलवर्णः अगुरुः ल
घुकाष्ठं कृष्णागुरुरित्यर्थः॥ तस्य बहुलः समृद्धः जंबालः पंकस्तेन मलिना मलीमसा मृणाली
लोलिसं बिसलता सौभाग्यं वहति धारयति यस्मात् अधःप्रदेशे हारलतिका मुक्तावली॥
अत्रेयं पदयोजना॥ हे भगवति तव ग्रीवा पुरदमयितुः भुजाश्लेषान्नित्यं कंटकवती मुखक
मलनालश्रियं [illegible] यस्मात्कार[illegible] अधःप्रदेशे स्वतः श्वेता कालागुरुबहुलजंबालमलि

॥८८॥

नाशरल्लतिकामृणालीलालित्यसंचल इति॥ अत्र पूर्वार्द्धे निदर्शनालंकारः॥ मुखकमलनालश्रिय
मित्यत्र श्रीसदृशीश्रीरितिप्रतिबिंबाक्षेपानुरूपकमित्यलंकारः॥ मुखकमलमित्यत्र मुखे क
मलत्वनिरूपणादनयोरंगांगीभावेन संकरः॥ उत्तरार्द्धेपि निदर्शनालंकारः मृणालीलालि
त्यमित्यत्र लोलालित्यसदृशं लालित्यमिति प्रतिबिंबाक्षेपादुभयोरंगांगीभावेन संकरः॥ ९८॥
गले रेखास्तिस्रो गतिगमकगीतैकनिपुणविवाहव्यानद्धप्रगुणगुणसंख्याप्रतिभुवः॥ विरा
जंते नानाविधमधुररागाकरभुवां त्रयाणां ग्रामाणां स्थितिनियमसीमान इव ते॥ ९९॥ गले
कंठप्रदेशे रेखा भाग्यरेखावलिरूपास्तिस्रः॥ ललाटे च गले चैव मध्ये चैव वलित्रयं॥ स्त्रीपुंस
योरिदं ज्ञेयं महाभाग्यैकसूचकमिति सामुद्रिके॥ गतिकगमकगीतैकनिपुणे गतिः संगीतगतिः
संगीतस्य द्वे गती मार्गी च देशी च गमकः स्वरस्य कंपः स्वरस्य कंपो गमकः स च पंचविधः स्मृत
इति भरते॥ ते च पंचप्रकारास्तत्रैव ज्ञातव्याः॥ गीतं गेयं धातुमात्रात्मकं द्विविधं वाग्ज्ञातुरुच्य
ते गेयं धातुरित्यभिधीयत इति॥ तत्रैकामुख्या चासौ निपुणा च तस्याः संबुद्धिः॥ विवाहव्यानद्ध
प्रगुणगुणसंख्याप्रतिभुवः विवाहे उद्वाहसमये व्यानद्धाः विशेषेण मंगलसूत्रेकबंधनानंतरं

॥८९॥

तस्मसमये आसमंतात् कंठे कस्त्वमाचरन्नद्धाः बद्धाः त्रिगुणगुणाः बहुतंतुनिर्मितसूत्राणि त्री
णि तानि त्रीण्येव॥ यथोक्तं ग्रंथकारैः॥ मंगलार्थं तंतुना तेन बध्वा मंगलसूत्रकं॥ वामहस्ते सरं ब
ध्वा कंठे च त्रिसरं तथेति॥ इदं चानुष्ठानं देशतो व्यवस्थापितं॥ अत एव क्वचिद्देशे मंगलसू
त्रबंधनं क्वचिद्देशे सरत्रयबंधनं क्वचिदुभयमपि नास्तीति॥ अस्मिन्मते सर्वत्रास्तीति॥ य
द्धा॥ ग्रंथकर्तादेशे उभयानुष्ठानं विद्यत एवेति ज्ञेयं॥ त्रिगुणगुणानां संख्या त्रित्वं तस्याः प्रतिभु
वः यथा प्रतिभूः उत्तमस्य अधमर्णं ज्ञापयति॥ एवं संख्यां ज्ञापयतीति प्रतिभुव इत्युक्तं
संख्याज्ञापकाः अस्मदाश्रयकंठे शंभुना पूर्वं भगवती विवाहसमये सरत्रयमस्मिन् स्थ
ले बद्धमिति द्रष्टॄणां ज्ञापयति वलित्रयमिति भावः॥ विराजंते अतितरां प्रकाशंते॥ नानाविध
मधुररागाकरभुवां नानाविधा अनेकप्रकाराः मधुरा मनोरमाः रागास्तेषामाकरभुवः ख
निस्थानानि मेयभूतास्तेषां॥ अयमर्थः॥ गीतयः पंचतदुक्ताः ग्रामरागास्त्रिंशत् उपरागा
अष्टौ रागास्तु विंशतिः जनरागाः पंचदश भाषारागाः षण्णवतिः विभाषारागा विंशतिः अं
तरभाषाश्चत्रयः इत्यादिकं रागाध्याये प्रतिपाद्यं॥ अत्रावगंतव्यं ते च रागाः प्रसिद्धाः॥ मध्य

॥८९॥

मावती मालश्री: भैरवी बंगाली वसंत: धनाश्री देश्यादिकरागांगं वेलावलीशुद्धवराडीनन्दु
दिकं भाषांगं रामकृत्यादिकं क्रियांगं द्राविडीगूर्जरीवराली मल्हरीप्रसुखं उपरागं वरागग्राब्दे
नसंगृहीतं मिस्रकं नानाविधमधुररागाकरभुवामिति त्रयाणां ग्रामाणां ग्रामशब्द: समूहवच
न: सर्वेस्वरास्त्रेधा संहता: षड्जग्रामो मध्यमग्रामो गांधारग्राम इति त्रेधा स्वरसंहति:॥ तत्र भूलो
के ग्रामद्वयस्यैव प्रसर: सप्तस्वराणामारोहावरोहक्रमेण मूर्छनाश्रयत्वं तत्त्वमंद्रमध्यतारा
लेनात्रेधा भवति गांधारग्रामस्य स्थिर: स्थानत्रयात्मैद्रादिक्रमेणोपक्रमासंभवात् गांधारग्रा
मो देवलोके प्रसृत:॥ यथोक्तं शार्ङ्गदेवेन॥ ग्राम: स्वरसमूह: स्यान्मूर्छनादे: समाश्रय:॥ तौ द्वौ
धरातले स्यातां षड्जग्रामस्तदादिम:॥ द्वितीयो मध्यमग्रामस्तयोर्लक्षणमुच्यते इति क्रमात्स्व
राणां सप्तानामारोहश्चावरोहणं मूर्छनेत्युच्यते॥ ग्रामद्वयेता: सप्त सप्त चेति॥ एता मूर्छना: शुद्धा
स्तानाइस्कंधेते॥ अभ्यभग वस्याकंठवल्लीत्रयवर्णनाय ग्रामत्रयकथनं देवलोकव्यवहारत्वाद्यु
ज्यत इत्यनुसंधेयं॥ तेषां ग्रामाणां स्थिति नियमसीमान: स्थितेरवसाने स्यनियमार्थं ग्रामा
णां परस्परं संकरो माभूदिति तेषामंतेरचिता: सीमानो अवधय इव तेन च॥ अत्रैवं पद्यो

जना॥ हे भगवति गलनिगमकगीतैकनिपुणे तव गलेन तिस्रो रेखाः विवाहव्याख्यानकृत्रगुणगुणसंख्या त्रितिभुवः नानाविधमधुररागाकरभुवां त्रयाणां ग्रामाणां स्थितिनियमसीमान इव विभ्राजन्ते॥ पूर्वार्द्धे अनुमानालंकारः॥ रेखास्तिस्रः यस्य मंगलसूत्रत्रित्वानुमापकत्वात्॥ अनुमानस्य विच्छित्यात्मकत्वे लौकिकालंकारत्वे लक्ष्म्या देवताहं लक्षण्ये च पक्षधर्मतामात्रान्व्याप्त्यभावेऽप्युभयत्र वैतालिकमेव स्यादिति रहस्यम्॥ विच्छित्तिरलौकिकपभा॥ उत्तरार्द्धे उत्प्रेक्षालंकारः॥ भगवत्याः कंठमध्यवर्तिस्वरग्रामत्रितयहेतुत्वेन रेखावलित्रयस्य संभावनात्॥६९॥ मृणालीमृद्वीनां तव भुजलतानां च तरुणां चतुर्भिः सौंदर्यं सरसिजभवः स्तौति वदनैः॥ नखेभ्यः संत्रस्यत्प्रथममथनादुध्यकरिपोश्चतुर्णां दोर्दण्डानामभयहस्तार्पणधिया॥७०॥ मृणालीमृद्वीनां मृणालीविसलतातद्वन्मृद्वीनां मृदूनां॥ वोतोगुणवचनादिति ङीप्॥ तवभगवत्याः भुजलतानां बाहुलतानां च तस्रणां चतुर्भिः सौंदर्यं सौभाग्यं सरसिजभवो ब्रह्मा स्तौति प्रस्तौति चतुर्भिर्वदनैर्वक्त्रैः नखेभ्यः करजेभ्यः सकाशात्संत्रस्यद्भिभ्यत्त्भीत्रार्थानां भयहेतुरिति [illegible] प्रथममथनात् प्रथमं मथितत्वात् प्रथममथ

नः॥ कर्त्तरित्युक्तं॥ यथाह वृत्तिकारः॥ वोतो गुणवचनादिति सूत्रे गुणमुक्तवान् गुणवचन इति॥

ब्राह्मणः पंचमं शिरः नखाग्रेणाछिनदुरु इति पुराणं तस्मात्प्रथममथनात् अंधकरिपोः स

दाशिवात् चतुर्णां शीर्षाणां शिरसां समं युगपदेव अभयहस्तान् गृहीतुकाम इत्यर्थः॥ अत्रैवं

पदयोजना॥ हे भगवति तव मृणालीमृदूनां चतसृणां भुजालतानां सौंदर्यं स्वरसिजभवश्चतु

र्भिर्वदनैः प्रथममथनादंधकरिपोर्नखेभ्यः संत्रस्यन् समं चतुर्णां शीर्षाणां अभयहस्ता

र्पणधिया स्तौतीति॥ अत्र काव्यलिंगमलंकारः॥ अलेकनियत स्तोत्रे स्यन नखेभ्यः संत्रस्यन्नि

त्यादिना समर्थनात्तद्वाक्यार्थहेतुत्वमिति ध्येयं॥ भुजलतावर्णनेन ब्रह्मण एवाधिकारो नान्ये

षामिति काव्यलिंगेन ध्वन्यते पक्तिस्वलंकारेण वस्तुध्वनिः॥ ७०॥ नखानामुद्योतैर्नवनलि

नरागं विहसतां कराणां ते कांतिं कथये कथयामः कथमुमे॥ कयाचिद्वा साम्यं भजतु कलया

हंत कमलं यदि क्रीडल्लक्ष्मीचरणतललाक्षारसवणं॥ ७१॥ नखानां नखराणामुद्योतैः प्र

भापटलैः नवनलिनरागं प्राभातिकांबुजकांतिं विहसतां अपलपतां कराणां हस्तानां ते तव कां

तिं शोभां कथय वद कथयामः काव्यप्रबंधं रचयामः कथं केन प्रकारेण उमे पार्वति कयाचि

॥९२॥

द्वेऽस्य संशये॥ संशयोक्तिः केनापि प्रकारेण नास्तीत्यर्थः॥ साम्यं सादृश्यं भजतु स्वीकरोतु कल्पय
लेशेनापि हंत वाक्यारंभे॥ हंत हर्षेऽनुकंपायां वाक्यारंभविषादयोरित्यमरः॥ कमलं कल्पं यदि सं
शये तदापि संदेह इत्यर्थः॥ क्रीडल्लक्ष्मीचरणतललाक्षारसवर्णं क्रीडंत्याः लक्ष्म्याः पद्मालयायाः
चरणतलयोः लाक्षारसेन वर्णं वित्तं तेन वित्तमर्थं चुघणयावितिवणष्॥ अत्रेत्थं पदयोजना॥ हे
उमेतेन रवानामुद्योतैः नवनलिनरागं विहसतां कराणां कांतिं कथं कथयामः कथय॥ कमलं क
ल्पयापि साम्यं कयाचिद्वा भजतु हंत कमलं क्रीडल्लक्ष्मीचरणतललाक्षारसवर्णं यदि तथापि सा
म्यं भजलिति॥ यद्वा॥ कयाचिद्वा साम्यं भजतु विधयेति पाठस्तदा कयाचिद्विधया इत्यन्वयः॥ तामेव
विधामाह॥ यदि क्रीडल्लक्ष्मीत्यादिना न्यायार्थत्वकेवाक्यतयान्वयः॥ अत्रातिशयोक्तिरलंकारः॥
यद्यर्थोक्त्या अतिशयकल्पनात्॥ पूर्वार्द्धे तद्गुणालंकारः नखकांतिभिः रक्तत्वात्॥ कराणां नवनलि
नरागं विहसतामित्यत्र उपमालंकारः॥ उभयोरनुसृष्टिः अपृथक्स्थित्या प्रयोजकत्वात् उभ
योः संसृष्टिः॥७१॥ समंदर्शितं स्कंदद्विपवदनपीतस्तनयुगं तवेदं नः खेदं हरतु सततं प्रस्तुतमु
खं॥ यदालोक्याशंकाकुलितहृदयो हासजनकः स्वकुंभौ हेरंबः परिमृशति हस्तेन झडिति॥७२॥

॥९२॥

समं तुल्य कालं हे देवि भगवति स्कंद द्विपवदन पीतं स्कंदः कुमारः द्विपवदनः विनायकः ताभ्यां पीतं स्तनयुगं कुचद्वंद्वं तव भवत्याः इदं परिदृश्यमानेनः अस्माकं खेदं क्लेशं हरतु अपनुदतु सततं सर्वदा प्रस्नुतमुखं क्षीरस्राविमुखं॥ यत् कुचद्वंद्वं आलोक्य आत्तः आकुलितहृदयः आत्ता कया मदीयौ कुंभाव पहृतवती स्यात्तां कया आकुलितं अवस्कंदितं व्यग्रतरमित्यर्थः॥ हासजनकः मातापित्रोः कुमारस्य च असौ बालिश इति प्रेम्णा हसितवंतावित्यर्थः॥ [illegible] कुंभस्थले हेरंबः॥ विनायकः परिमृशति परामृशति विघटितेनैवेति हस्तेन निर्मार्ष्टीत्यर्थः॥ स्पृशतीति॥ अत्रेत्थं पदयोजना॥ हे देवि तव समं स्कंदद्विपवदनपीतं इदं स्तनयुगं प्रस्नुतमुखं नः खेदं सततं हरतु॥ यत् आलोक्य आत्ता आकुलितहृदयः हेरंबः हासजनकः हस्तेन स्पृशति स्वकुंभौ परिमृशति॥ यस्याः पुत्रौ जगत्पूज्यपादौ विनायककुमारस्वामिनाविति देव्याः सर्वोत्तमत्वमित्यर्थः प्रतीयते॥ देव्याः कुच कुंभसाम्यं यदि स्यात्तर्हि विनायककुंभयोरेव नान्यस्येति ध्वन्यते॥ विनायकः हस्तेन परिमृशतीत्यनेन विनायककुंभयोस्तौल्यं देवीकुचाव वेति उपयोपमापि ध्वन्यते॥ एषु अलंकारध्वनीनां एकव्यंजकानुप्रवेशेन संकरः॥ ७२॥ आ०॥

८०

अमृते वक्षोजाव मन्तर समाणिक्य कुतुपौ न संदेहस्पंदो न गणपतिपताके मनसि नः॥ पिबं तौ तौ यस्माद् विदित वधू संगसैरसिकौ कुमारावद्यापि द्विरदवदनक्रौंचदलनौ॥ ७३॥ अमू परिदृश्य मानौ ते वक्षोजौ कुचौ अमन्तरस माणिक्य कुतुपौ अमन्तरस्य माणिक्य कुतुपावित्यर्थः॥ कुतुप शब्दोयद्यपि चर्मनिर्मित घृततैलाद्याधारभूतो घृटसन्निभपात्रवाचकः तथापितस्याः भगवतीस्तन सादृश्यावगाहने अनधिकारात् तदर्थं माणिक्यरचितत्वमंगीकृतं॥ कुतुपयोर्न संदेहस्य स्पंदनं लेशमात्रमिति यावत् गणपतिपताकमनसि चित्ते नः अस्माकं पिबं तौ तौ माणिक्य कुतुपौ यस्मात्कारणात् अविदित वधू संगरसिकौ कुमारौ विभूतः त्वा अद्यापि इदानीमपि प्रौढ़ कश्रवण काले पि द्विरदवदनक्रौंचदलनौ द्विरदवदनो विनायकः क्रौंचदलनः क्रौंचा द्रिभेदनः कुमारः तौ गजाननस्वामिनौ॥ अत्रेत्थं पदयोजना॥ हे नगपतिपताके ते अमू वक्षोजौ अमन्तरस माणिक्य कुतुपौ अस्मिन्नर्थे नः मनसि संदेहस्पंदो नास्ति॥ यस्मात् तौ पिबं तौ अविदितवधू संगरसिकौ द्विरदवदनक्रौंचदलनौ अद्यापि कुमारौ भवतः॥ अत्र वाक्यार्थ हेतुकः काव्यलिंगालंकारः स्पष्ट एव॥ पूर्वपादे रूपकं वक्षोजयोः कुतुपत्वेनारोपणात्॥ यद्

॥ ९२॥

॥ ९२॥

निश्चयात् संदेहः द्रुमौ वक्षौजौ [illegible] कुतुपाविमिति संदेहे कुतुपावेवेति निश्चयः अत अमृतपानात्
कुमारयोः शुभत्वे तत्स्यपानमात्रेण [illegible] चस्य वेति नियमो नास्ति श्रीशावानंतरं पोषनादेरनुभा
व्यत्वादिति विनायककुमारयोस्तु सर्वदा शिशुत्वं अमृतपानवशादेवेति ॥ अमृतकुतुपसंदेहा
पनयने साधकं प्रमाणं द्वितीयार्द्धप्रमेयमिति सूक्तं ॥ निश्चयांतः संदेह इति ॥ अविकवित्वे कोटि
द्वयस्य वास्यत्वेनास्तीति मंरवुकः ॥ ७३ ॥ वहस्तंबस्तंबेरमदनुजकुंभप्रकृतिभिः समानं दुग्मुक्ता
मणिभिरमलां हारलतिकां ॥ कुचाभोगो बिंबाधररुचिभिरंतः शबलितां प्रतापव्याप्तिं श्रीपुरद
मयितुः कीर्तिमिव ते ॥ ७४ ॥ वहतिदधाति अंबमातः स्तंबेरमदनुजकुंभप्रकृतिभिः स्तंबेरमद
नुजो गजासुरः तस्य कुंभस्थल एव प्रकृतिर्जन्मभूमिर्येषां तैः गजकुंभेषु मुक्तामणय उद्भवंति ॥
यथोक्तं सर्वज्ञसोमेश्वरेण ॥ गजकुंभेषु वंशेषु फणासु जलदेषु च ॥ शुक्तिकायामिक्षुदंडे षोढा मौ
क्तिकसंभवः ॥ गजकुंभे कर्बुराभा वंशे रक्तान्विताः स्मृताः ॥ फणासु वासुकेर्नीलवर्णाः प्रकीर्तिताः ॥
ज्योतिर्वर्णास्तु जलदे शुक्तियायां शिताः स्मृताः ॥ इक्षुदंडे पीतवर्णा मिणायो मौक्तिकाः स्मृता इति ॥
गजकुंभप्रकृतयो मौक्तिकमणयः कर्बुरवर्णाः ॥ गजासुरकुंभप्रकृतयस्तु त्रिरोषन इति भावः ॥

९१

॥९३॥

समानवृत्तं खचितां मुक्तामणिभिः मौक्तिकैः अमलां त्रासादिदोषरहितां न तु भ्येतां गजकुंभोद्भवा
नां कर्बुरत्वात् हारलतिकां मुक्तामणिभिः कुचाभोगः कुचमध्यप्रदेशः बिंबाधररुचिभिः बिंबाक
रोधरो बिंबाधरः शाकपार्थिववत्साधुः॥ बिंबाधरस्याधरबिंबस्य रुचिभिः अंतः शबलितां सं
जालचित्रवर्णा॥ चित्रं किर्मीरकल्माषशबलैताश्च कर्बुरे इत्यमरः॥ अधरकांतिशबलितां शुक्ति
मुक्तामणिमालिकां वहतीति भावः॥ प्रतापच्छायामिश्रां प्रतापेन मिश्रितां पुरदमयितुस्त्रिपुरांतक
स्य कीर्तिमिव। लोके च प्रतापस्तु रक्तवर्णः कीर्तिश्चेतवर्णेति महाकविप्रसिद्धिः॥ अत एवास्य क ॥९३॥
वेः गजकुंभोद्भवा मणयः पाटलवर्णाः न शबलवर्णाः अंतःशबलितामिमुक्तिरपि पाटलवर्णे
त्यभिप्रायः इत्यनुसंधेयं॥ अत्रेत्थं पदयोजना॥ हे अंब ते कुचाभोगः स्तंबेरमदनुजप्रकृतिभिः
मुक्तामणिभिः समानवृत्तं अमलां हारलतिकां बिंबाधररुचिभिरंतःशबलितां प्रतापच्छायामिश्रां ने
पुरदमयितुः कीर्तिमिव वहति॥ अत्रोत्प्रेक्षालंकारः॥ हारलतिकायाः प्रतापशबलितत्कीर्ति
त्वेन संभावनात्॥ बिंबाधररुचिभिरित्यचोत्प्रेक्षा॥ स्वभावतो रक्तवर्णेषु बिंबाधररुचिशबल
नादिवेति हेतोरुत्प्रेक्षणात्॥ उभयोरनुग्राह्यानुग्राहकभावेन संबंधः अपृथक्स्थितिः साऽपकारक

त्यात्॥७४॥ तवस्तन्यं मन्ये धरणिधरकन्ये हृदयतः पयःपारावारः परिहरति सारस्वतइव॥
दयावत्यादत्तं द्रविडशिशुरास्वाद्य तव यत्कवीनां प्रौढानामजनि कमनीयः कवयिता॥७५॥ तव
स्तन्यं स्तनोद्भवं क्षीरं मन्ये जानामि धरणिधरकन्ये तुहिनगिरिकन्ये हृदयतः हृदयात् पयःपा
रावारः क्षीरसमुद्रः॥ सुधाधारासार इति पाठः सुधाधारासारः सुधाप्रवाहः परिवहति सारस्व
तीमय इव स्तन्यस्य श्वेतवर्णत्वात् सरस्वतीमयत्वेनोत्प्रेक्षणं॥ माधुर्यं सुधारूपत्वेन च दयाव
त्याप्ररास्तोकृपायुक्तया दत्तं स्तन्यं द्रविडशिशुः द्रविडजातिसमुद्भवो बालः एतत्स्तोत्रकर्ता आस्वा
द्य पीत्वा तव यद्यस्मात् कारणात् कवीनां कवीश्वराणां प्रौढानां प्रगल्भानां मध्य इति निर्धारणे

यः

षष्ठी॥ अजनि जातः कमनीँ अतिरमणीयः कवयिता कविः॥ अत्रेत्थं पदयोजना॥ हे धरणि
धरकन्ये तव स्तन्यं हृदयत उत्थितः सुधाधारासारः पयःपारावारो वा सारस्वतइव परिवहतीति
मन्ये॥ यद्यस्मात् दयावत्या त्वया दत्तं यत्तव स्तन्यं द्रविडशिशुरास्वाद्य प्रौढानां कवीनां मध्ये क
मनीयः कवयिता अजनि॥ अत्रोत्प्रेक्षालंकारद्वयं॥ पदंव्याख्यानावसरे कथितं॥ उभयोः
संसृष्टिः॥७५॥ हरक्रोधज्वालावलिभिरवलीढेन वपुषा गभीरे ते नाभीसरसि कृतसंगामन

९२

सिजः॥ समुत्तस्थौ तस्मादचलतनये धूमलतिका जनस्तां जानीते जननित वरोमावलिरिति॥ ७६॥
हरस्य क्रोधाग्नेर्ज्वालावलिभिः आलीढेन आविष्टेन वपुषा द्वारीरेण गभीरे निम्ने तव नाभीसरसि
नाभ्येव सरस्तस्मिन्कृतसंगो मनसिजः मन्मथः तत्र निमग्न इत्यर्थः॥ समुत्तस्थौ उद्भूतः तस्मा
न्नाभीसरसः अचलतनये हे पार्वति धूमलतिका धूमावलिः अंगप्रत्यंगोद्भवा तां धूमलतिकां
जनः लोकः जानीते वर्णयति जननि हे मातस्तव रोमावलिरिति रोमराजिरिति॥ अत्रैवं पदयो
॥ १८४॥ जना हे अचलतनये मनसिजः हरक्रोधज्वालावलिभिरवलीढेन वपुषा ते गभीरे नाभीसर ॥ १८४॥
सि कृतसंगः तस्माद्धूमलतिका समुत्तस्थौ तां जनः रोमावलिरिति जानीते॥ अत्रोत्प्रेक्षालं
कारः॥ रोमलतिकायां धूमावलित्वेनोत्प्रेक्षणात्॥ यद्वा॥ जनस्तां जानीत इत्यनेन भ्रांतिमान्
तीयते रोमरेखा भ्रांतिजनकत्वात्॥ यद्वा॥ अतिरूपोक्तिः जनस्तां रोमावलीमध्यवस्यतीति
प्रतीतेः॥ यद्वा निश्चयांतः संदेहः तां रोमावलिरिति निश्चिनोति॥ एवं चतुर्णामलंकाराणां जा
नीत इति पदानुप्रवेशात् एकवाचकानुप्रवेशो न संकरः॥ ७६॥ यदेतत्कालिंदीतनुतरतरंगा
कृतिर्निर्मिवेल्लत्रामध्ये किं विज्जननितव यज्ञातिसुधियां॥ विमर्दादन्योन्यं कुचकलशयोरंतर

गतं तनूभूतं व्योम प्रविश्य दिव नाभीकुहरिणी॥ ७॥ मध्देतनूपुरछर तनूयछद्ध्स्यएतछद्ध सह
चरितस्य प्रसिद्धिवाचकत्वंना। तेअतएवपुमद्धछद्धोपादानं कालिंदीतनुनरततरंगाकृति कालिं
धायमुनायास्तनुतरः अतिसूक्ष्मस्तरंगस्तस्याकृतिरिवआकृतिर्यस्य तत् त्रिवेभगवति कलरो
तनुमध्येअवलग्ने किंचित् जनेनितवयज्ञातिस्फुरति सुधियां विदुषां विमर्दात् संघर्षात् अन्यो
न्यं परस्परं कुचकलशयोस्तनकुंभयोः अंतरगतं मध्यवर्तितनूभूतं सूक्ष्मं व्योमगगनं प्रविश्य
दिवप्रवेशं कुर्वद्दिव नीलं नभः सा बालगोपालप्रसिद्धं गगनस्य नीलिमा मूर्तत्वचकविप्रसिद्धा
नाभीकुहरिणी कुहरवती॥ अत्रेथंपदयोजना॥ हेत्रिवेजननितवकृशोमध्येयदेतत्कालिंदीतनु
तरतरंगाकृति किं चिद्रोमावलीरूपं वस्तु सुधियां यज्ञातिनत्कुचकलशयोरंतरगतं तनूभूतं
व्योम अन्योन्यंविमर्दात् दिवकुहरिणी नाभीप्रविश्य ज्ञाति॥ नीलं मूर्तं नभः कुचकलशाविमर्दव
शात् आधोभागेस्तस्तनाभिपर्यंतं तरल्लता न्यायेनावतिष्ठतेतद्रोमावलीवदंतीतिभावः॥ अ
त्रोत्प्रेक्षालंकारः॥ रोमलतायागगनत्वेन संभावनात्॥ प्रथमपादेनिदर्शनालंकारः॥ तरं
गाकृतिवदाकृतिरितिबिंबप्रतिबिंबाक्षेपात् अनयोः संसृष्टिः ७७॥ स्थिरोगंगावर्तस्तनमुकुरतो

८३

माचलिलताकलावालं कुंडं कुसुमशारतेजोहुतभुजः ॥ रतेर्लीलागारं किमपि तव नाभी गिरि
सुते बिलद्वारं सिद्धेर्गिरिशनयनानां विजयते ॥७८॥ स्थिरः विनाशरहितः गंगावर्तः गंगाया अं
भसां भ्रमः आवर्तस्य क्षणिकत्वात् तद्व्यतिरेकः स्थिर इति स्तनमुकुररोमावलिलताकलावा
लं स्तनावेव मुकुलौ पुष्पकोरकौ तयो रोमावलिरेव लता आधारभूता जनयित्री तस्याः कला
अंशाः तस्या आलवालं कुंडं होमार्थं संपादितं यत्नं अग्निस्थानं कुसुमशारतेजोहुतभुजः कुसु
मशरस्य मन्मथस्य तेज एव दीप्तिरेव हुतभुग्वह्निः तस्य रतेर्मदनपत्न्याः लीलागारं विलासगृ
हं तत्रैव सदा मदनसङ्गात् नूतत्रैवासीत्तत्रैव वर्तत इति ॥ किमपि अनिर्वाच्यं अतिसुंदरमि
त्यर्थः ॥ तव नाभी गिरिसुते बिलद्वारं गुहाद्वारं सिद्धेस्तपःसिद्धेः गिरिशनयनानां विजयते
सर्वोत्कर्षेण स्फुरति ॥ अत्रेत्थं पदयोजना ॥ हे गिरिसुते तव नाभी स्थिरो गंगावर्तः स्तनमुकुल
रोमावलिलताकलावालं कुसुमशारतेजोहुतभुजः कुंडं रतेर्लीलागारं गिरिशनयनानां सि
द्धेर्बिलद्वारं किमपि विजयते अत्रोल्लेखालंकारः ॥ एकस्य नाभेरनेकत्वेनोल्लेखनात् ॥ नायम
तिशयोक्तिः एकस्यानेकत्वेनोल्लेखनादेव नाप्यतिशयोक्तिमालाकिमपीत्यध्यवसितुमशक्य

॥१९५॥

यो न्॥ किमपीत्यनेन सार्द्धमालात्वस्यानुचितत्वादिति रहस्यं॥७८॥ निसर्गक्षीणस्य स्तननत
टभरेण क्लेममनुषो नेमनम्मूर्तैर्नारीतिलकत्रानकैस्तु घातइव॥ चिरं ते मध्यस्य त्रुटितनटिनीतीर
तरुणा समाधस्थः स्थेम्नोभवतु कुशलं शैलतनये॥७९॥ निसर्गेण स्वभावेन क्षीणस्य अति
कृशस्य स्तननतटभरेण क्लेममनुषः क्लांतिमतः अतएव नमन्मूर्त्तेर्नारीतिलकैस्त्रीरत्नभूतेस्त्रान
कैस्तोकस्तोकैर्नुघातइव स्थितस्य त्रुटितनटिनीतीरतरुणात्तटिनेतटिनीतीरे तरुर्वृक्षस्तेन
समायां तुल्यायां अवस्थायां स्थेमा स्थैर्यं यस्य तस्य भवनु भूयात् कुशलं क्षेमं त्रुटनाभावः शै
लतनये हे पार्वति॥ अत्रेत्थं पदयोजना॥ हे शैलतनये नारीतिलके निसर्गक्षीणस्य स्तननतटभ
रेण क्लेममनुषः नमन्मूर्त्तेः शनैकैः त्रुघनइव स्थितस्य त्रुटिनतटिनीतीरतरुणा समानस्था स्थे
म्नः नेवमध्यस्य चिरं कुशलं भवतु॥ मध्यस्य स्येयमादिप्रयोगाः सहृदयहृदयाह्लादकारिणो मह
हाकविशिक्षाभ्याससमासादिताः॥ एतादृशप्रयोगनिपुणो महाकविरित्युच्यते॥ अत्रोपमालंका
रः॥ भग्नंनदीकूलवर्तिमहीरुहमल्लिकासाम्यं मध्यस्येति॥८०॥ कुचौ सुघः स्थि घत्त व घटित
कूर्पासभिदुरौ कषंतो दोर्मूले कनकेकलशाभौ कल्पना॥ न वेत्रानुभंगाद् दलमिति वलग्नं न

नुभुवा त्रिधा नद्धं देवि त्रिवलिलवलीवल्लिभिरिव॥८०॥ कचौ स्तनौ सघस्तदानीमेव स्विधघटात्
घटितकूर्पासभिदुरौ स्थिरघनौ स्वैरं तौ ततो प्राप्तौ इति योः घटितस्य कूर्पासस्य भिदुरौ भेदकौ॥ कर्म
कर्तरि कुरजित्यत्र कर्तर्यपि कुरच् स्मरक्षितसु कर्मणि कर्तरि च कुरजिति भाष्यचष्टे॥ सघस्तनघ
टितकूर्पासभिसभिदुरावितिपाठे सघस्तानेनतदानीतनेन नूतनत्वेन घटितकूर्पासं तस्य तस्य भिदु
रौ प्रतिक्षणं प्राणेश्वरस्य सद्यः शिवस्य रूपानुसंधाने नवोत्तिक्तावयवैः प्रतिक्षणं भिघने संधि
बंधे कंचुलिकेति भावः॥ कर्षंतौ निकर्षंतौ दोर्मूले कक्षप्रांतदेशौ कनककलशाभौ कनककलश
योर्हेमकुंभयोरिव आभा सौभाग्यं ययोस्तौ कलयतार चयता निर्मिमाणेन नवभवसास्वानुरक्षि
तुं वलग्नमिति शेषः॥ यद्वा प्रथमांतस्य वलग्नस्य कर्मत्वेनान्वयः॥ भंगात् स्तनभरजेनितातूअ
लमिति अलं शब्दो वारणार्थः भंगो माभूदित्यर्थः॥ वलग्नं मध्यप्रदेशं तनुभुवा मन्मथेन त्रिधा
त्रिप्रकारेण नद्धं बद्धं देवि दिव्यतीति देवी तत्संबुद्धिः हे भगवति त्रिवली तिस्रो वल्यो विभंगा
यस्य तत् लवलीवल्लिभिः लवलीनामकलता यत्ताभिः विपक्वं नाश्वेत पुष्पीत स्याः पुष्पाणि
श्वेतानि अकारादि द्विपदैतु ... वल्ली सा शोभना ... मधुकलतेस्त ... यथार्थ स्वीकारार्थं॥

॥१९६॥

॥१९६॥

इवशब्दः संभावनायां प्रवर्त्तितः अर्थः इवशब्दस्य संभावनाद्योतकत्वमस्तीति पूर्वमेवोक्तं॥ अत्रेयं
पदयोजना॥ हे देवि सखरः स्निग्धमुद्घटितकर्पासनि दुरोदोर्मूले कथं तौ कनककलशाभौ कलयतानि
कुंभुवोभंगादलंमिति वल्लन्तचातुच्चिवल्लिले वल्लीवल्लिभिस्तेधानेदुमिव॥ अत्रोत्प्रेक्षालंकारः॥
भगवत्याः कुचनिर्माणे मन्मथस्येवाधिकारोन जरद्वल्लण इति जरद्वल्ल निर्माणसंबंधेपिअ
संबंधोलया अभेदाध्यवसायः कविकल्पितवस्तु कल्पनायोः सौंदर्ययोरवेति अभयोरंगांगिभावेन सं
करः नन्वेवं कुचौ रचयता मन्मथेनेस नुवादविशेषणमहिम्ना मन्मथकर्तृत्वस्य सिद्धिः यदनुवा
दात् कुचनिर्माणे वर्तमानसंबंधाभावात् संबंधोक्तेरसामंजस्यमिति चेन्न॥ मैवं॥ कुचौ कनक
कलशाभौ कलयतेति शतृप्रत्ययेन वर्तमानार्थेन कुचकलशस्य वर्तमानेकालसंबंधमप्रती
तेरसंबंधोक्तेः संबंधोक्तिः राजते॥ न चायं भूतकालसंबंधे प्रि संबंधकथनमस्तीति भूतकाल
संबंधे पि भूतकालक्रियावाचकाख्यातान धातुप्रयोगे युज्यते संबंधेप्य संबंधकथनं॥ न च नुवा
दगतत्वे सिद्धवदनुवादे॥८०॥ गुरुत्वं पिस्तारं क्षितिधरपतिः पार्वतीति निजाभिनेत्रावदाद्धिप्यत
पिहरणेरूपेण निदधे॥ अतस्तेविस्तीर्णगुरुरयमत्रोषावसुमतीजितवप्राग्भारस्थगयतिलघु

त्वंनयतिच॥८३॥ गुरुत्वं गौरवं विस्तारं आयामपरिणाहं क्षितिधरपतिर्हिमवान्पार्वतीतिते॥लत
नये निजात्स्वकीयान्नितंबात् नितंबप्रदेशात् दाक्षिण्यवियुक्तत्वयि भवत्संहरणाहरणात्स्वनानिदधे रूपेण
समर्पितवान्॥ हरणंनाम स्त्रीधनं अध्यग्न्यध्याहवनिकं॥ यथोक्तं कात्यायनेन॥ अध्यग्न्यध्याहवे
निकं हरणं स्त्रीधनं स्मृतमिति॥ अस्यार्थः॥ अग्निमधिकृत्य दत्तं अध्यग्नि विवाहसमये अग्नि
समीपे पित्रादिभिर्यद्दत्तं तदध्याहवनिकमिति केचित्॥ अपरे आहवनीयसमीपपक्षादौ पित्रा
॥१९७॥ × तदध्यग्नि॥ विवाहानंतरं वरं च वधूं गृहीत्वा स्वगृहं प्रति जिगमिषावसरे पित्रादिभिर्यद्दत्तं ×५ ॥१९७॥
दिभिर्यद्दत्तं तदध्याहवनिकमिति॥ एतदुभयं हरणशब्दवाच्यमिति मन्वादिभिः स्मृतमिति॥ अत
स्तस्मात्कारणात् तेनैव विस्तीर्णआयामतः गुरुर्गरिष्ठः अयं परिदृश्यमानः अशेषां कृत्स्नां वसु
मतीं पृथ्वीं नितंबप्राग्भारः अतिशयः स्थगयति लघुत्वं लाघवं नयति प्रापयति चकारः शं
काच्छेदे अस्मिन्नर्थे न शंकितव्यमित्यर्थः॥ अत्रेयं पदयोजना॥ हे पार्वति क्षितिधरपतिः गुरु
त्वं विस्तारं निजान्नितंबादाक्षिण्यत्वयि हरणरूपेण निदधे अतस्ते अयं नितंबप्राग्भारः गुरुः
विस्तीर्णः सन् अशेषां वसुमतीं स्थगयति लघुत्वं नयति च॥ विस्तारेण स्थगनं गुरुत्वेन ल

वापादनमित्यर्थः॥ एवं च सुमनसामेव गुरुत्वविस्तारौ एकत्र स्थितौ न योस्ति रसस्फुरणमेकत्र स्थि-
ताभ्यां गुरुत्वविस्ताराभ्यामेव विज्ञेयमिति हिमाद्रिगत गुरुत्वविस्तारयोः हिमाद्रेर्धरत्वात् भूग-
त गुरुत्वविस्तारयोः पार्वतीनितंबगत गुरुत्वविस्तारयोर्भेदप्यभेदाध्यवसानात् भेदे अभेद
निबंधनातिशयोक्तिः॥८१॥ ऊरू जानुनी सक्थिनी ऊरुदेववर्णयति॥ करीन्द्राणां शुंडा कनककदलीकां-
डपटलीमुभाभ्यामूरुभ्यामुभयमपि निर्जित्य भवती॥ सुवृत्ताभ्यां पत्युः प्रणतिकठिनाभ्यां गिरिसु-
ते विधिज्ञे जानुभ्यां विबुधकरिकुंभद्वयमसि॥८२॥ करीन्द्राणां गजेन्द्राणां शुंडान् करदंडान् शुंडाश-
ब्दस्य पुल्लिंगताप्यस्तीति रक्षितमतं॥ कनककदलीकांडपटलीं सुवर्णरंभास्तंभानां उभाभ्यामूरु-
भ्यां उभयं करिकररंभास्तंभास्तंभकं असि भवसि निर्जित्य विजित्य भवती हे सुवृत्ताभ्यां शोभनाभ्यां
वर्तुलाभ्यां पत्युः परमेश्वरस्य प्रणतिकठिनाभ्यां प्रणतिर्दत्तायां भूमिस्पर्शादित्यर्थः॥ गिरिसुते हि-
माद्रितनये विधिज्ञे विधिं वेदार्थं जानातीति विधिज्ञा सर्वज्ञेत्यर्थः॥ यद्वा॥ वेदार्थानुष्ठात्री अतए-
व पत्युर्नमस्कारः प्रतिदिनं वैधइति कृतः ननु तस्यापि स्यात्तुरीयातीतेति न धर्मवचनं तस्याः संबु-
द्धिः॥ जानुभ्यां विबुधकरिकुंभद्वयं दिग्गजकुंभस्थलमपि॥ अत्रेत्थं पदयोजना॥ हे गिरिसुते विधिज्ञे

८६

भवतीकरीद्राणांशृंगंउन्नकनककदलीकांडपटलीउभाभ्याम् ऊरुभ्यांनिर्जित्यसुवृत्ताभ्यांपस्युःश्रोण
तिकठिनाभ्यांविबुधकरिकुंभद्वयमपिनिर्जित्यअसिवर्तसेस्फुरसीतियावत्॥अत्रभवच्छब्दयो
गेपिअसीतिमध्यमपुरुषएवभवति॥तस्यसंबोधनमात्रपरत्वात्॥अत्रेदंतत्त्वंभवच्छब्दोद्वि
विधःसंबोध्यपरःसंबोधनमात्रपरश्चेति॥संबोध्यपरत्वेभवच्छब्दस्ययुष्मदर्थत्वाभावाद्युष्मदु
पपदत्वस्याद्धिनामध्यमपुरुषत्वप्राप्त्यभावात्शेषेप्रथमएव॥तद्योगेयथा॥स्तुतेजगंतिभवती
शुभदाभवानीत्यादि॥यदासंबोधनेमात्रपरत्वंभवच्छब्दस्यतदायुष्मदर्थत्वान्मध्यमपुरुषःस्या
देव॥यथाभवतिभिक्षांदेहीति॥तत्रसंबोधनेमात्रपरत्वेहीतिप्रत्ययःगौरादौभवतीस्यप्राति
पदिकस्यपाठात्सिद्धः॥अतएवरक्षितेनआह॥भव न्तुप्रतिपादकसामर्थ्यात्स्त्रीलिंगत्वेचभ
वच्छब्दस्यसंबोधनमात्रपरत्वमिति॥अयमाशयःभवच्छब्दस्यसर्वनामसुभवतुप्रातिपदिक
ग्रहणात्उगितश्चेतिङीप्॥सिद्धएवसत्रगौरादौपठितभवच्छब्दस्यैवेप्यर्थंस्त्रीत्वेएवसंबो
धनमात्रपरत्वमितिज्ञापयतीति॥नन्वेवंरक्षितेनैवयुष्मदस्मदोःस्त्रीपुन्नपुंसकेषुतुल्यत्वनि
र्देशत्वंसंबोधनमात्रपरत्वात्॥युष्मदस्मदोःएकद्विबहुत्वपरत्वंतुसंबोध्यलक्षणयानचालिंगस्य

॥९८॥

लक्षणा॥आकांक्षामायादिस्कंधं तद्रूपछद्मस्याप्यलिंगत्वं प्राप्नोतीति॥मैवं॥दत्तोत्तरत्वादित्य
लमतिविस्तरेण॥यत्तु त्वामस्मिन्दन्मि विदुषामिति श्लोकद्वयव्याख्यानावसरे काव्यप्रकाशटीका
कारेण भास्करेण यदुक्तं नद्रमूलमिति तोपन्यस्य दूषितं॥अत्रोपमालंकारः स्पष्ट एव॥८२॥पुराजेतुं रु
द्रं द्विगुणशरगर्भौ गिरिसुते निषंगौ जंघे ते विषमविशिखो बाढमकृत॥यदग्रे दृश्यंते दशशरफलाः
पादयुगलीनखाग्रछद्मानः सुरमुकुटशाणैकनिशिताः॥८३॥पुराजेतुं तिरस्कर्तुं रुद्रं मदनदहनं द्वि
गुणशरगर्भौ द्विगुणाः शराः पंचबाणाः गर्भे ययोस्तौ गिरिसुते हे पार्वति निषंगौ तूणौ जंघे जंघाकांडे
ते तव विषमविशिखः पंचबाणः बाढं निश्चितं अकृत कृतवान् यदग्रे ययोर्निषंगयोरग्रे दृश्यंते द
शशरफलाः दशानां शराणां द्विगुणितानां पंचानामित्यर्थः तेषां फलाः अयोमुखानि पादयुगलीन
खाग्रछद्मानः पादयोः प्रपदयोर्युगली द्वितयं तस्या नखाग्राणां दशानां छद्म व्याजो येषां ते सुरमुकु
टशाणैकनिशिताः सुराणामिंद्रादीनां मुकुटा एव शाणा एव एके मुख्या निशिताः उत्तेजिताः॥अत्रेत्थं पद
योजना॥हे गिरिसुते विषमविशिखो रुद्रं पुराजेतुं द्विगुणशरगर्भौ निषंगौ ते जंघे अकृत बाढं॥यदग्रे
पादयुगलीनखाग्रछद्मानः सुरमुकुटशाणैकनिशिताः दशशरफला दृश्यंते॥अत्रोत्प्रेक्षालंकारः॥

जंघयोस्तूणीरतयासंभावनात्॥अपन्हुत्यलंकारश्च नखाग्राणां फलत्वेनापन्हुयात्॥अनयोर
नुत्थापितः॥अंपथश्च स्थि साग्रयोऽप्यप्रयोजकभावस्यावगतेः॥केचिमविदिखा बाढमि कृतेस्यच
भतिशयोक्तिरलंकारः साधारणब्रह्मस्तद्वि व्यतिरिक्तप्रतीतेः॥एतच्चपूर्वमेव स्पष्टीकृतं॥कुचौ
सद्यः स्विद्यदित्यादिश्लोकद्वयव्याख्यानावसरे अलंकारेणालंकारध्वनिरुक्ति॥द्विगुणशर
गर्भौ दशशरफलाइति पदद्वयेनातिशयोक्तिः॥पादांगुलीनां शराणामभेदाध्यवसानप्रतीतेरि
त्यलं॥८३॥श्रुतीनां मूर्द्धानो दधति तव यौ शेखरतया ममाप्येतौ मातः शिरसि दयया धेहि च
रणौ॥ययोः पाद्यं पाथः पशुपतिजटाजूटतटिनी ययोर्लाक्षालक्ष्मीररुणहरिचूडामणिरुचिः
॥८४॥श्रुतीनां निगमानां मूर्द्धानः शिरांसि वेदांतावाक्यार्थः दधति धारयंति प्रतिपादयंतीत्यर्थः
तवभवत्याः यौ चरणौ शेखरतया उत्तंसतया॥यद्वा॥श्रुतीनां श्रुतिवक्तॄणां मूर्द्धान इति मूर्ती
भूतयः भगवतीपादारविंदमुत्तंसयंति॥यथोक्तं श्रुतिवाक्यं शक्तिं प्रतिवदिष्ठेन॥नमो देव्यै म
हालक्ष्म्यै श्रियै सिद्ध्यै नमो नमः॥ब्रह्मविष्णुमहेशानवेदकैः पूजितां प्रपद्ये॥वेदानां कैः शिरो
भिरिति॥नमस्त्रिपुरसुंदर्यै शिवायै विश्वमूर्तये इत्यादि॥एवं स्तुतामहादेवी श्रुतिभिः श्रीतमा

प

॥९९॥

नसा ॥ आहृताः प्रतिनादृग्भिर्द्वंद्वोभिरमरेश्वरीत्यादि चन्द्रिकासंहितायां ॥ ममाप्येतौ चरणौ मातः हेजननि दयया कृपाविशिष्टचित्तेन त्वमर्थः । देहि नियच्छ चरणौ ययोः संबंधि पाद्यं पाथः पादनिर्णेजनजलं यद्यपि पाद्यमित्युक्ते पादसंबंधः प्रतीयते तदपि पाद्यमित्युक्ते पादप्रक्षालनार्हं पाद्यमित्यर्हता मात्रप्रतीतौ विशेषाकारेण ययोरित्यस्यान्वय इति नपौनरुक्त्यं ॥ पशुपतिजटाजूटतटिनी पशुपतेः शिवस्य जटाजूटे कपर्दे तटिनी गंगा ययोश्चरणयोर्लाक्षा लक्ष्मीः लाक्षारसः अरुणहरिचूडामणिरुचिः अरुणश्चासौ चूडामणिश्च कौस्तुभस्तस्य रुचिः रक्तिमा ॥ अयमर्थः ॥ प्रणयकोपप्रशांतये प्रणतस्य पशुपतेर्जटाजूटतटिनी गंगा पादाग्रवर्तिनीति गंगायाः पाद्यजलकथनं प्रतिदिनं सायंप्रातः सेवार्थं नमस्कुर्वाणस्य विष्णोर्मुकुटघटितकौस्तुभमणेः प्रवितवर्णस्य लाक्षारसप्रसादजन्यारुणिमेति ॥ अत्रेत्थं पदयोजना ॥ हे जननि तव यौ चरणौ श्रुतीनां मं... हुनः त्रैस्वरतया दधति ॥ हे मातः एतौ चरणौ ममापि शिरसि दयया देहि ॥ ययोः पाद्यं पाथः पशुपतिजटाजूटतटिनी ॥ ययोर्लाक्षा लक्ष्मीररुणहरिचूडामणिरुचिः ॥ एतेन दुर्लभत्वं ॥ भगवत्याः पादांबुजद्वितयस्य वेदमूर्द्धनि सदा शिवमूर्द्धनि विष्णुमूर्द्धन्येव संचारः इति मूर्द्धसंचा

॥१००॥

रस्याभाव्यमस्ति॥ अतो मम मूर्द्धन्यपि संचरत्तु पादांबुजमिति प्रार्थनात्मसामंजस्यमिति कवेर
भिप्रायः॥८३॥ प्रपंचजनयित्र्याः सादरस्यायाः प्रपंचांतःपतितो हरिविरिंचिप्रभृतयतिवेदांताः पा
दांबुजे शिरसि धारयंतीति तन्निर्णेजनजलेन पवित्रितगात्रास्तन्महिम्ना तत्तदधिकारान्भजंत इति यु
ज्यत एवेति अत्र रूपकालंकारः स्पष्टः॥८४॥ नमो वाकं ब्रूमो नयनरमणीयाय पदयोस्तवास्मै द्वंद्वा
य स्फुटरुचिरसालक्तकवते॥ असूयत्यत्यंतं यदभिहनने तो यस्पृहयते पशूनामीशानः प्रमदवन
कंकेलितरवे॥८५॥ नमोवाकं नम इति वचनं नमोवाक इति निपातनात्साधुः॥ ब्रूमः वदामः नमस्कु
र्म इत्यर्थः॥ नयनरमणीयाय नयनयोः प्रियकराय पादयोश्चरणयोः तव भवत्याः अस्मै परिदृ
श्यमानाय द्वंद्वाय युग्माय स्फुटरुचिरसालक्तकवते स्फुटरुचये स्फुरत्प्रभाय रसालक्तकवते
सार्द्रलक्तकाय विशेषणसमासः असूयति ईर्ष्यति अत्यंतं नितरां यदभिहननाय येन पद
द्वंद्वेन अभिहननं ताडनं स्वहत इत्यर्थः॥ अशोकश्चरणाहत्या पुष्पतीति दोहदे कौतुके स्पृहय
ते स्पृहां कुर्वते पशूनामीशानः पशुपतिः प्रमदवनकंकेलितरवे प्रमदवनं उद्यानवनं तत्र कंके
लितरुरशोकः असूयति ईर्ष्यति॥ क्रुधद्रुहेर्ष्यादिना उभयत्र चतुर्थी॥ अत्रेयं पदयोजना॥ हेभ

॥१००॥

गगुतितवनपनरमणीयायस्फुटरुचिरसालकूवतेपद्योरस्मैद्वंद्वायनमोचालंभूमः पशुना
मीशानः यदभिहननायस्पृहयते अमदवनकंकेलितरवे असंतमसूयति॥ अणयकलहस
मयेअनुग्रहासाधारणोपाशाधानोनकस्यापिसंभाव्यइत्यचेतनस्यापिकंकेलितरोः कथंस्यादिसस
पानान्यत्रेतिभावः॥ अनेनासंतंपातिव्रत्यसंपार्वसाः अतिपादितं॥ एतादृशोपातिव्रत्यंलक्ष्मीसर
स्वसोनास्तीतिध्वन्यते॥ अत्रातिशयोक्तिरलंकारः॥ पशुपतेरीर्ष्यायाअसंबंधेपिसंबंधकथ
नादभेदाध्यवसानप्रतीतेः॥८५॥ मृषाकृत्वागोत्रस्खलनमथवैलक्ष्यनमितेललाटेभर्तारंचर
णकमलेताडयतितेः॥ चिरादंतःशल्यंदहनकृतमुन्मीलितवतातुलाकोटिक्वाणैः किलिकिलि
तमीशानरिपुणा॥८६॥ मृषाअकस्मादेयकृत्वागोत्रस्खलनंगोत्रस्यस्खलनंनामनायिकाया
मनुरागंप्रकटयन्तत्समीपएवअमारानायिकांतराविष्टचित्तःसन्तन्नामोच्चारणं॥ अथत
दनंतरंगोत्रस्खलनानंतरंवैलक्ष्यनमितेवैलक्ष्येनइतिकर्तव्यतामोहेननमितंअत्रनमित
मितिवैलक्षण्यप्राधान्यात्वैलक्ष्येनैवनमितंनतुस्वयंवैलक्ष्यण्यान्ततः अस्फुटंवैलक्षण्य
मासीदितिनमितपदंप्रयुंजानस्यभावः॥ ललाटेललाटप्रदेशेभर्तारंपशुपतिंचरणकमलेपा

॥१०१॥

दं भुजे ताडयति घ्नति चरणकमलेन भर्तुर्ललाटं ताडितवत्यां भवत्यामित्यर्थः॥ अत्र ललाटता
डनं भर्तृपर्यंतं गच्छतीति भर्तारं ताडयती स्फुटी राजसी॥ एतादृशप्रयोगो महाकविप्रयोगात् सह
दयहृदयाह्लादकः तेन वचिरात् चिरकालं अनुस्मृतं अंतः शल्यं हृदयशल्यं वैरमित्यर्थः॥ दह
नेकृतं नयनाग्निना शोषणकृतं उन्मीलितवता प्रकटीकृतवता तुलाकोटिक्वाणैः तुला॥ कोटिर्नू
पुरं अत्र कोटयो ग्राणि तेरं तर्गत मणयः क्षुद्रघंटिकाद्यो लक्ष्यं तेतेषां क्वाणाः सिंजितानि तैः
किलिकिलितं किलिकिले त्यनुकरणं विजयिनः सुप्रसिद्धं किलकिलरवः कृत इत्यर्थः॥ ईशा
नरिपुणा ईशानस्य रिपुर्मन्मथः मन्मथस्य तदानीमीशानं प्रति रिपुत्वं सिद्धमिति भावः॥
अत्रेत्थं पदयोजना॥ हे भगवति ते चरणकमले गोत्रस्खलनेन मया कृत्वा अथ वै लक्ष्यनमितं भर्ता
रं ललाटे ताडयति सति ईशानरिपुणा दहनकृतं चिरादंतः शल्यमुन्मीलितवता तुलाकोटि
क्वाणैः किलिकिलितं॥ अत्रातिशयोक्तिरलंकारः तुलाकोटिक्वाणानां किलिकिलितध्वनित्वे
नाध्यवसानात् भेदे अभेदनिबंधनातिशयोक्तिः॥ ८६॥ हिमानी हंत व्यंहिमगिरिनिवासैकै
चतुरौ निशायां निद्राणं निशि चरणभागे च विशदौ॥ परलक्ष्मीपात्रं श्रियमतिसृजंतौ सम

॥१०१॥

यिनां सरोजं त्वत्पादौ जननि जयतश्चित्रमिह किं ॥८७॥ हिमान्या हिमसंहत्या हंतव्यं नाशित
व्यं हिमगिरिनिवासैकचतुरौ सर्वदा हिमगिरावेव निवसन इत्यर्थः निशायां रजन्यां निद्राणं मुकुलि
तं निशिचरमभागे च विशदौ प्रसन्नौ च तन नाशके स्तत्रैवासक्तेरिति भावः ॥ चकाराद्दिवापि प्र
सन्नावित्यर्थः ॥ परं ईषन्न लक्ष्मीपात्रं लक्ष्म्या अधिष्ठितमित्यर्थः ॥ श्रियं लक्ष्मीमतिसृजंतौ उ
त्सादयंतौ समयिनां स्वभक्तानां ॥ समयिस्वरूपं तु आधारे मूलेत्यादिश्लोके प्रतिरूपितं ॥ सरोजं
कर्मभूतं त्वत्पादौ त्वच्चरणौ जननि हे मातः जयतः विजयेते चित्रमाश्चर्यं इह अस्मिन्नर्थे किं
न किमपीत्यर्थः ॥ अत्रेत्थं पदयोजना ॥ हे जननि हिमगिरिनिवासैकचतुरौ निशिचरमभागे विश
दौ समयिनां श्रियमतिसृजंतौ त्वत्पादौ हिमानीहंतव्यं निशायां निद्राणं परं लक्ष्मीपात्रं सरोजं ज
यत इति किं चित्रं ॥ आधिक्यस्य स्फुटत्वादित्यर्थः ॥ अत्र व्यतिरेकालंकारः ॥८७॥ पदं ते कीर्ति
नां प्रपदमपदं देवि विपदां कथं नीतं सद्भिः कठिनकमठीकर्परतुलां ॥ कथं वा बाहुभ्यामुपयम
नकाले पुरभिदा यदादाय न्यस्तं दृषदि दयमानेन मनसा ॥८८॥ पदं स्थानं ते तव कीर्तीनां यशसां
प्रपदं पादाग्रं प्रपदं स्थानं देवि द्योतनशीले भगवति विपदां दुर्गतीनां कथं कथंकारं नीतं प्रापि

॥१०२॥

तं सद्भिः ॥ कवीन्द्रैः कठिनकमठीकर्परतुलां कठिनस्य कमठीकर्परस्य कूर्मपृष्ठकपालस्य तु
लां साम्यं कथं वा कथं कृत्वा वा कुभ्यां हस्ताभ्यां उपयमनकाले विवाहसमये पुरभिदा सदाशि
वेन पस्याद् दमात्राय गृहीत्वा न्यस्तं क्षिप्तं दृषदि उपलाधारभूतायां शिलादृषत् उपलं हरिद्रादिद्रव्य
स्य पेषणिका शिला तदाधारभूता शिला दृषत् ॥ सा विवाहसमये अश्मस्थानानुष्ठानार्थं पात्रे चे
नम्रपुष्कलानस्यां दृषदि दयमानेन दयावता मनसा चिन्तेन ॥ अत्रेत्थं पदयोजना ॥ हे देवि कीर्त
नीयं पदं विपदामपदं ते प्रपदं सद्भिः कठिनकमठीकर्परतुलां कथं नीतं ॥ कथं वा दयमानेन म
नसा पुरभिदा उपयमनकाले वा कुभ्यां यत्पदाद् दृषदि न्यस्तं ॥ दयां विहाय अतिमृदुलं पादांबुजं
दृषदि स्थापितं शंभुना अमृतस्पर्द्धिभिर्वाग्विलासैः कवीश्वराः कमठपृष्ठेन तुल्यं न यावर्ण
यंति एतदुभयमयुक्तमित्यर्थः ॥ अत्रानुपयालंकारो ध्वन्यते ॥ सदृशांतरनिषेधात् ॥ असदृ
शस्य पादांबुजवस्तुनः स्वयमेव स्वस्य तुल्यमिति प्रतीतेः ॥८८॥ न रवेर्नाकस्त्रीणां करकम
लेसंकोचकारिभिस्तारुणादिव्यानां हसन्त इव ते चंडि चरणौ ॥ फलानि स्वस्थेभ्यः किसलयक
राग्रेण दत्तां दरिद्रेभ्यो भद्रां श्रियमनिशमन्हाय दद्तौ ॥८९॥ न रवैर्नरवैरैः नाकस्त्रीणां सुरां

॥१०२॥

गनानां शश्यादीनां करकमलसंकोचशान्तिभिः करा एव कमलानि तेषां संकोचे मुकुलिभावे शा
न्तिभिश्चंद्रैः अंबिकायाः पादस्पर्शनवेलायां नखकांतयः कमलानि चंद्रकिरणा इव तत्करान्मु
कुलयंति अंजलिबंधानं कुर्वंति तरुणां चक्षाणां दिव्यानां दिविभवानां तरूणामिति कर्मणि षष्ठी॥
हसत इव ते तव चंडि भगवति चरणौ फलानि स्वस्थेभ्यः स्वर्गस्थेभ्य एव न तु दरिद्रेभ्य इति वि
शेषण वशात् प्रतीयते॥ किसलयकराग्रेण किसलयाए वक रा तस्याग्रं तेन ददतां दिशतां द
रिद्रेभ्यो दीनेभ्यः भद्रामंदं श्रियं लक्ष्मीमनिशं सर्वदा अन्हायत्री घ्नं ददतो॥ अयमर्थः॥
कल्पवृक्षः किसलयकरैः स्वस्थेभ्य एव आशानुसारेण शनैः शनैः श्रियं ददाति पादांबुजं
स्वस्थेभ्यो दरिद्रेभ्यश्च शीघ्रं भद्रां श्रियं ददातीति व्यतिरेकः॥ अत्रैवार्थं पदयोजना॥ हे चंडि कि
सलयकराग्रेण स्वस्थेभ्य एव फलानि ददतां दिव्यानां तरूणां दरिद्रेभ्यो भद्रां श्रियमनिशं
मन्हाय ददतौ ते चरणौ नाकस्त्रीणां करकमलसंकोचशान्तिभिः नखैर्हसत इव॥ अत्र व्यतिरे
कालंकारः स्फुट एव सचस्व स्वस्थेभ्य इत्यत्र श्लेषानुप्राणित इत्यनुसंधेयं॥८५॥ ददाने दीनेभ्यः
श्रियमनिशमाशानुसदृशीममंदं सौंदर्यप्रकरमकरंदं विकिरति॥ नवास्मिन्मंदारस्तवक

909

॥१०३॥

सुभगेयानुचरणेनिमज्जन्मज्जीवः करणचरणः षड्डुरणतां॥१०॥ददानेददतिदीनेभ्यः द
रिद्रेभ्यः श्रियंलक्ष्मीमाज्ञानुसदृक्षीं वांछानुरूपाममंदं अधिकंसौंदर्यप्रकरमकरंदं सौंदर्य
स्यलावण्यस्यप्रकरः समूहएवमकरंदः पुष्परसः तंविकिरतिक्षिपतितवभवत्याः अस्मि
न्परिदृश्यमानेमंदारस्तबकसुभगेकल्पवृक्षगुच्छसौभाग्यवतिपादानुध्यायात्वच्चरणेपादा
ब्जेनिमज्जन्नितरांमज्जन्मज्जीवःअहंवासौजीवश्चमज्जीवः करणचरणः करणानिपंचेंद्रि
याणिमनःषष्ठानितान्येवचरणायस्यसःषड्डुरणतांषट्चरणायस्यसः तस्यभावःषड्डुर
णतांभ्रमरत्वं॥अत्रेत्थंपदयोजना॥हेभगवतितवदीनेभ्यःआज्ञानुसदृक्षींश्रियंअनिशं
ददानेअमंदसौंदर्यप्रकरमकरंदंविकिरतिमंदारस्तबकसुभगेस्मिन्चरणेकरणचरणःम
ज्जीवःनिमज्जन्षड्चरणतांयातु॥अत्रातिशयोक्तिरलंकारः॥चरणस्यकमलत्वेननि
गीर्याध्यवसानात्॥मंदारस्तबकसुभगइत्यत्रोपमालंकारः॥अनयोःसंसृष्टिः॥करणच
रणइत्यत्ररूपकंकरणयोश्चरणत्वेनारोपणात्॥मज्जीवःषड्डुरणतांयातीत्यत्रपरिणामा
लंकारःस्पष्टः अनयोरंगांगिभावेनसंकरः॥सौंदर्यप्रकरमक[रं]रंदंविकिरतीत्यत्ररूप

॥१०३॥

कंनिगीर्याध्यवसानेन निमित्तं अत एव नैकदेशरूपकं अवयवप्रतिपादनात्॥ करणचरणःष
पद्दृदंतां [illegible] सम्मति फलत्वेनोद्देशात् नावयवत्वं तस्य अतोस्मिंश्चरणइति आरोपविषयत
याचरणमुपादाय कमलमारोप्यमाणबुद्ध्या निगीर्णमिति सम्यक्॥ एवं परिणामातिशयोक्त्योः
संकर एव न तु संसृष्टिरिति ध्येयं॥१०॥ पदन्यासक्रीडा परिचयमिवारब्धुमनसः स्खलंतः स्ख
लंभवनकलहंसा न जहति॥ अतस्तेषां शिक्षां सुभगमणिमंजीररणितच्छलादाचक्षाणं चर
णकमलं चारुचरिते॥११॥ पदन्यासः पादयोर्विन्यासः तस्मिन् क्रीडाविनोदः तस्य परिचयमिवा
भ्यासमिव इवशब्दः संभावनायां ननु नूनमित्यर्थः॥ आरब्धुमनसः संपादितुकामाः स्खलंतः
स्खलद्गतयः मंदगतयः स्खलंतः पतंतः संचारंभवनकलहंसाः भवने परिपोषिताः कलहंसाः
हंसविशेषाः न जहति न परित्यजंति त्वदनुसरणं न कदाचिदपि त्यजंतीत्यर्थः॥ अतः कारणात्ते
षां कलहंसानां शिक्षांल्लेखनेन शिक्षां सुभगमणिमंजीररणितच्छलात् मणिमंजीरो मणिप्रधान
नूपुरः स चासौ सुभगः रम्यतरः॥ यद्वा सुभगैर्मणिभिः पद्मरागादिभिर्युक्तः तस्य मंजीरस्य र
णितानां सिंजितानां छलात् व्याजात् आचक्षाणमुपदिशत् चरणकमलं पादांबुजं चारुचरिते

१०२

॥१०४॥

शोभनगमने ॥ अत्रेत्थं पदयोजना ॥ हे चारुचरिते पदन्यासक्रीडापरिचयमिवारब्धुमनसः
भवनकलहंसाः स्खलंतस्ते खेलं न जहति अतश्चरणकमलं सुभगमणिमंजीररणितछलात्
तेषां शिक्षामाचक्षाणमिव ॥ अत्रोत्प्रेक्षालंकारः ॥ मंजीररणितानां शिक्षाचरणात्मनया संभा
वनात् पूर्वार्द्धे अतिशयोक्तिः भवनकलहंसानां स्वाभाविकं पोषकजनानुसरणं पदन्यासक्री
डापरिचयार्थत्वेनाध्यवसानात् असंबंधे संबंधनिबंधनातिशयोक्तिः ॥ उभयोरंगांगिभावे
न संकरः ॥९१॥ एवं मुकुटादिपादांतं वर्णयित्वा पुनः स्वरूपं स्तौति ॥ गतास्ते मंचत्वं द्रुहिणद्रुहि
णहरिरुद्रेश्वरभृतः शिवः स्वच्छच्छायाघटितकपटप्रच्छदपटः ॥ त्वदीयानां भासां प्रतिफल
नलाभारुणतया शरीरी शृंगारो रस इव दृशां दोग्धि कुतुकं ॥९२॥ गताः प्राप्ताः ते तव मंचत्वं
खट्वारूपं द्रुहिणहरिरुद्रेश्वरभृतः द्रुहिणो ब्रह्मा हरिर्विष्णुः रुद्र ईश्वरः एते अधिकारिपुरुषाः
महेश्वरतत्त्वांतर्गताः ते च ते भृतयः किंवंतो यस्य शब्दो बहुवचनांतः भृतो भृतकाः विशेषण
समासः तेषां कामरूपाणां अत्यंतसन्निकृष्टसेवार्थं मंचस्य पादचतुष्टयरूपता युज्यत एव ॥
शिवः शिवशब्दो व्याख्यातः शिवतत्त्वमधिकारिपुरुष एव ॥ यद्वा सदाशिवतत्त्वं स्वच्छच्छाया

॥१०४॥

घटितकपटप्रछदपटः स्वछाचासौछायासैवघटितकपटप्रछदपटः शुभ्रकांतिरेववस्त्रास्त
नावस्थित इत्यर्थः त्वदीयानां भवत्संबंधिनीनां भासां कांतीनां प्रतिफलनेन यो रागः रक्तिमासे
कोः तेनारुणो रक्तवर्णः तस्य भावस्तत्ता तया शारीरी मूर्त्तिः शृंगारः शृंगाराख्यो रस इव शृंगारो
रसः रक्तवर्ण इति महाकविप्रसिद्धिः दृशां भवद्वीक्षणानां दोग्धि दुग्धे प्रयच्छतीति यावत्
कुतुकमानंदं ॥ अत्रेयं पदयोजना ॥ हे भगवति ते मंचत्वं द्रुहिणहरिरुद्रेश्वराख्यतः गताः शिवः
स्वच्छछायाघटितकपटप्रछदपटः सन् त्वदीनां भासां प्रतिफलनेन रागारुणतया शारीरी शृंगा
रो रस इव दृशां कुतुकं दोग्धि ॥ अत्रेदमनुसंधेयं ॥ आधारस्वाधिष्ठानमणिपूरानाहतवि
शुद्ध्याज्ञाचक्रात्मकं षट्चक्रसदनं पृथिव्यग्निजलवायुगगनमनस्तत्त्वाधिष्ठानं एकादशं त्रि
याधिष्ठानं च एवमाज्ञाचक्रांते एकविंशति तत्त्वान्यधिष्ठितानि तदात्मनावस्थितानि तत्तदु
परि मायाशुद्धविद्यामहेश्वरसदाशिवात्मकं तत्त्वचतुष्टयं ब्रह्मग्रंथ्यनंतरभावि चतुर्द्वारात्म
कं अष्टपुरत्रयात्मकं श्रीचक्रद्वारचतुष्टयस्थितप्रागादिद्वारदेशेषु मायादीनि चत्वारि तत्त्वानि
तान्येव मंचस्य चतुष्पदानि शुद्धविद्यायाः सदाशिवतत्त्वाभिनिवेशानंतच्छायापसासहस्र

103

दलकमलांतर्गतः सदाशिवात्मा अनुरागवशात् शृंगारविषयासंवलनात् तादात्म्यं यातीति निरू-
प्यते॥ सहस्रदलकमलाधःस्थितस्य चतुर्द्वारात्मकस्य कर्णिकारूपस्य श्रीचक्रस्य मध्य-
मध्यवर्तिचतुरस्रात्मकबैंदवापरपर्यायसरघात्राब्दवाच्यसुधासिंधौ शिवशक्त्योर्मेलनमि-
ति॥ अयमिथं सर्वं सुधासिंधोर्मध्य इति श्लोकव्याख्यानावसरे कथितं॥ अत्र तद्गुणालंका-
रानुप्राणित उत्प्रेक्षालंकारः॥ शिवस्यातिधवलस्य कामेश्वरीतनुकांत्या ताद्गुण्यात्॥ शरी-
री शृंगार इत्युत्प्रेक्षा ॥९२॥ अराला केशेषु प्रकृतिसरला मंदहसिते शिरीषाभा चित्ते दृ-
॥१३०५॥ षदुपलशोभा कुचतटे। भृशं तन्वी मध्ये पृथुरुरसिजारोहविषये जगत्त्रातुं शंभोर्जयति क- ॥२०५॥
रुणा काचिदरुणा॥९३॥ अराला चक्रा केशेषु नान्यत्रेत्यर्थः॥ प्रकृतिसरला प्रकृत्या स्वभा-
वेन सरला ऋज्वी मंदहसिते मंदस्मिते शिरीषाभा शिरीषकुसुमाभा अतिमृद्वी इत्यर्थः चि-
त्ते अंतःकरणे दृषदुपलशोभा दृषदि पट्ट उपलः पेषणिका॥ दृषदुपल इति पूर्वमेवोक्तं॥ तस्ये-
व शोभा यस्याः सा कुचतटे भृशं अत्यर्थं तन्वी कृशा मध्ये वलग्ने पृथुः स्थूला उरसिजारोह-
विषये स्तनविषये च विषयशब्दः स्थलवाची जगत्प्रपंचं त्रातुं रक्षितुं शंभोर्जयति अह-

मवेतिस्फुरतीत्यर्थः॥ करुणा कृपात्मिका काचित् अनिर्वाच्या अरुणा अरुणाख्या शक्तिः॥ य
द्वा॥ अरुणवर्णा काचिद्रमणी रूपया करुणया॥ आरुण्यारोपात् मूर्ता करुणेवाभातीति वाच्या
र्थः॥ अरुणाख्या शक्तिरर्थादवगता॥ अत्रेत्थं पदयोजना॥ शंभोः काचित् केशेषु रालामं
दहसिते सरला चित्ते शिरीषाभा कुचतटे दृषदुपलशोभा मध्ये भृशं तन्वी उरसिजारोहवि
षये ४ प्रकृति ४ पृथुः अरुणा करुणा जगत्त्राणं जयति॥ अत्र कामेश्वर्या अरुणा करुणा शा
ब्दाभ्यां निगीर्याध्यवसानादतिशयोक्तिः॥ ९३॥ कलंकः कस्तूरी रजनिकरबिंबं जलमयं क
लाभिः कर्पूरैर्मरकतकरंडं निबिडितं॥ अतस्त्वद्भोगेन प्रतिदिनमिदं रिक्तकुहरं विधिर्भूयो
भूयो निबिडयति नूनं तव कृते॥ ९४॥ कलंकः लांछनं कस्तूरी मृगनाभी रजनिकजनिकर
बिंबं चंद्रबिंबं जलमयं॥ स्वार्थे मयट्॥ पन्नीरमित्यर्थः॥ कलाभिः कलासंज्ञकैः कर्पूरैः
सह मरकतकरंडं मरकतमणिना रचितं मरकतशब्दो वर्णव्यत्ययेन मकरेजरा शब्दा दु
डुसन्नः मकरान्नम करकरवक्त्रा ज्ञातं मरकतमिति भोजराजः करंडं निर्विडतं अंतःस्यूतं
अतस्त्वद्भोगेन तव देव्याः भोगेन अनुभवेन कस्तूरी पन्नीर कर्पूराणां अनुभवेन प्रतिदिनं

॥१०६॥

दिनेदिने इदं परिदृश्यमानं इंदुं पुटं रिक्तकुहरं शून्यांतरं विधिर्ब्रह्मा भूयो भूयः निविडु
यति पूरयति नूनं निश्चितं ॥ नवं खलु ते तदर्थमित्यर्थः ॥ अद्धा खलु ते बतोऽर्थे निपातद्वयमी
रितमिति खलु ते शब्दस्तादर्थ्ये निपातितः तद्योगे षष्ठी च ॥ अत्रेत्थं पदयोजना ॥ हे भगवति
कलंकः कस्तूरी रजनिकरबिंबं जलमयं कलाभिः कर्पूरैर्निविडितं मरकतकरंडं अंतः
इदं प्रतिदिनं त्वद्भोगेन रिक्तकुहरं विधिर्भूयो भूयस्तवकृते निविडयति नूनं ॥ अत्रोत्प्रे
क्षालंकारः ॥ मरकतकरंडत्वेन चंद्रमंडलस्याध्यवसानात् ॥ यद्वा अपन्हुत्यालंकारः
अयं कलंको न भवति अपि तु कस्तूरी इदं रजनिकरबिंबं न भवति किंतु बहिः प्रतिफलितं
अंतर्गतं पन्नीरं इमाः कला न भवंति अपि तु कर्पूररजः इदं इंदुमंडलं मंतस्थितद्रव्यप्रति
फलनवशात् पीतवर्णं प्रतीयते — — — श्वेतवर्णमेवेत्याद्यापन्हुत्यमालायाः प्रतीतेः ॥ उत्प्रे
क्षालंकारस्य प्रतिपदादिदिनेषु सत्त्वक्षिक्षयवतश्चंद्रमसः कस्तूर्यादिद्रव्यव्ययप्रवेशा
भ्यां ईषदृद्धिक्षयसंपूर्णत्वयोः संभावनात् अतश्चानयोरनुसृष्टिः अंगांगिभावेनापृथक्
स्थितस्यावस्थानात् ॥ ९४ ॥ पुरारातेरंतःपुरमसि ततस्त्वच्चरणयोः सपर्यामर्यादा तरलक

॥१०६॥

रणानामसुलभा॥तथाह्येते नीताः त्वन्मखमुखाः सिद्धिमतुलांतवद्वारोपांतस्थितिभिरणिमा
द्याभिरमराः॥९५॥पुरारातेस्त्रिपुरांतकस्य अंतःपुरमवरोधः पट्टमहिषीतियावत् असितततस्त
स्मात्कारणात् त्वच्चरणयोस्तावपादयोः सपर्यामर्यादा पूजाप्रकारः तरलकरणानां चंचलचित्ता
नां असुलभा दुर्लभा अंतःपुरप्रवेशोऽर्थ्यं चलचित्तानां नास्तीति सूत्रसिद्धं अतो निश्चलचित्ते
स्तुनौ विदल्लैः प्रवेष्टव्यमिति तिनीतिवाक्यात् ते निर्मलचित्तैरेव सुधांभोधिमध्यस्थितायाः
पादांबुजसेवासमयिभिरेव जायते नान्यैरित्यर्थः॥तथाहि प्रसिद्धौ एते त्वन्मखमुखाइंद्र
मुख्याः सुरगणाः नीताः प्रापिताः सिद्धिं संसिद्धिं असदृशीं तवद्वारोपांतस्थितिभिः द्वारस
मीपेस्थितयो यासां ताभिः अणिमाद्याभिः अणिमाप्रमुखाभिः सिद्धिभिः सह अमरा निर्ज
राः॥अत्रेयं पदयोजना॥हे भगवति पुराते रोरंतःपुरमसि ततस्त्वच्चरणयोः सपर्यामर्या
दा तरलकरणानामसुलभा॥तथाहि एते त्वन्मखमुखा अमराः तवद्वारोपांतस्थितिभिः अ
णिमाद्याभिः सह सिद्धिं नीताः॥यथा तवद्वारोपांतमेव अणिमादिसिद्धयः संसेवते एवमिंद्रा
दयोपि॥इयांस्तु विशेषः अणिमाद्यष्टसिद्धीनां द्वारपालकत्वेन सर्वदा तत्रैवासः स्वभावसि

अतुलां

904

सिद्धः इंद्रादीनां तु तरलकरणत्वात् अंतःपुरप्रवेशानर्हत्वात् दौवारिकानुसृत्या अयस्यानं सिद्धिशब्दार्थ इति तात्पर्यं ॥ ९५ ॥ कलत्रं वैधात्रं कति कति भजंते नकवयः श्रियो देव्याः कोवा न भवति पतिः कैरपि धनैः ॥ महादेवं हित्वा तव सति सतीनामचरमे कुचाभ्यामासंगः कुरवकतरोरप्यसुलभः ॥ ९६ ॥ कलत्रं कं रमलात् त्रायत इति कलत्रं के रमले नरकं ॥ मध्यवर्णलोपः पृषोदरादित्वात् साधुः ॥ वैधात्रं विधातृसंबंधि विधातृशब्दस्य ॥ तस्येदमित्यणि कृते संबंधमात्रपरत्वेन द्विशेषजिज्ञासायां कलत्रशब्दस्यान्वय इति ॥ विधातुः कलत्रमित्यके संबंधमात्रे विहिता षष्ठी संबंधिन्येव पर्यवस्यतीति साक्षादन्वय इति भेदः अतो नाधेयो नायं दोषावहः ॥ वैधात्रं कलत्रं सरस्वतीं कति कति भजंते सेवंते न कवयः केवा कवयो न भजंते सर्वेपि भजंत इत्यर्थः ॥ श्रियो देव्याः लक्ष्म्याः को वा न भवति पतिः अधिपतिः कैरपि धनैः कियन्मात्रैर्धनैः महादेवं सदाशिवं हित्वा त्यक्त्वा तव भवस्याः सति पतिव्रते सतीनां पतिव्रतानां अचरमे अग्रगण्ये कुचाभ्यां आसंगः आलिंगनं कुरबकतरोरपि असुलभः सुलभो न भवति कुचालिंगनं दोहदत्वेनापि कुरबकतरोरचेतनस्यापि न संभव

ति॥ किमुत चक्षुष्यं पुरुषान्तरेणेति पातिव्रत्यं वावामगोरेव मितिभावः॥ अत्रेत्थं पदयोजना॥ हे
सति यै धात्रे कलत्रं कति कति कवयः न भजंते श्रियो देव्याः कैरपि धनैः को वा पतिर्न भवति हे स
तीनामचरमे महादेवं हित्वा तव कुचाभ्यामासंगः कुरबकतरोरप्यसुलभः॥ अयमर्थः॥
ये मंत्रजपाद्यासादितसारस्वताः सरस्वतीवल्लभा इति गीयंते॥ ये धनधान्याद्यभ्युदयादिसम
द्धिमंतस्ते लक्ष्मीपतय इति गीयंते पार्वतीपतिस्तु महादेव एवेति पातिव्रत्यमहिमा अवा
ङ्मनसगोचर इति॥ ९६॥ गिरामाहुर्देवीं द्रुहिणगृहिणीमागमविदो हरेः पत्नीं पद्मां हरसह
चरीमद्रितनयां॥ तुरीया कापि त्वं दुरधिगमनिःसीममहिमा महामाया विश्वं भ्रमयसि प
रब्रह्ममहिषि॥ ९७॥ गिरां वाचां आहुः कथयंति अधिदेवतां द्रुहिणगृहिणीं ब्रह्मणः पत्नीं आ देवीं
गमविदः आगमरहस्यवेदिनः हरेर्विष्णोः पत्नीं जायां पद्मां पद्मालयां हरसहचरीं त्र्यंबकप
त्नीं अद्रितनयां पार्वतीं तुरीया चतुर्थी कापि अनिर्वाच्या त्वं दुरधिगमनिःसीममहिमा दुःखे
न अधिगंतुं शक्यः सच्चासौ निःसीमो महिमा यस्याः सा देशतः कालतः वस्तुतश्चापरिच्छेद्य
इत्यर्थः॥ महामाया प्रभु विश्वांतर्गतमयामतत्वं विश्वं भ्रमयसि प्रपंचं विवर्तयसीति विवर्तेन

ब्रह्मधर्ममायायामत्तिदिशतिपरब्रह्ममहिषीतिपरब्रह्मणः सदाशिवस्य महिषी ॥ तथा च श्रु
तिः ॥ श्रीश्च ते लक्ष्मीश्च पत्न्यौ इति पुरुषसूक्ते ॥ श्रीः भुवनेश्वरी लक्ष्मीः श्रीविद्या उभे ब्रह्मणः
पत्न्यौ अत्र तयोर्मध्ये श्रीविद्यायाः प्राधान्यं श्रीविद्यायां भुवनेश्वर्या अंतर्भावात् ॥ भुवनेश्वर्यां
श्रीविद्याया अंतर्भाव इति चंद्रकला प्राधान्येनैव महिषीति ध्येयं ॥ अत्रेत्थं पदयोजना ॥ हे पर
ब्रह्ममहिषि आगमविदस्त्वामेव द्रुहिणगृहिणीं गिरां देवीमाहुः त्वामेव हरेः पत्नीं पद्मामाहुः
त्वामेव हरसहचरीमद्रितनयामाहुः तं तुरीया दुरधिगमनिःसीममहिमा महामाया सती
विश्वं भ्रमयसि ॥ अयमर्थः ॥ त्वामेव भगवतीं नानानामभिर्गृणंत्यागमविदः हरमहिषी
श्रीविद्यापरनामधेया चंद्रकलाऽऽएकैवेति ॥ ९७ ॥ कदा काले मातः कथय कलितालक्तकर
सं पिबेयं विद्यार्थी तव चरणनिर्णेजनजलं ॥ प्रकृत्या मूकानामपि च कविताकारणतया
कदा धत्ते वाणीमुखकमलतांबूलरसतां ॥ ९८ ॥ कदा काले जन्मप्रभृत्यवसानपर्यंतं द
तिशेषः मातः हे जननि कथय सम्यगुपदेशाय कलितालक्तकरसंकलितमुपदिष्टं अ
लक्तकरसं लाक्षारसं यावकं स्त्रीणां पदाधरोष्ठरंजनार्थं अलक्तकद्रव्यमुपदिष्टं तेन से

॥३०८॥

॥३०८॥

रंध्रः पिबेयं प्रार्थनायां लिङ्॥ विद्यार्थं विद्यामर्थयत इति विद्यार्थी॥ यद्वा अर्थः प्रयो
जनमस्य अर्थी विद्याभिरथयेति॥ अत्र रक्षितं आह॥ अर्थशब्दात् मतुबर्थे णिनिप्रत्यय इ
ति॥ अत एव तेनार्थवान् लोके परार्थ्य रवेनेति कालिदासेन मतुबर्थ प्रयुक्तः। माघेनितांत
मर्थिने इति णिनिरेव॥ अत एव अर्थी समर्थो विद्वान् निस्यादा वप्पिणिनिरेवेति॥ अत एव पू
र्वव्याख्येव समीचीना॥ तव भवत्याः चरणनिर्णेजनजलं पादोदकं प्रकृत्या स्वभावेन मू
कानां अपि विरोधे॥ चकारः शंकायां॥ कविताकारणतया कवितायाः कारणतया हेतु
तया कदाचित् वाणीमुखकमलतांबूलरसतां वाण्याः सरस्वत्या मुखकमले पत्नांबूलरसः
तस्य भावस्तत्तां॥ अयं भावः॥ भगवती पादारविंदनिर्णेजनजलं सानुकंपके हेतुः कवीश्वर
स्य वदने स्थितं सरस्वती तांबूलरस इव प्रत्यक्षं भाति सतु कवीश्वरः पुंभावमापन्ना सरस्व
तीव भातीति॥ अथैवं पदयोजना॥ हे मातः तव कलितालक्तकरसं चरणनिर्णेजनजलं वि
द्यार्थी अहं कदा काले पिबेयं॥ एतच्च प्रकृत्या मूकानां अनेडमूकानां च कुंओ नुमत्रिक्षितानां
मपि च कविताकारणतया वाणीमुखकमलतांबूलरसतां कदाचित्॥ अत्रेदमनुसंधेयं॥ भग

१०६

॥१०१॥

वसादेः अनेन मूकैर्लघुचर्चास्तोत्रद्वयं हस्तमस्तकसंयोगमहिम्नावाचितं तन्महिम्ना भगव
तीपादारविंदनिर्णेजनजलं दत्तवती॥ तन्निर्णेजनजलं पुनः प्रार्थयंत्याचार्याः अनेन सामीप्य
मुक्तिरुदिता तद्वितीयार्धेनोत्तरश्लोके विचारयिष्यामः॥ चरणनिर्णेजनजलमिति वदता सम
यमतमेवोक्तं॥ कौलमते भुजगाकारेणोर्ध्वमुखावस्थानात्करचरणनिर्णेजनस्याभावात् स
हस्रदलकमल एव निर्णेजनमिति पूर्वमेव ब्रुधाप्रपंचितं॥ अत एव सुधाधारासारैश्चर
णयुगलांतर्विगलितैः प्रपंचं सिंचंती पुनरपि रसाम्नायमहसः इदमेव समयमतप्रतिपाद
कं॥ अवाप्य स्वां भूमिं भुजगनिभमध्युष्टवलयं स्वमात्मानं कृत्वा स्वपिषि कुलकुंडे कुहरिणि॥
इदमेव कौलमतप्रतिपादकमिति विवेकः॥ अत्रोत्प्रेक्षालंकारः॥ चरणनिर्णेजनालक्तकर
रसस्य सरस्वतीतांबूलरसत्वेनाध्यवसानात्॥ समयिनः साक्षात्सरस्वतीस्वरूपत्वेनाध्यव
सानात् उत्प्रेक्षातिशयोक्त्योः संकरः॥ ९८॥ अथ कीर्तां स्तुतिमुपसंहरन् षट्कमलभेदज्ञानस्य भे
दसिद्धांतं निर्दिशति॥ सरस्वत्या लक्ष्म्या विधिहरिसपत्नो विहरते रतेः पातिव्रत्यं शिथिल
यति रम्येण वपुषा॥ चिरंजीवन्नेव क्षपितपशुपाशव्यतिकरः परानंदाभिख्यं रसयति र

॥१०१॥

संवद्वजनवान्॥९९॥ सरस्वत्या भारत्या॥ लक्ष्म्या॥ पद्मया॥ विधिहरिस्सपत्नः यथाक्रममिति
शेषः॥ सरस्वतीपतित्वेन विधेः सपत्नः अस्यास्पदं॥ लक्ष्मीपतित्वेन हरेरसूयास्पदमित्य
र्थः॥ विहरन्ते विहरमाणः स्वैरं तेः काममेधिष्याः पातिव्रत्यसंपतिरन्ताधर्मं पुरुषान्तरासंपर्करूपं
त्रिथिलयति मन्मथाकारतया रतेर्मन्मथभ्रान्तिं जनयन् संभोगेच्छां रतेरपि जनयतीति भावः॥
रम्येण सुंदरेण वपुषा तत्तादात्म्यबुद्ध्येति यावत्॥ एवं सादाख्यायाः कलायाः उपासनस्य ऐहि
कफलमुक्त्वा आमुष्मिकमप्याह॥ चिरंजीवन्नित्यजीवितः सन् सावयवद्रव्यस्य नित्यत्वं पशु
पाशव्यतिकरक्षपणहेतुकं॥ अत्र केवलव्यतिरेक्यनुमानं साधनत्वेन प्रयोज्यं॥ सावयवं
यत् पशुपाशक्ष[illegible] व्यतिकरं न भवति तन्नित्यं भवति॥ यथा परमादीति॥ जीवन्मुक्तिसिद्धिः
सावयवाः कपिलादयः मार्कंडेयादयो नित्यसिद्धाः अतश्चेदं व्यतिरेक्येवाभवत्॥ सावयवस्य
नित्यतायां साधनं एवं नित्यजीवनः सन् क्षपितपशुपाशव्यतिकरः क्षपितो विनष्टः पशुपा
शयोः प्रतिकारः पशुर्जीवः इन्द्रियैः प्रपंचं पश्यतीति॥ यद्वा पशुबंधनहेतुस्तस्माद्भूतोः पशु
रविद्यया बद्धो जीवः पाशाः अविद्या॥ एतच्च श्रूयते॥ अदितिः पाशान्प्रमुमोक्तु एतन्नमः पशु

भ्यः पशुपतये करोमीति ॥ अस्यार्थः ॥ अदितिरादिसमंडलांतर्गता बैंदवी शक्तिः पाशान् अ
विद्याकृतान् बंधान् प्रमोक्तुम् आकर्षणम् अस्यंतं मोचयतु ॥ एतेन नमः नमस्कारः पशुभ्यः पशुप
तये करोमि पशुभ्य इति तादर्थ्ये तदर्थत्वेनि वृत्तिः पशुत्वनिवृत्त्यर्थं ॥ अयमर्थः अदितिः पशु
पतिना सदाशिवेन नियुक्ता पाशविमोकं करोतु ॥ पशुशब्दस्य जीववाचित्वं तैत्तिरीयके सौ
म्यकांडे तेषामसुराणामित्यनुवाके तेषामसुराणामित्यारभ्य तस्मा रुद्रः पशूनामधिपति
॥११०॥ रित्यंतेन प्रतिपादितं ॥ ततः पशुपाशो जीवाविद्यतयोर्व्यतिकरः संबंधः क्षपितः गलितप ॥११०॥
पशुपाशबंधः सदाशिवास्मनाय स्थितः परानंदाभिख्यं परानंदात्मिका अभिख्या ज्योति
र्यस्य तं परानंदाभिख्यं ज्योतीरूपं रसयति आस्वादयति रससुखत्वेऽजननयानुत्यक्तः
तव भजनं सेवा ॥ अत्रेत्थं पदयोजना ॥ हे भगवति त्वद्भजनयानु सरस्वत्या लक्ष्म्या विधि हरि
सपत्नैः सन् विहरते रम्येण वपुषा रतैः पातिव्रत्यसं शिथिलयति क्षपितपशुपाशः प्रतिभ
रः चिरंजीवन्नेव परानंदाभिख्यं रसं रसयति ॥ अत्रेदमनुसंधेयं ॥ जीवन्मुक्ता नाम विद्या
निवृत्तावपि कुलालचक्रभ्रमणन्यायेन देहबंधः ॥ यथोक्तं षष्ठितंत्रे समस्तां ॥ सम्यग्ज्ञा

नाधिगमाद्धर्मादीनामकरणप्राप्तोतिष्ठतिसंस्कारवशाद्यथाभ्रमवद्धतशरीर इति॥अ
त्रत्य क्रमेनवाविसत्रवृद्धिविधंभजनेषट्चक्रसेवासंकेधारणात्मकंच॥आद्यं निरूप्यते॥आ
धारस्वाधिष्ठाने तो निस्वलोकरूपा मुक्तिः सार्ष्टिर्नाम देव्याः पुरसमीपपुरांतरे निर्मायसे
× व्नोपास्ये मणिपूरप्रभृतिसहस्रदलकमलपर्यंतं पंचचक्राणि पूज्यानि तत्र मणिपूरपूजाप
११ × सार्ष्टि [illegible] स्यावस्थितिः संविल्कमलपूजारतानां सालोक्यमुक्तिः सालोक्यं नाम देव्याः
पदनेनिवासः विशुद्धचक्रोपासकानां सामीप्यमुक्तिः सामीप्यं नाम अंगसेवकत्वं आज्ञाचक्रो
पासकानां सारूप्यमुक्तिः सारूप्यं नाम समानरूपत्वे पृथग्देहधारित्वेन निसायुज्याद्भेदः॥एत
च्चतुर्विधं गौणं यांस्वदुःखानिपातित्वमात्रान्मुक्तिरिति व्यपदिश्यते परं तु सायुज्याख्यैव शा
श्वती मुक्तिः सा सहस्रदलकमलोपासकानामिति॥अत एव परानंदाभिरख्य रसंत्व क्रमेनवा
न्नरसपत्तीति॥अत्रेदमनंतरं षट्चक्रकमलभेदमत्र सुखस्वरूपैव मुक्तिः सुखं तु लौकिकदृ
ष्टांतेन स्त्रीसंभोगात्मकमेव लोकेपि स्त्रीसंमेलनात्परं सुखं नास्ति एवमसंत दुःखच्छेदानंतरं
सायुज्यसंसिद्धौ शिवशक्तिसंपुटांतर्मीवानंदात्मिकैव मुक्तिरिति॥यद्ययमत्र निष्कर्षः पूर्वं

मूलाधारादिषट्चक्राणां त्रिकोणाष्टकोणमिश्रकारमन्वस्रशिवचक्रात्मनानादात्म्यं प्रतिपा
दितं एतद्देवनादबिंद्वोरैक्यं ॥ तथाहि ॥ नादो नाम श्रीचक्रे बिंदुर्नाम षट्चक्रगो ह्नंतयोरैक्यं नाम आ
धारचक्रं चतुर्दलपद्मं तत्कर्णिका त्रिकोणात्मिका स्वाधिष्ठानं षड्दलपद्मं तत्कर्णिका अष्टकोणात्मि
का मणिपूरं दशदलपद्मं तत्कर्णिका दशकोणात्मिका अनाहतं द्वादशदलपद्मं तत्कर्णिका दशको
णात्मिकैव विशुद्धचक्रं षोडशदलपद्मं तत्कर्णिका चतुर्दशकोणात्मिका एतत्सर्वं तत्र शिवशक्तिच
क्रैक्यं आज्ञाचक्रं द्विदलपद्मं अष्टकोणं एकेन षोडशकोणं परस्त्रेति द्विधा भिन्नं कर्णिका ॥ अयं

॥१११॥ म ॥१११॥

भावः द्विधा भिन्नं चतुरस्रकृतिकं शिवचक्रं चतुष्ट्यात्मकं आधारस्वाधिष्ठानात्मकं चेति प्र
पंचितं ॥ वृत्तत्रयं स्वाधिष्ठानं तेनैकं वृत्तं रुद्रग्रंथ्यात्मकं ॥ अनाहतं तेनैकं विष्णुग्रंथ्यात्मकं आ
ज्ञाचक्रं तेनैकं ब्रह्मग्रंथ्यात्मकं तत्तदुपरि चतुर्द्वारोपेतं भूपुरत्रितयं तच्च द्वारेषु चतुःसोपान
युक्तं तत्र सहस्रदलं कमलं कर्णिका तस्य कमलस्य दलानि सहस्रं बैंदवस्थानं च चतुर्द्वारोपेतं
कर्णिकामध्ये एवं प्रासादः प्रायेण श्रीचक्रस्य कमलानां चैक्यमनुसंधेयं ॥ एतच्च नादबिंद्वै
क्यं गुह्याद्गुह्यतमं निष्पानुग्रहादुपदिष्टं ॥ अस्मिन्षट्चक्रे पंचाशद्वर्णा नामं तर्भावः कथितः ॥

चंद्रखंडे स्वराः सूर्यखंडे स्पर्शाः अग्निखंडे अंतस्थाद्युष्माणश्च हकारवर्जिताः लहकारौ बिंदवे
क्षकारः सर्वत्रेति प्रागेव प्रतिपादितं ॥ मूलाधारादिदलेषु कलानां मंत्रभावः प्रागेव प्रतिपादि
तः कलानां तिथ्यात्मकत्वं तिथीनां नित्यात्मकं नित्यानां कलात्मकत्वं कलानां मूलमंत्रगतपंचद
शाक्षरात्मकत्वं पंचदशाक्षराणां त्रिखंडत्वं त्रिखंडस्य सोमसूर्यानलात्मकत्वं सोमसूर्यानला
नां ग्रंथित्रयात्मकत्वं ग्रंथित्रयस्य मंत्रगतह्रींकारत्रयात्मकत्वं ह्रींकारस्य [illegible] ॥
[illegible] मंत्रांतर्गतत्वं मूलमंत्रस्य चक्रैक्यं तेन चक्रेण चक्रस्य मूलाधारादिष
ट्चक्रेषु ब्रह्मग्रंथ्यादित्रिकेऽपि सहस्रदलकमलकर्णिकादौ तादात्म्यं ॥ एतदेव कलानादयोरैक्यं
नाम अयं निष्कर्षः ॥ नादेन बिंदोरैक्यं कलाया नादेनैक्यं एवं त्रितयं कलया बिंदोरैक्यं
कलया नादस्यैक्यं श्रीविद्यायाः पंचकस्यैक्यमिति षड्विधमैक्यमस्येति परमरहस्यं गुरुरू
पदेशगम्यं ॥ एवं षोढैक्यं भगवत्याः सपर्येति ॥ सम्यगुपवर्णितं ॥ षोढैक्यानुसंधानानं
तरं दशभुजा भगवती श्रीविद्यामत्रिपुरश्रसक्षं परिदृश्यमाना सपर्या संनिधेयेति ॥
ऐक्यमेव सपर्येति वदतो यमाम्नाय इति ज्ञेयं ॥ अधुना बिंदुस्वरूपं प्रपंच्यते ॥ बिंदुरिति

॥११२॥

मूलाधारादिचक्रषट्कं॥ बिंदुर्जगदुत्पत्तिलयहेतुः शिवस्य शक्तिविशेषः स चैव सहस्रद
लकमलांतर्गतचतुर्द्वारात्मककर्णिकामध्यगेनचतुःकोणात्मकं शक्तितत्वं तन्मध्यगतं
शिवतत्वं नादइत्युच्यते॥ स चतुर्विध इति शास्त्रेषु उक्तं॥ उभयोः शक्तिशिवयोः शब्दार्थरू
पत्वात्॥ कैलासकेमुभयं साधारणं॥ अतश्च मेलनं नादबिंदुकलातीतमिति॥ समयम
तरहस्यमिदं॥ स च बिंदुर्दशधाभिधीयते॥ यथोक्तं दशधाभिधीयते बिंदुरेक एव परात्मकः॥
चतुर्द्धाधारकमले षोढाधिष्ठानपंकजे॥ उभयाकाररूपत्वादितरेषां नदास्मत्ते नि॥ अस्यार्थः॥
एकएव बिंदुर्मूलाधारकमलगतचतुर्दलेषु चतुर्द्धा स्वाधिष्ठानगतषड्दलेषु षोढा एवं
दशधाभिधीयते॥ अयंभावः॥ मूलाधारं चतुष्पत्रं सरसिजं स्वाधिष्ठानपद्मं षड्दलं मणिपूर
पद्मं दशदलं अनाहतं पद्मं द्वादशदलं विशुद्धिपद्मं षोडशदलं आज्ञाचक्रं द्विदलमिति स
र्वयोगशास्त्रसिद्धं॥ अत्राधारपद्मस्य दलचतुष्टयं बिंदुचतुष्टयात्मकं॥ विंदवो मनोबु
द्ध्यहंकारचित्तैः ब्रह्मस्यात्मकाजगन्निर्माणहेतव इति सर्वयोगशास्त्रसिद्धं॥ स्वाधिष्ठा
नगतषड्दलानां कामक्रोधलोभमोहमदमात्सर्यात्मकाः षड्बिंदवः अतएव ते संहतिबिं

॥११२॥

दयइत्याहुः॥ तदुक्तं भगवता पतंजलिना॥ स्वाधिष्ठाने संहारः षड्बिंदुकृतेन इति एवं दशाबिंदवः
कमलद्वयात्मकाः मणिपूरं मूलाधारस्वाधिष्ठानात्मकमिति कृत्वा दशदलमनाहतचक्रे मणिपूरप्र
कृतिकं दशदलम् ऊर्ध्वाधः कमलद्वयप्रकृतिकं दलद्वयमिति द्वादशदलमनाहतम् अथ विशुद्धिप्र
तु अनाहतप्रकृतिकं द्वादशदलं आधारप्रकृतिकं चतुर्दलं एवं षोडशदलं॥ येद्या मणिपूरप्रकृ
तिकं दशदलं स्वाधिष्ठानप्रकृतिकं षड्दलमिति षोडशदलं आज्ञाचक्रं तु आधारस्वाधिष्ठाना
त्मकमिति द्विदलं एवं मणिपूरप्रभृति आज्ञांतानि चत्वारि कमलानि मूलाधारस्वाधिष्ठानप्रकृ
तिकानि॥ अत एव मूलाधारद्विके उत्तरकमलचतुष्कमंतर्भूतमिति एकस्यैव बिंदोर्दशाधात्वं नान्यथे
ति सिद्धं॥ यद्यपि कमलानां द्विकानुसंधानात् षट्कमलानुसंधानं सेत्स्यति॥ तथापि षड्विधैक्या
नुसंधानाभावात् कुलमार्ग एवेति॥ समयिनां तु कार्यभूतकमलचतुष्कानुसंधानाद्द्वैकार
णभूतकमलद्वयानुसंधानफलं सेत्स्यत्येव अत एव पंचविधसाम्यसिद्धेः समयसमयिना
वः प्रसक्तं इत्युपपत्ते॥ समयसमयिनोः समयिनः सेवका इति भगवत्पादमतं तत्त्वं॥ एवं भजनद्व
द्वोपरि प्रतिपाद्य प्रकारांतरेण भजनशब्दार्थो निरूप्यते॥ यथाहुर्भगवत्पादाः॥ धारणापरि

स्थानान्मुक्तिरिति॥अस्यार्थः॥धारणाः षष्ट्युत्तरत्रिशतसंख्याकाः॥धारणानाम वायोः कम
लेषु नादकलाभ्यां निरोधः सच षट्कमलेषु षोडश सप्तमे कमले समवायश्चाष्टाभिन्नत्वेन सा
र्द्धसप्तविधः एकैकस्मिन्कमले षं चषं चाष्टाद्वादिति षष्ट्युत्तरत्रिशतं धारणाः॥ताश्च पृथङ्ना
दबिंदुकलाभिः सार्द्धमेलनप्रकारैरनंता धारणा गुरूपदेशादवगंतव्याः॥धारणानां फ
लं आधारादिचक्रेषु षट्कु यथाक्रमं मतिस्मृतिबुद्धिप्रज्ञामेधाप्रतिभासंविद्रूपं दिक्मात्रं निद
र्शितं॥ननु सुभगोदये चरणागमे सम्यक्प्रपंचबहुधा प्रतिपादितं तत्तत एव वावधार्यं ग्रंथ
॥१३३२॥ विस्तरभयान्नोपवर्णितमिहेति॥अत एव भगवत्पादैः कुलसमयमतप्रतिपादकेन श्लो ॥१३३२॥
केन सकलजननीस्तोत्रे कथितं॥यथा चतुष्पत्रांतः षड्दलपुटभंगांतस्त्रिवलयस्फुरद्वि
द्युद्वह्निद्युमणिनिलयाभद्युतिलते॥षडस्रं भित्वादौ दशदलमथ द्वादशदलं कलास्रं च द्व्य
स्रं गत्वा वर्तिनमस्ते गिरिसुते॥अस्यार्थः॥चतुष्पत्रमाधारकमलं अंतः स्थितमंतर्भूतमि
त्यर्थः॥यस्मिन्नूतस्याधिष्ठानमिति बहुव्रीहिः नतु तत्पुरुषः उत्तरस्य पूर्वस्मिन्नंतर्भावायो
गात्॥षडस्रं भित्वादौ विस्फन्तरत्रवाम्यनन्ययाश्च बहुव्रीहिरेव॥चतुष्पत्रांतश्चतस्य दलं च

स्वाधिष्ठानं चतुष्पत्रांतः षड्दलं तस्य पुटभगापुटात्मकाः संपुटात्मकास्तत्र क्रौतिकाइतियाव
त्तेच ते भगास्त्रिकोणानि मणिपूर प्रभृति चतुश्चक्रस्य मूलाधारादित्रक्रौतिकस्याक्रमात्ते
षांत्रिकोणात्मकत्वं॥त्रिकोणबैंदवं श्लिष्टमष्टारेषड्दलांबुजमित्यत्र सम्यङ्निरूपितं॥पुटभ
गानामंतर्मध्ये त्रिवलयग्रंथित्रये स्वाधिष्ठानाहताज्ञांतेषु अग्निसूर्यचंद्रात्मकरुद्रग्रंथिवि
ष्णुग्रंथिब्रह्मग्रंथिपरपर्यायेन स्थितमित्यर्थः॥तत्र स्फुरत्स्फुरंत्योः स्त्रियोः पुंवद्भाषितपुं
स्कादनूङ् समानाधिकरणेत्यादिना पुंवद्भावः॥विद्युतः सौदामिन्याः वन्हेरग्नेः द्युमणेः सू
र्यस्य नियतता व्योमगणे यां संख्यां लक्षयति॥तस्यै वा भायस्याः सा सा च सा द्युतिलतानि
त्यातडिल्लीस्थिरसौदामिनी यावत्तस्याः संबुद्धिः आज्ञाचक्रांतेब्रह्मग्रंथिभेदसम
ये विद्युन्नियता भा स्वाधिष्ठानांते रुद्रग्रंथिभेदनसमये वन्हिनियता भा अनाहतचक्रांते
विष्णुग्रंथिभेदनसमये विद्युन्मणिनियता भेति विवेकः॥षडस्रं मूलाधारगर्भितं स्वाधिष्ठा
नमात्रैर्भित्वा अथ तच्चतुरं दशदलं मणिपूरं भित्वा द्वादशदलमनाहतचक्रं भित्वा कला
स्रं विशुद्धिचक्रं भित्वा द्व्यस्रं आज्ञाचक्रं भित्वा गगनवति सहस्रदलकमलमिति शेषः॥हे गिरि

११२

॥१३४॥

सुतेहिमाचलतनयेतेनमः॥अत्रचतुष्पत्रेमूलाधारेस्वाधिष्ठानेअंतर्भूतेकौलाउपासतइतिप्रा
गेवप्रतिपादितं॥समयिनस्तुस्वाधिष्ठानंभित्वामणिपूरंप्रविश्यादेव्याउपासनंकुर्वंतीतिसम
यमततत्वंचप्रतिपादितं॥अत्रेदमुपसंहारंषट्कमलेषुमनःषष्ठंभूतपंचकंतादात्म्येनावतिष्ठतेतत्र
पिंडब्रह्मांडयोरैक्यानुसंधानमहिम्नाषट्कमलानुसंधानमहिम्नापंचविधसाम्यानुसंधानमहिम्ना
षड्विधैक्यानुसंधानमहिम्नापिंडांडब्रह्मांडवदवभासनइतिसर्वयोगशास्त्ररहस्यं॥अतएवयो
गिनश्चतुर्विधैक्यानुसंधानकर्तव्यमेवतथाचश्रूयते॥पिंडब्रह्मांडयोरैक्यंलिंगसूत्रात्मनोरपि॥
स्वापाव्याकृतयोरैक्यंक्षेत्रज्ञपरमात्मनोः॥अयमर्थः॥पिंडब्रह्मांडयोरैक्यंज्ञातव्यंतदनंतरंलिं
गात्मसूत्रात्मनोरवगंतव्यंलिंगात्मालिंगशरीरंएकादशेंद्रियगोणस्तन्मात्रापंचकंषोडशात्मकंलिं
गशरीरंसूत्रात्मापिंडांजावच्छिन्नोवायुःलिंगशरीरस्यअचिरादिमार्गप्राप्तयोरैक्यमवगंतव्यं
स्वापाव्याकृतयोःस्वापःसुषुप्त्यवस्थापन्नःसाक्षीप्राज्ञःअव्याकृतःअविद्याशबलितब्रह्मतयो
रैक्यंक्षेत्रज्ञोजीवःपरमात्माब्रह्मस्वरूपंतयोरैक्यंज्ञातव्यंएवंसंप्रदायरहस्यंसंक्षेपःविस्तरस्तु
शारीरकेज्ञातव्यं॥अस्मिन्श्लोकेसौंदर्यलहर्यांयावत्प्रमेयजातंसमयसिद्धांतरहस्यत्वेनको

॥१३४॥

लसिद्धांतरहस्यत्वेन च प्रतिपादितमस्माभिः॥ तत्सर्वं सूक्ष्मदृशा महात्मभिरनुसंधेयमिति स
र्वमनवद्यं॥९९॥ प्रदीपज्वालाभिर्दिवसकरनीराजनविधिः सुधासूतेश्चंद्रोपलजललवैरर्घ्य
रचना॥ स्वकीयैरंभोभिः सलिलनिधिसौहित्यकरणं त्वदीयाभिर्वाग्भिस्तव जननि वाचां स्तु
तिरियं॥१००॥ प्रदीपस्य करदीपिकायाः ज्वालाभिः कीलाभिः दिवसकरस्य नीराजनविधिः
नीराजनाख्यः संस्कारः सुधासूतेश्चंद्रस्य उपलानां चंद्रकांतानां जललवैर्निष्यंदैः अर्घ्यरचना स्वकीयै
रात्मसंबंधिभिः एतत्स्वकीयपदं प्रदीपज्वालाभिरित्यादौ प्रत्येकमन्वेति॥ स्वकीयाभिरिति
सुधासूतेरित्यादावन्वेति अंभोभिर्जलैः सलिलनिधिसौहित्यकरणं समुद्रस्य तृप्तिहेतुस्त
र्पणविशेषः त्वदीयाभिस्त्वदुत्पन्नाभिर्वाग्भिः त्वत्स्वरूपैर्वाक्यसंदर्भैः स्तुतिः स्तोत्रं तव भव
त्याः जननि हे मातः सवित्रीत्यर्थः॥ वाचां वाक्प्रपंचस्य स्तुतिरियं॥ अत्रेयं स्तुतिरिति पूर्वोक्तप्र
दीपज्वालादिवाक्यप्रतिपादितार्थसाम्यपरामर्शात्तदा प्रतिवस्तूपमालंकारः॥ उपमानोप
मेययोर्वस्तुप्रतिवस्तुभावेनान्वयात्॥ यदा इयं स्तुतिरिति स्वरूपमात्रमेव परामृश्यते तु
दाभिन्नवाक्यत्वेन बिंबप्रतिबिंबाक्षेपात् दृष्टांतालंकारः॥ एवं प्रतिवस्तूपमादृष्टांताल

११२

॥१३५॥

कारयोरन्वयभेदेन प्रतीयमानत्वात् वाच्यद्वयश्रवणात् संसृष्टिरेवेति ध्येयं ॥१००॥ अस्मिन्
सौंदर्यलहरीश्लोकशतके समानीतः पद्यामिति समुक्तं तस्य फलस्तानभरमिति। निधेनिखेदूति
श्लोकत्रयं वर्तते तन्नु भगवत्पादकृतं न भवति केनचित्प्रक्षिप्तमिति न व्याख्यातं ॥ ॥इति श्रीलो
लकुलसंप्रदायप्रवर्तकभ्रमरांबिकाप्रसादसमुल्लासितमहासारस्वतमद्दृलोल्लवदिति ग्रंथविव
रणकर्तृश्रीमन्महामहोपाध्यायमहादेवाचार्यसत्तमेन साहित्यपारिजातस्मृतिकल्पतरुप्रबंधक
र्त्रलक्ष्मीधराचार्यषष्ठेन भरतार्णवपोताख्यसाहित्यमीमांसाग्रंथद्वयप्रणेतृविरंचिमिश्रपंच
मेन मीमांसाग्रंथद्वयनिर्मातृपुरुषोत्तममहामहोपाध्यायनप्तृप्रभाकराम्नतवाहिनीप्रवा
हावलीखंडनाद्यनेकप्रबंधसंदर्भप्रवर्तकनिरूपपदमहामहोपाध्यायलक्ष्मणाचार्यपौत्रेण
नयविवेकदीपिकाप्रबंधसंविधातृमहामहोपाध्यायविद्वत्सार्वभौमसूनुना व्यासाद्यनेकक
विबिरुदांकितश्रीविश्वनाथभट्टारकतनयेनाधीतदशशास्त्रेनयेन पार्वतीगर्भशुक्तिमुक्ताफ
लेन बकुलतलतचीचिरत्नेन लोल्लकुलकलशांबुधिसुधांशुना हरितगोत्रकल्पशाखिना प
स्तंबशाखिना षड्दर्शनीपारदृश्वना प्रतिपक्षजयमातरिश्वना भ्रमरांबिकाप्रसादसमासादित

॥१३५॥

प्रतिभावविशेषेणानिखिलयामलतंत्रार्णवावगाहनरुद्रेण आश्रयीकृतगजपतिरुद्रेण नील
गिरिसुंदरचरणारविंदचंचरीकेण वाणीसहचरीकेण सरस्वतीविलासाद्यनेककृतिनिबंधल
क्ष्मीधराद्यनेकसाहित्यनिबंधनयविवेकभूषणाद्यनेकगुरुमतनिबंधयोगदीपिकाद्यनेकपा
तंजलमल्लनिबंधमहानिबंधाख्यमानवधर्मशास्त्रटीकाकारयंतंसबर्होवतंसाद्यनेककाव्य
कल्पकेन निग्रहानुग्रहकौशिकेन श्रीमहामहोपाध्यायलक्ष्मीधरदेशिकेन कृतेयं लक्ष्मीधरा
ख्यसौंदर्यलहरीस्तुतिव्याख्यानया संतुष्टा भवतु भगवती भवानी॥ छ॥ छ॥ छ॥ छ॥ छ॥ छ॥ छ
गतोयं शंकराचार्यो वीरमाहेश्वरो गतः॥ षड्दर्शनभेदने को वा जानीते मत्परिश्रमं॥ अस्मदीयानां पू
र्वेषां लक्ष्मीधराचार्याणां पद्यं॥ वयमिह पदविद्यां तंत्रमान्वीक्षिकीं वा यदि पथि विपथे वा वर्त
यामः स पंथाः॥ उदयति दिशि यस्यां भानुमान्सैव पूर्वा न हि तरणिरुदीते दिक्पराधीनवृत्तिः॥ स
पंसंफुल्लमल्लीसुमसुरभिसुधामाधुरीसाधुरीतिप्रेंखत्सुखानुपुंखस्फुरदमरसरिद्वीचिवाचा
लवाचः॥ लोलल्लेश्रीलक्ष्मणार्यो गुणमणिजलधिर्भासते भूसुरालीकेलीनालीकपालीदत्तारा
तकिरणो विद्वदग्रेसरोसौ॥ यस्य सप्तमः॥ यः कर्णाटवसुंधराधिपमहास्थाने सुवर्णाभिषेको यो

११८

विद्वज्जिकषायितोनृपसभेवेल्लाटिरथ्वीरितुः॥ श्रीमल्लोल्लटभट्टशिष्य इतियोलोल्लारव्यया श्रूयते श्रीशेषान्वयशेखरः सहि महादेवो विपश्चिन्महान्॥ तस्योक्तिः॥ निकषायितुमीहया सुवर्णयितुमेव वा॥ सुवर्णयितुमेवेहे निकषोनत्वलंक्रिया॥ तर्केन्यकृतवाचदूकनिवचंवोदिलेमास्तांममव्यारव्यात्वसमुदारशिष्यानिवहश्लाघ्येचतत्तिष्ठतु॥ स्वर्लोकप्लवमानसिद्धतटिनीकल्लोलसल्लापिनामुल्लासावचसानकस्यमनसोमत्काव्यमत्कारिणः॥ पितामहस्योक्तिः॥

॥३३६॥ हीनेगणामहेनैवनैवगच्छामहेधिके॥ समेतुसर्वःशंकेनमसमस्तेसमस्तुनः॥ मदीयोक्तिः॥ यतोयंशंकराचार्योवीरमाहेश्वरोगतः॥ षड्भेदनेकोवाजानीतेमस्परिश्रमं॥ वासुदेवाचार्यकृतिः॥ विश्रांतिपूर्वीमतिवेल निद्रास्वप्नादिकस्वप्नमदप्रपूर्वं॥ अमुत्रिकंबोधमयिप्रयांतित्वयाहि ९ योगेश्वरिसच्चिदाभाः॥ छ॥ छ॥ शुभमस्तु॥ ॥ श्रीमन्नृपशालिवाहनशाके १७०५ शोभकृन्नामसंवत्सरेउत्तरायणेशिशिरर्तौमाघशुक्लद्वितीयायांमंददिनेपाठकोपनाम्नाभट्टविमनाकेयंलिखितासमापिता॥ स्वार्थंपरोपकारार्थंच॥ ॥ श्रीललितांबाजयति ॥३३६॥

॥श्री॥ ॥श्री॥ ॥श्री॥ ॥श्री॥ ॥श्री॥ ॥श्री॥ ॥श्री॥ ॥श्री॥

[OrderDescription]
,CREATED=15.10.20 15:26
,TRANSFERRED=2020/10/15 at 15:43:47
,PAGES=229
,TYPE=STD
,NAME=S0004017
,Book Name=M-828-SOUNDARYA LAHARI TIKA
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF

FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF
,FILE9=00000009.TIF
,FILE10=00000010.TIF
,FILE11=00000011.TIF
,FILE12=00000012.TIF
,FILE13=00000013.TIF
,FILE14=00000014.TIF
,FILE15=00000015.TIF

FILE16=00000016.TIF
,FILE17=00000017.TIF
,FILE18=00000018.TIF
,FILE19=00000019.TIF
,FILE20=00000020.TIF
,FILE21=00000021.TIF
,FILE22=00000022.TIF
,FILE23=00000023.TIF
,FILE24=00000024.TIF
,FILE25=00000025.TIF
,FILE26=00000026.TIF
,FILE27=00000027.TIF

FILE28=00000028.TIF
,FILE29=00000029.TIF
,FILE30=00000030.TIF
,FILE31=00000031.TIF
,FILE32=00000032.TIF
,FILE33=00000033.TIF
,FILE34=00000034.TIF
,FILE35=00000035.TIF
,FILE36=00000036.TIF
,FILE37=00000037.TIF
,FILE38=00000038.TIF
,FILE39=00000039.TIF

FILE40=00000040.TIF
,FILE41=00000041.TIF
,FILE42=00000042.TIF
,FILE43=00000043.TIF
,FILE44=00000044.TIF
,FILE45=00000045.TIF
,FILE46=00000046.TIF
,FILE47=00000047.TIF
,FILE48=00000048.TIF
,FILE49=00000049.TIF
,FILE50=00000050.TIF
,FILE51=00000051.TIF

FILE52=00000052.TIF
,FILE53=00000053.TIF
,FILE54=00000054.TIF
,FILE55=00000055.TIF
,FILE56=00000056.TIF
,FILE57=00000057.TIF
,FILE58=00000058.TIF
,FILE59=00000059.TIF
,FILE60=00000060.TIF
,FILE61=00000061.TIF
,FILE62=00000062.TIF
,FILE63=00000063.TIF

FILE64=00000064.TIF
,FILE65=00000065.TIF
,FILE66=00000066.TIF
,FILE67=00000067.TIF
,FILE68=00000068.TIF
,FILE69=00000069.TIF
,FILE70=00000070.TIF
,FILE71=00000071.TIF
,FILE72=00000072.TIF
,FILE73=00000073.TIF
,FILE74=00000074.TIF
,FILE75=00000075.TIF

FILE76=00000076.TIF
,FILE77=00000077.TIF
,FILE78=00000078.TIF
,FILE79=00000079.TIF
,FILE80=00000080.TIF
,FILE81=00000081.TIF
,FILE82=00000082.TIF
,FILE83=00000083.TIF
,FILE84=00000084.TIF
,FILE85=00000085.TIF
,FILE86=00000086.TIF
,FILE87=00000087.TIF

FILE88=00000088.TIF
,FILE89=00000089.TIF
,FILE90=00000090.TIF
,FILE91=00000091.TIF
,FILE92=00000092.TIF
,FILE93=00000093.TIF
,FILE94=00000094.TIF
,FILE95=00000095.TIF
,FILE96=00000096.TIF
,FILE97=00000097.TIF
,FILE98=00000098.TIF
,FILE99=00000099.TIF

FILE100=00000100.TIF
,FILE101=00000101.TIF
,FILE102=00000102.TIF
,FILE103=00000103.TIF
,FILE104=00000104.TIF
,FILE105=00000105.TIF
,FILE106=00000106.TIF
,FILE107=00000107.TIF
,FILE108=00000108.TIF
,FILE109=00000109.TIF
,FILE110=00000110.TIF
,FILE111=00000111.TIF

FILE112=00000112.TIF
,FILE113=00000113.TIF
,FILE114=00000114.TIF
,FILE115=00000115.TIF
,FILE116=00000116.TIF
,FILE117=00000117.TIF
,FILE118=00000118.TIF
,FILE119=00000119.TIF
,FILE120=00000120.TIF
,FILE121=00000121.TIF
,FILE122=00000122.TIF
,FILE123=00000123.TIF

FILE124=00000124.TIF
,FILE125=00000125.TIF
,FILE126=00000126.TIF
,FILE127=00000127.TIF
,FILE128=00000128.TIF
,FILE129=00000129.TIF
,FILE130=00000130.TIF
,FILE131=00000131.TIF
,FILE132=00000132.TIF
,FILE133=00000133.TIF
,FILE134=00000134.TIF
,FILE135=00000135.TIF

FILE136=00000136.TIF
,FILE137=00000137.TIF
,FILE138=00000138.TIF
,FILE139=00000139.TIF
,FILE140=00000140.TIF
,FILE141=00000141.TIF
,FILE142=00000142.TIF
,FILE143=00000143.TIF
,FILE144=00000144.TIF
,FILE145=00000145.TIF
,FILE146=00000146.TIF
,FILE147=00000147.TIF

FILE148=00000148.TIF
,FILE149=00000149.TIF
,FILE150=00000150.TIF
,FILE151=00000151.TIF
,FILE152=00000152.TIF
,FILE153=00000153.TIF
,FILE154=00000154.TIF
,FILE155=00000155.TIF
,FILE156=00000156.TIF
,FILE157=00000157.TIF
,FILE158=00000158.TIF
,FILE159=00000159.TIF

FILE160=00000160.TIF
,FILE161=00000161.TIF
,FILE162=00000162.TIF
,FILE163=00000163.TIF
,FILE164=00000164.TIF
,FILE165=00000165.TIF
,FILE166=00000166.TIF
,FILE167=00000167.TIF
,FILE168=00000168.TIF
,FILE169=00000169.TIF
,FILE170=00000170.TIF
,FILE171=00000171.TIF

FILE172=00000172.TIF
,FILE173=00000173.TIF
,FILE174=00000174.TIF
,FILE175=00000175.TIF
,FILE176=00000176.TIF
,FILE177=00000177.TIF
,FILE178=00000178.TIF
,FILE179=00000179.TIF
,FILE180=00000180.TIF
,FILE181=00000181.TIF
,FILE182=00000182.TIF
,FILE183=00000183.TIF

FILE184=00000184.TIF
,FILE185=00000185.TIF
,FILE186=00000186.TIF
,FILE187=00000187.TIF
,FILE188=00000188.TIF
,FILE189=00000189.TIF
,FILE190=00000190.TIF
,FILE191=00000191.TIF
,FILE192=00000192.TIF
,FILE193=00000193.TIF
,FILE194=00000194.TIF
,FILE195=00000195.TIF

FILE196=00000196.TIF
,FILE197=00000197.TIF
,FILE198=00000198.TIF
,FILE199=00000199.TIF
,FILE200=00000200.TIF
,FILE201=00000201.TIF
,FILE202=00000202.TIF
,FILE203=00000203.TIF
,FILE204=00000204.TIF
,FILE205=00000205.TIF
,FILE206=00000206.TIF
,FILE207=00000207.TIF

FILE208=00000208.TIF
,FILE209=00000209.TIF
,FILE210=00000210.TIF
,FILE211=00000211.TIF
,FILE212=00000212.TIF
,FILE213=00000213.TIF
,FILE214=00000214.TIF
,FILE215=00000215.TIF
,FILE216=00000216.TIF
,FILE217=00000217.TIF
,FILE218=00000218.TIF
,FILE219=00000219.TIF

FILE220=00000220.TIF
,FILE221=00000221.TIF
,FILE222=00000222.TIF
,FILE223=00000223.TIF
,FILE224=00000224.TIF
,FILE225=00000225.TIF
,FILE226=00000226.TIF
,FILE227=00000227.TIF
,FILE228=00000228.TIF
,FILE229=00000229.TIF
,